Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संस्कृत, प्राकृत, हिन्दी, गुजराती, आदी जैनधर्मने लगतुं तमाम साहित्य तथा जैन पाठशाला उपयोगी पाठ्य पुस्तको अने न्याय, व्याकरण आदी ग्रंथो तथा व्याख्यान उपयोगी साहित्य व्याजबी भावे मेळववानुं मोटु स्थान :

सूचीपत्र तथा जोइता पुस्तकोना भाव माटे पूछावो :

**सरस्वती पुस्तक भंडार**

हाथीखाना रतनपोल, अहमदाबाद १

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्जैनाचार्ययोगनिष्ठाऽध्यात्मज्ञानदिवाकरपरमपूज्यसद्गुरुश्रीमद्बुद्धिसागरसूरिश्वरपादपद्मेभ्यो नमः ॥

तपोगणगगनांगणदिनमणिप्रसिद्धवक्ताश्रीमद्अजितसागरसूरिप्रणीतम्—

# श्रीअजितसेन–शीलवतीचरितम्.

## ( कथासारसहितम्. )

---

प्रकाशकः—श्रीअजितसागरसूरिशास्त्रसंग्रहकार्यवाहक—श्रेष्ठिवर्य–

तुलजारामात्मज शामलदासः–प्रांतिजवास्तव्यः

वीरसं. २४५४ ईस्विसं. १९२८

विक्रमसं. १९८४ प्रतयः ५०० बुद्धिसं. ३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





# उपकृतिः

ग्रन्थस्यास्य मुद्रापणे विद्यापुर (विजापुर) पत्तन प्रतिष्ठित विद्याशालातश्चतुरशित्यधिकैकोनविंशतितमे वैक्रमवत्सरे यथाविधि योगोद्वहन ( उपधान तपः ) क्रियाऽकारि, एस्तद्ग्रन्थकर्त्री. तत्र ज्ञानपूजननिमित्तं यद्द्रव्यंलब्धं तस्मात्सार्द्धचतुःशती ( ४५० ) रूप्यकाणां, श्रेष्ठिकालिदासात्मज **भीखाभाई** इत्यतद्द्वारा लब्धा, सागरसंप्रदायप्रवर्त्तिनी**श्रीलाभश्रियः** सदुपदेशादुपाश्रयतो ज्ञानपूजननिमित्तकचत्वारिंशदधिकशतं ( १४० ) लब्धं, मांगरोलनिवासिश्रेष्ठिवर्यप्रागजीभाई तनुज **जगजीवनदास** सत्पुत्रप्रदत्ताश्चैकोत्तरशतरूप्यकाः ( १०१ ) संप्राप्ताः, एतज्ज्ञानपुस्तकप्रकटनकृते द्रव्यसमर्पणेन ये प्रकटयन्त्यौदार्यं तेषामुपकृतिंमन्ये,

ले. **प्रकाशकः**

ता. ११–९–२८. **प्रांतिज**.–( जिल्ला–अमदावाद )



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# प्रस्तावना.

धर्मशास्त्रविनोदेन, कालो गच्छति धीमताम् । व्यसनेन च मूर्खाणां, निद्रया कलहेन च ॥ १ ॥

सुविदितमेतत्खलु सर्वेषां विदुषां श्रीमदर्हतां मुखकमलेभ्यो विनिर्गतानि श्रीमद्भिश्च गणधरवरै रचितानि द्वादशाङ्ग्यादिधर्मशास्त्राणि जगज्जनपावकानि सुप्रसिद्धानीति, तानि वेदितुं शिक्षितुं च मानवा एव समर्थाभवन्ति, मानवत्वं च दशदृष्टान्तैरतीव दुर्लभं निगद्यते । तद्यथा—

विप्राशनं पाशकमन्नराशिं, द्यूतं मणिं स्वप्नशशांकपानम् । चक्रं च कूर्मं च युगं पराणुं, दृष्टान्तमाहुर्मनुजत्वलाभे ॥ १ ॥

" विप्रः प्रार्थितवान् प्रसन्नमनसः श्रीब्रह्मदत्तात्पुरा, क्षेत्रेऽस्मिन् भरतेऽखिले प्रतिगृहं मे भोजनं दापय ।
इत्थं लब्धवरोऽथ तेष्वपि कदाप्यश्नात्यहो द्विःस चेद्, भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥ १ ॥
स्तम्भानां हि सहस्रमष्टसहितं प्रत्येकमष्टोत्तरं, कोणानां शतमेषु तानपि जयन् द्यूतेऽथ शतसंख्यया ।
साम्राज्यं जनकात्सुतः स लभते स्याचेदिदं दुर्घटं, भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥ २ ॥
वृद्धा काऽपि पुरा समस्तभरतक्षेत्रस्यधान्यावलिं, पिण्डीकृत्य च तत्र सर्षपकणान् क्षिप्त्वाढकेनोन्मितान् ।
प्रत्येकं हि पृथक्करोति किल सा सर्वाणि चान्नानि चेद्, भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥ ३ ॥
सिद्धद्यूतकलाबलाद्धनिजनं जित्वाथहेम्नां भरै–श्चाणक्येन नृपस्य कोशनिवहः पूर्णीकृतो हेलया ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दैवादाढ्यजनेन तेन स पुनर्जीयेत मन्त्री क्वचिद्, भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥ ४ ॥
रत्नान्याढ्यसुतैर्वितीर्य वणिजां देशान्तरादीयुषां, पश्चात्तापवशेन तानि पुनरादातुं कृतोपक्रमैः ।
लभ्यन्ते निखिलानि दुर्घटमिदं दैवाद् घटेत्तत्क्वचिद्, भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥ ५ ॥
स्वप्नेकार्पटिकेन रात्रिविगमे श्रीमूलदेवेन च, प्रेक्ष्येन्दुं सकलं कुनिर्णयवशादल्पं फलं प्राप्य च ।
स्वप्नस्तेन पुनः स तत्रशयिते नालोक्यते कुत्रचिद्, भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥ ६ ॥
राधाया वदनादधः क्रमवशाच्चक्राणि चत्वार्यपि, भ्राम्यन्तीह विपर्ययेण तदधो धन्वी स्थितोऽवाङ्मुखः ।
तस्या वामकनीनिकामिषुमुखेनैवाशु विध्यत्यहो, भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥ ७ ॥
दृष्ट्वा कोऽपि हि कच्छपो ह्रदमुखे शेवालबन्धच्युते, पूर्णेन्दुं मुदितः कुटम्बमिह तं द्रष्टुं समानीतवान् ।
शेवाले मिलिते कदापि स पुनश्चन्द्रं समालोकते, भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥ ८ ॥
शम्या पूर्वपयोनिधौ निपतिता भ्रष्टं युगं पश्चिमा,—म्भोधौ दुर्धरवीचिभिश्च सुचिरात्संयोजितं तद्द्वयम् ।
सा शम्या प्रविशेद्युगस्य विवरे तस्य स्वयं क्वापि चेद्, भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥ ९ ॥
चूर्णीकृत्य पराक्रमान् मणिमयं स्तम्भं सुरः क्रीडया, मेरौ सन्नलिका समीरवशतः क्षिप्त्वा रजो दिक्षु चेत् ।
स्तम्भं तैः परमाणुभिः सुमिलितैः कुर्यात्स चेत्पूर्ववत्, भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥ १० ॥
" पुण्यैरवाप्यते लक्ष्मीः, पुण्येनैव महोन्नतिः । पुण्येन मानवो देहो—दुर्लभः स्वर्गिणामहो ? ॥ ११ ॥ "



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लब्धेऽपि मानवत्वे केचन कुकर्मप्रेरिता रङ्कजनहस्तगतचिन्तामणिवन्मानवभवं प्रमादतो हारयन्ति, केचन श्राद्धकुलसंजाता अप्यनार्यजनसंसर्गादनार्यमतकदाग्रहगृहीताः सावद्यधर्ममाश्रयन्ते, केचन देहिनोऽनार्यकुलसमुद्भवा अपि सत्कर्माभ्युदयेन विशुद्धमतयो जैनतत्त्वं समाराधयन्ति, केचन कुतर्ककल्लोलजालवाहिता विशुद्धधर्मतत्त्वसुरापगातटं नाऽऽप्नुवन्ति,

केचन प्राणिनःकाम्यकर्मविनोदिनः शुद्धाऽऽत्मतत्त्वविमुखा निजात्मानमधः पातयन्ति, एतत्कारणं तु तत्त्वप्रतिपादकधर्मशास्त्राभिमुख्यविमुखत्वमेवाऽवसीयते,

धर्मतत्त्वानि च द्रव्यानुयोगचरणकरणानुयोगगणितानुयोगधर्मकथानुयोगात्मकेऽनुयोगचतुष्टये प्रथितानि सन्ति, तत्र कथाऽनुयोगो दानशीलतपोभावनाभेदेन चतुर्विधो वर्णितो जिनपादैस्तद्यथा—" दानं सुपात्रे विशदञ्च शीलं, तपोविचित्रं शुभभावना च । भवार्णवोत्तारणयानपात्रं, धर्मं चतुर्धा मुनयो वदन्ति ॥ १ ॥ दानधर्मो द्रव्यैकसाध्यः श्रीमतां सुकर इत्येव न किन्तु निःस्वा अपि शालिभद्रपूर्वजीववद्दानधर्मं समाराध्य महोन्नतपदं लभन्ते, तपोभावनेऽपि तत्त्वबुद्ध्या भव्यात्मनां सुखसाध्ये स्तः, शीलपालनं तु कामसायकजर्जरिताङ्गानां दुष्करमेव विभाव्यते, तथा च—" तावद् मौनी यतिर्ज्ञानी, सुतपस्वी जितेन्द्रियः । यावन्न योषितां दृष्टि—गोचरं याति पूरुषः ॥ १ ॥ " अतः शीलव्रतं सर्वव्रतेषु श्रेष्ठतमत्वं धारयति, ब्रह्मव्रतप्रभावो निर्ग्रन्थनाथैरनेकधा प्रतिपादितोऽस्ति, तथा च— "

" ब्रह्मचर्यरतालोका—स्तरन्ति भवसागरम् । तस्माद् ब्रह्मव्रतं सेव्यं, मोक्षलक्ष्मीनियामकम् ॥ १ ॥ "

पुरा शीलव्रतप्रभावेणाऽनेकशो नरनारीगणा भवपाथोधिं गोष्पदमात्रं विधायाञ्जसा सिद्धगतिं प्रापुः—उक्तं च—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





" सुदर्शनः शीलगुणेन सिद्धः, शीलेन विघ्नानि जिगाय सीता ।
नलप्रिया दुःखभरं च तीर्णा, दुष्टानि कर्माणि हि यान्ति नाशम् ॥ १ ॥ "

शीलव्रतप्रभावसूचकानि दृष्टान्तानि बहूनि सन्ति शास्त्रेषु,

मुख्यतोद्विविधोधर्मः प्ररूपितः, यथा—" प्रवृत्तिमार्गश्च निवृत्तिमार्गो, निर्वाणमार्गौ गदिताविमौ द्वौ । समाश्रयन्भूजलमार्गवद्वै, भव्यः शनैः स्राक् शिवशर्म यायात् ॥ १ ॥ "

तेष्विदमजितसेनशीलवतीशीलमहिमख्यापकं चरितं प्रथितमपि श्रीकुमारपालप्रतिबोधादिग्रन्थेषु प्राकृतसंस्कृतात्मकेषु संक्षेपतो विशेषतो दृष्टान्ताऽलंकृतं विविध रसमयं दिव्यगिरा प्रसिद्धवक्ता शासनप्रभावक श्रीमद् **अजितसागरसूरीश्वरेण** गद्यात्मकं विनिरमायि, तन्निर्माण-समयश्च " द्वीपरसग्रहधरणी ( १९६७ ) प्रमितेऽयं वत्सरे मधौ मासे, कृष्णाष्टम्यां भानौ, मुम्बापूर्यां समापितो ग्रन्थः " ॥ १ ॥

प्राचीनप्राकृतग्रन्थेभ्यो विविधदृष्टान्तसमर्थितोऽयं ग्रन्थो ग्रन्थनिर्मात्रा परोपकृतिबुद्धिना प्राकाश्यमानीतः, सुरभारतीरसिकानां विविधरसलालित्यभाजां सरलत्वेन प्राज्ञलानामपि चेतांसि प्रमोदयिष्यति, अस्मिन् प्रबन्धे शीलवतीशीलप्रभावबुद्धिवैशद्यद्योतकानि विविधरसभृतानि कथानकानि सहृदयहृदयाऽऽह्लादकानि योजितानि सूरिपादैः, पूर्वोऽर्जितकर्मणां वैचित्र्यं प्रत्यक्षतया विविधसुखदुःखा-ऽनुवेदनया जन्मभाजां जन्मान्तरीयसुखदुःखानि स्पष्टयत्ययं प्रबन्धः, " सम्यग् ज्ञानदर्शनचारित्राणि मोक्षमार्गः " सम्यग् ज्ञानदर्शन-चारित्राणामाराधनयैव मोक्षः, चतुर्विधपुरुषार्थेषु मोक्षो मुख्यतां दधाति, अतस्तदर्थमेव ज्ञानिनो यतन्ते, यतमानाः केचन विद्वाँसो तत्फलं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लभन्ते, योगिनो योगमार्गेण विहितचित्तनिरोधा निर्वाणपदं भजन्ते, ब्रह्मज्ञा ब्रह्मोपासनया निरामयस्थानवर्त्तिनो भवन्ति, तत्स्वरूपं सरहस्यं मुख्यतोऽत्र विशदीकृतं विद्यते, यतः " सम्यग्ज्ञानक्रियाभ्यां मोक्षः ? " अध्यात्मतत्त्ववेदिभिः पूर्वाऽऽचार्यैः प्रथितास्तत्तद्ग्रन्था निश्चयजुषां पोषका बहवः प्रतीयन्ते, तथैव–क्रियार्थप्रतिपादका अपि प्रबन्धाः क्रियाप्रधानानामतीवोपयोगिनो विलसन्ति, यथा—

" विना ज्ञानप्रकाशेन, हस्तिस्नानमिव क्रिया । क्रियाकर्मविहीनं च, निष्फलं ज्ञानमुच्यते ॥ १ ॥ "

अतोऽस्मिन् ग्रन्थे ज्ञानक्रियोभयप्रतिपादकानि कथानकानि सूरिवरेण प्रदर्शितानि, स्त्रीपुरुषाणां लक्षणभेदतश्चातुर्विध्यं गुणप्रकृत्यनुसारेण व्याख्यातमस्मिन् चरित्रग्रन्थे यथा—

" अनुकूलोऽथ दक्षश्च, शठो धृष्टस्तथैव च । चतुर्धा पुरुषो ज्ञेयः, कार्याऽकार्यविचक्षणः ॥ १ ॥

तथैव–स्त्रीभेदाः—" पद्मिनी चित्रिणी चैव, हस्तिनी शंखिनी तथा । नारी चतुर्विधा ज्ञेया, कार्याऽकार्यविचक्षणा ॥ २ ॥ "

केचन षड्विधं मानवत्वं प्रतिपादयन्ति तद्यथा–अधमाऽधमः, अधमः, विमध्यमः, मध्यमः, उत्तमः, उत्तमोत्तमश्चेति, " अविज्ञातधर्मकर्मा, परलोकविमूढात्मा, वने वसन् क्रूरकर्मा, वल्कलवसनः, गिरिकन्दराः सेवमानः पशुप्रायो यो भवति स नरोऽधमाऽधमः प्रोच्यते " ॥ " यः परलोकं न मनुते मद्यमांसभक्षणेऽतिलोलुपः, धर्मकर्मोपहसन् तदाराधकानवमन्यते, परदुःखमविलोकमानो निजसुखसाधने सततं यतते, नटविटवेश्याद्यूतकारमायावितस्करादिषु समासक्तः श्रेष्ठकूलजातोऽपि नास्तिकसंगतः पूण्यपापलोकान्तरमपह्नुते सोऽधमः, "

" यो मोक्षसुखमनीहमानः केवलं सांसारिकसुखाऽभिलाषी, अर्थकामाभ्यां सह धर्मं समाराधयाति स विमध्यमः, स च मोक्षं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





न द्वेष्टि वाञ्छयत्यपि न, नालिकेरद्वीपवासिनो यथा नालिकेरोपजीविनो धान्यं नाऽपेक्षन्ते तथैव विमध्यमा मोक्षधर्मे उदासते, ” “ यो धर्माऽर्थकाममोक्षेतिपुरुषार्थचतुष्टयं मनुते, परमतत्त्वं मोक्षमेव जानाति, मोक्षप्राप्त्यै भृशमुत्कण्ठते, तथाऽपि प्रौढसत्त्वाऽभावात्ताद्दशप्रतिबन्धकसत्त्वाच्च मोहपाशपतितो गृहस्थधर्मं पालयन् धर्माऽर्थकामान् यथार्हं साधयति स मध्यमः ” ॥ “ यो मोक्षायैव सततं यतते, क्रोधादिकषायाँश्चविजेतुमजस्रंयो यतते, यस्य मानसं भृशं वैराग्यरंगेण रञ्जितं स मुनिवरस्त्यक्तकाञ्चनकामिन्यादिपरिवारः संसारविरक्तः उत्तमोभिधीयते ” । “ सकलकर्मविनिर्मुक्तः संसारमहार्णवपारगामी केवलज्ञानेन समस्तलोकालोकंकरतलाऽऽमलकवद्विलोकमानो यः पूर्णब्रह्मस्वरूपं प्रकाशते स वीतराग उत्तमोत्तमः प्रचक्ष्यते ”। तथैव मनुष्यजातेः षड्विधत्वं संक्षेपतः प्रादर्शि—भगवता श्रीमदुमास्वातिना तत्त्वार्थकारिकासु यथा—

“ कर्माऽहितमिह चाऽमु–त्र चाऽधमतमो नर समारभते । इह फलमेवत्वधमो, विमध्यमस्तूभयफलार्थम् ॥ १ ॥ ”

“ परलोकहितायैव, प्रवर्तते मध्यमः क्रियासु सदा । मोक्षायैव तु घटते, विशिष्टमतिरुत्तमः पुरुषः ॥ २ ॥ ”

“ यस्तु कृतार्थोऽप्युत्तम–मवाप्य धर्मं परेभ्य उपदिशति । नित्यं स उत्तमेभ्यो,ऽप्युत्तम इति पूज्यतम एव ॥ ३ ॥ ”

अस्याऽजितसेनशीलवतीचरित्रस्य संक्षेपार्थः श्रीमच्छतार्थिसोमप्रभाऽऽचार्यकृतकथानकाऽनुसारेणैतद्ग्रन्थान्ते नियोजितः, तदवलोकनेनैतद्ग्रन्थगतमाधुर्यगौरवमवभोत्स्यते जिज्ञासुभिः, ग्रन्थश्चायं चतुर्भिः प्रस्तावैर्विरचितः, एतदुल्लेखो विबुधजनानां प्रमोददायको भवत्विति बुद्ध्या व्यरचि, रसमाधुर्यताञ्चास्य ग्रन्थस्य विलोकयितारः स्वयमेव ज्ञास्यन्ती–ति सृतमतिविस्तरेण, एत-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्ग्रन्थकर्तुरन्येऽपि श्रीचन्द्रराजचरित्र, प्रकरणसुखासिन्धु, सुभाषितमुक्तावली, चतुर्विंशतिजिनस्तुतिसंग्रह, विविधजिनाष्टक, गुरुपदपूजा, काव्यसुधाकर, गीतरत्नाकर, गीतप्रभाकर, संवेधषट् त्रिंशिका, श्रीसुपार्श्वनाथचरित्रभागद्वयसुरसुन्दर्यनुवादप्रभृतयः संस्कृतप्राकृता ग्रन्था जनतोपकारिणः प्रस्फुरन्ति,

अस्य चरित्रस्य विशोधने सम्यग्दत्ताऽवधानो वैयाकरणाऽऽचार्य श्रीमान् **भाईशङ्करशास्त्री** परिश्रममातनोत्तेषामुपकृतिराविस्मरणीयाऽस्ति, छद्मस्थभावाद्ग्रन्थकर्तुर्विशोधकस्याऽक्षरयोजकानां चं कुत्रचित्स्खलना जाताचेद्धीधनैर्विशोध्यम्—

**यतः—" गच्छतः स्खलना क्वाऽपि, भवत्येव प्रमादतः । हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥ १ ॥ "**

**इत्याशास्ते—**

प्रसिद्धवक्ता श्रीमद् **अजितसागरसूरीश्वरचरणसरोजचञ्चरीकायमाणः,**

मु. **वरसोडा** ( महीकांठा )
वीर संवत् २४५४. विक्रम संवत् १९८४. बुद्धि सं. ३
**अक्षयतृतीयायां रविवासरे.**

**मुनि हेमेन्द्रसागरः**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीमच्छास्त्रविशारदजैनाचार्ययोगनिष्ठबुद्धिसागरसूरीश्वरगुणाऽष्टकम्

( मालिनीवृत्तम् )

सुरमुनिनरसेव्यं यस्य पादारविन्दं, विमलकमलनेत्रं पापपुञ्जप्रहारि । परमकरुणभावद्योतकं दीप्तिगेहं, नमत मुनिवरं तं, बुद्धिपाथोधिसूरिम् ॥ १ ॥ दयितमुदयवन्तं मोदमूलं जनानां, जननमरणहीनं हीनकर्माणमीशम् । मुनिगुणनिभृताङ्गं धर्मकर्मक्षमाणां, प्रणमत विनयेनाचार्यबुद्ध्यम्बुराशिम् ॥ २ ॥ शरणमशरणानां धर्मिणां धर्मदायं, सुखदमसुखभाजां वित्तदं निर्धनानाम् । विपदरिवनदावं, कल्पवृक्षं जनानां, भजत भविकलोकाः ? सूरिबुद्ध्यब्धिमाशु ॥ ३ ॥ प्रथयति विपुलार्थं सार्थवाहंव्यनक्ति, प्रकटयतिशिवर्द्धिं मोहमायांभिनत्ति । प्रशमयतिमहाधिं भव्यमूर्त्तिर्यदीया, स्मरत तमनुवेलं बुद्धिपाथोधिसूरिम् ॥ ४ ॥ कविजनमननार्हः काव्यकर्मप्रभावो–विलसति रतिकारी यस्य देदीप्यमानः । जगति जयति दानं दानवारिप्रगीतं, स्मरत मनसिनित्यं सागराचार्यबुद्धिम् ॥ ५ ॥ विगलितमदमानं मानवानाममोघं, ददतमतिसुबोधं बुद्धिमत्सेवनीयम् । कलिमलसुरसिन्धुं सोदरं सत्क्रियाणां, प्रणमत मुनिवर्यं सूरिबुद्ध्यब्धिमीशम् ॥ ६ ॥ सममतिरिरिमित्रे यस्य भातिस्म शस्ता, विरतिरतिविशाला राजतेस्मक्षमायाम् । तमपरभवबोधं ज्ञातसिद्धान्तसारं, भजत भवहरं भो ! बुद्धिपाथोधिसूरिम् ॥ ७ ॥ भवदवजलवाहं कर्मवल्लीकुठारं, शिवसुखसुरधेनुं धर्मबीजाम्बुसेकम् । श्रितजनघनकर्मक्षोणिभृद्भेदवज्रं, प्रणमत मुनिपूज्यं बुद्धिपाथोधिसूरिम् ॥ ८ ॥ पठितमिदममोघं स्तोत्रमेतत्प्रमोदात्, विनयगुणधरेण श्रीगुरोर्भक्तिभाजा । श्रमणसुगुणधाम्ना शिष्यहेमेन्द्रकेण, पठति मनुजवर्यो यः स संपत्तिमेति ॥ ९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# शुद्धिपत्रकम्.

| पत्रम्. | पृष्ठम्. | पङ्क्तिः | अशुद्धिः | शुद्धिः | पत्रम्. | पृष्ठम्. | पङ्क्तिः | अशुद्धिः | शुद्धिः |
|---|---|---|---|---|---|---|---|---|---|
| ४ | १ | ८ | मशद्बं | मशब्दं | २९ | ,, | ११ | स्तोपण | स्तोषण |
| ,, | २ | ९ | धम्मिलो | धम्मिल्लो | ,, | २ | ३ | रययेत | रज्येत |
| ५ | १ | ,, | प्राणीनां | प्राणिनां | ३६ | २ | ९ | कस्मि | कस्मिं |
| १२ | १ | १४ | ऽऽनान्देन | ऽऽनन्देन | ३७ | ,, | २ | विपादा | विषादा |
| १२ | २ | ४ | शुद्ध | शुद्ध | ४२ | १ | १ | स्वकीयं | स्वकीय |
| १३ | ,, | १ | पाला | पाल | ,, | ,, | ७ | शाल | शील |
| १६ | १ | ३ | गाथकाः | गायकाः | ५३ | २ | ,, | भागिनि ? | भगिनि ! |
| २१ | ,, | ११ | ऽदश्य | ऽदृश्य | ५४ | १ | ९ | सहस्त्र | सहस्र |
| २७ | ,, | ६ | स्ता | स्ताः | ५५ | २ | ६ | निंशम्य | निशम्य |

For Private And Personal Use Only

| | | | | |
|---|---|---|---|---|
| ५६ | ,, | २ | केवल्य | कैवल्य |
| ५७ | १ | ,, | मूर्त्तिकः | मूर्त्तिकः |
| ६१ | २ | ७ | वसिनो | वासिनो |
| ६३ | ,, | १० | हट्टं | हट्टं |
| ६८ | १ | ९ | मुद्घात्य | मुद्घाटय |
| ,, | २ | २ | भजन्ति | प्रयाति |
| ७० | १ | ४ | देवाङ्ग | देवाङ्ग |
| ७१ | ,, | ,, | गनन | गमन |
| ,, | ,, | ,, | सङ्केतो | सङ्केतो |
| ७३ | ,, | ,, | लंङ्घ्य | लङ्घ्य |
| ७४ | २ | १ | नङ्क | नङ्ग |
| ,, | ,, | ३ | वर्त्ति | वर्त्ति |
| ७८ | ,, | ८ | व्यज्ञ | व्यञ्ज |
| ८० | ,, | ३ | पुरुप | पुरुष |
| ८१ | ,, | १ | पापाणो | पाषाणो |
| ८२ | १ | ९ | दोप | दोष |
| ८२ | २ | २ | मलाणतो | मत्प्राणतो |
| ,, | ,, | | पुरुप | पुरुष |
| ९२ | १ | ४ | खड्ग | खड्गं |
| ९९ | ,, | ११ | तत्र | स्तत्र |
| १०५ | २ | २ | धर्मं | धर्म |
| १०९ | १ | १४ | घर्षणा | घर्षणा |
| १११ | ,, | ९ | संयोगमिव | संयोगइव |

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ

॥ अर्हम् ॥

॥ शास्त्रविशारदजैनाचार्ययोगनिष्ठाध्यात्मज्ञानदिवाकरपरमपूज्यसद्गुरुश्रीमद्बुद्धिसागरसूरीश्वरपादपद्मेभ्योनमः ॥

॥ तपोगणगगनदिनमणिश्रीमद्-अजितसागरसूरिप्रणीतम् ॥

# ॥ श्रीअजितसेनशीलवतीचरितम् ॥

श्रीमन्तमाद्यं जिनपुङ्गवाना-माद्यं नृपाणां व्यवहारबोधकम् । आद्यं कलाकर्मसु नाभिसूनुं, नमाम्यहं मोक्षसुखैकहेतुकम् ॥ १ ॥
श्रीशान्तिनाथः शिवशर्म्मदाता, त्राता जनानाश्रितपादपद्मान् । पोतायमानो भववार्द्धिगानां, श्रेयःश्रियं सन्ततमातनोतु ॥२॥
शिवाङ्गजातोऽपि शिवप्रदायी, कृष्णाङ्ककोऽपि श्रितभव्यतायी । निर्मूलिताऽनङ्गमदोऽपि सम्मदः, श्रीनेमिनाथोऽस्तु मुदे सतामिह ॥
फणीश्वरोद्दीप्तमणिप्रभाभि-र्भ्राजिष्णुमूर्द्धा कमठोपकर्त्ता । सुरासुरैर्वन्दितपादपद्मः, श्रीपार्श्वनाथः शिवतातिरस्तु ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





यज्ज्ञानभानुः प्रथितः पृथिव्यां, प्रदर्शयत्यात्मसुखस्वमार्गम् । तं देवदेवं जनतातमोहं, श्रीवर्द्धमानं सततं नमामि ॥ ५ ॥
येषां प्रभावः प्रकटः पृथिव्यां, विज्ञानमूलः कृतकर्मनाशः । शेषा अशेषार्थकरा जिनेन्द्रा-भवन्तु वो विघ्नविघातदक्षाः ॥ ६ ॥
सूत्राणि योऽसूत्रयदद्भुतानि, शिश्राय यं लब्धिमणाः प्रशस्तः । आद्यश्च योऽभूद्गणधारकाणां, श्रीगौतमं तं प्रथमं स्मरामि ॥७॥
प्रसादतो यस्य जडोऽपिलोके, विभाति विद्वज्जनसत्समाजे । गुरुप्रभावं गुरुमादिमं तं, स्तवीम्यहं भक्तिभरेण नित्यम् ॥ ८ ॥
विशुद्धपद्मासनसंस्थिता या, वाग्वादिनी व्याप्तजगत्प्रदेशा । जाड्यान्धकारक्षतिकारिणीस्ता-त्सा सर्वदासौख्यकरीसरस्वती ॥९॥
वाचां विलासा विलसन्ति येषां, जगत्यनन्यं रसमर्पयन्तः । विज्ञानिनस्ते हरिभद्रमुख्या-जयन्तुसर्वेष्टकराः कवीन्द्राः ॥ १० ॥
विशदशीलसरोजसुवासितं, मथितदुर्व्यसनव्रततिव्रजम् । अजितशीलवतीप्रथितं परं, चरितमद्भुतकारि तनोम्यहम् ॥ ११ ॥

इदं परमपवित्रमजितसेनशीलवतीचरित्रं श्रोतॄणामनुत्तरं कर्णावतंसं बुद्धिगम्यमुत्सारितपरधर्मवृत्तान्तमतीवविचित्रकथं समस्ति । यस्य चरित्रस्याग्रे सुधालाभोत्साहोऽपि विफलोवर्त्तते । यतोऽयंकथाप्रबन्धः-सर्वज्ञवाक्सुधासिन्धो-रसनिष्यन्द-वाहकः । प्रकाशितोऽस्ति लोकानां, भवदाहप्रशामकः ॥ १ ॥ एवं स्थितेऽस्य ग्रन्थस्य, वाचने श्रवणे तथा । दुर्जनानैव योग्याः स्यु-र्दोषदृष्टिपरायणाः ॥ २ ॥ यतः-स्तुतोऽपि दुर्जनः काव्ये, दोषमेवप्रकाशयेत् । निन्दितस्तुविशेषेण, युक्ता-ऽतोस्यावधीरणा ॥ ३ ॥ अथवा-निन्दायामात्मदौर्जन्यं, स्तवेऽप्यनृतभाषणम् । भवेद्दुर्जनवर्गस्य, ततो युक्ताऽपकर्णना ॥ ४ ॥ ततोऽस्य योग्या लघुकर्मदेहिनो-भव्याभवाम्भोधितितीर्षवःस्युः । श्रुतौ सदासद्गुणवीक्षणोत्सुका, भवन्ति हि प्रार्थनमन्तराऽपि ॥ ५ ॥ अथवा-तेषां निन्दाविधानेहि, महापापं प्रजायते । स्तवोऽपिदुष्करस्तेषां, मादृशैर्जडबुद्धिभिः ॥ ६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किञ्च-अस्तुता अपि तेकाव्ये, पश्यन्तिगुणमञ्जसा। दोषानाच्छादयन्त्येव, प्रकृतिः सा महात्मनाम् ॥७॥ तेषामतोऽभ्यर्थनया न हेतु-र्महाधियः केवलमर्थनीयाः। तेऽस्यप्रबन्धस्यपुरातनस्य, प्रवाचने वा श्रवणे विपश्चितः ॥८॥ तस्माद्भोः सहृदयहृदयाः! कवीनां रसवद्वचो विलासाःसावधानतया श्रवणीयाः। यः कथाप्रबन्धोमधुरो भवति, तस्य रचनाऽपि-हृद्यैवभवति, तथैवतद्वक्तानिपुणमतिरपिश्रोताऽनिपुणोयदि भवेत्तदोभयोःश्रमएवाऽवशिष्यते। उभयोर्नैपुण्ये तु सर्वं समञ्जसमेवविभाव्यते। अथाऽसंख्यातद्वीपसागरमध्यवर्त्ती जम्बूवृक्षोपलक्षितः सर्वोत्कृष्टसम्पदावलीभिर्विराजितः समन्ताल्लक्षयोजनविस्तीर्णः पार्वणचन्द्रवदाकारोजम्बूद्वीपाभिधेयोद्वीपोवर्त्तते। तस्यपूर्वार्द्धभागेचोत्तरकुरुनामक्षेत्रमस्ति, तस्मिञ्जाम्बूनदमयोनिभृतोद्दामभूरिरसोजम्बूतरुर्विलसति, सच जाम्बूनदाख्यसुवर्णेन सर्वतोव्याप्तिमानस्ति, सर्वासुदिक्षुतस्यमनोरमा पद्मवेदिका विराजते। तथैव तस्यमध्यपीठोपरितनभागेप्रमाणतएकयोजनविस्तीर्णोवटवृक्षोविलसति। तस्माद्योजन चतुष्टयोच्चोमणिमयैकोजम्बूवृक्षः समस्ति। तस्यमूलं वज्रमणिमयं, कन्दश्चारिष्टमणिमयः, स्तम्भश्च वैडूर्य्यमणिमयोऽस्ति। स भूरुहोमूलतश्चतुर्गव्यूतिप्रमाणस्तस्यचतस्रः शाखाः क्रोशद्वयविस्तृताः सन्ति। ताश्चपञ्चदशक्रोशप्रमिताउच्चत्वेचायामत्त्वेलस्यन्ते। तदग्रभागेशाश्वतं श्रीसिद्धायतनं विराजते, यस्य रक्षणायाऽनाधिनामा महोन्नतप्रतापःसुरोनित्यंसन्निहितास्तिष्ठति। तस्यजम्बूवृक्षस्यशाखाप्रशाखाः सुवर्णमय्यः पत्राणिचाद्भुतानि वैडूर्य्यरत्नमयानि विभान्ति। सौवर्णोऽयंपादपोयशोऽभिवृद्ध्याऽतीव विख्यातोऽस्ति। यस्य च काञ्चनमयाः पल्लवाः प्रसिद्धिभाजःपुष्पाणि फलानि च सुन्दराणि सदैव शोभन्ते। इत्थं रमणीयवैभवः स पादपः शाश्वततेजःश्रिया प्रकाशते। यस्योपकण्ठेऽन्येनेकेभूरुहाविराजन्ते, तस्मात्तस्य जम्बूद्वीप इति संज्ञा बभूव।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तस्मिन्द्वीपे षट्खण्डविराजितं भरताभिधंक्षेत्रमष्टमीचन्द्रवदाकारंसर्वसम्पद्भिःसर्वोत्तमं वर्त्तते। यस्मिंश्चक्षेत्रेसिद्धाचलाभिधंतीर्थवरिष्ठमलौकिकसम्पद्भिराजितं सिद्धिस्थानंशरण्यजनपावकंप्रवरक्षेत्रं चकास्तितराम्। यत्र च गङ्गासिन्धुनामानौसरितौ चतुर्दशसहस्रापगापरिवारपरिवृतेविद्येते। यस्मिंश्चसार्द्धपञ्चविंशतिरार्यदेशाः सन्ति। इतरेचानार्यादेशाः। यस्य च मध्यभागे विशदवैभवमखिलर्द्धिसमापन्नंविविधवनखण्डैस्तर्जितनन्दनवनशोभं नन्दनपुराभिधं नगरं जगज्जनचेतोहरं जगदेकप्रकाशकं तेजःपुञ्जमिवयथार्थनामाऽभूत्। यच्च सदोपभोग्यभोगसुखशालिविविधवस्तुनिचयसमाकीर्णसर्वजनसन्तापहारकंसुशोभतेस्मप्रत्यहम्। यदीयसौन्दर्यं विलोकितुंस्वर्गिणोऽपि नभोऽङ्गणंविमानवृन्दैर्व्याकुलयन्तिस्म। भूभामिन्या अद्वितीयविभूषणमिवसर्वजनप्रेक्षणीयंकुण्डलीकृतभोगिभोगानुकारिणाऽतीवदृढतरत्रिशालेनाऽभ्रंलिहेनवप्रेणपरितोवेष्टितंयद्वैरिवारैरलक्ष्यंविभाति। यस्य प्राकाराद्बहिर्भागेपाथोधिवेलेवसजलाऽगाधापरिखासमन्ताद्विद्यते, तदुपरिभागेच सुवर्णमणिमयानिकपिशीर्षकाणिविराजन्ते, येनाऽसमयेऽपि विराजमानोवप्रोनागरिकाणां सहस्ररश्मिभ्रमंजनयति। यन्मूर्ध्निप्रतिप्रदेशं महाशतघ्न्यः स्थापिताः शोभामात्रं भेजुः। अन्यैरनुत्तमैरलङ्करणैर्विराजमानस्य यन्नगरस्य वैभवं निरीक्ष्य गरीयस्यपि दशाननगरी स्वसौन्दर्यगर्वत्यागं व्यतनोत्। द्वारिका सर्वसम्पदाढ्याऽपि यदीयलक्ष्मीं विचिन्त्य महोदधौ झम्पापातं व्यधादिव। साक्षादमरगणनिषेव्याऽप्यमरपुरी तु यत्सम्पदमहर्दिवं ध्यायतिस्म। चतुरशीतिविपणीविराजिते चैतस्मिन्नगरे धनदोपमाः सुकृतिनोऽनेके निवसन्तिस्म। दरिद्रजनानां सर्वथा यस्मिन्दरिद्रता दृश्यते। चतुर्भिर्वर्णाश्रमैः सततं यन्नगरं व्यराजत। यस्मिन्कृतनिवासैर्दानिगणैर्महादानी कर्णभूपोऽप्यजीयत। यदग्रे कनकाचलः समग्रधननिधानोऽप्यतीवकाठिन्यं बिभर्त्ति, यत्रास्थितामेधाविनोनरा न किमपि कलङ्कं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भजन्तिस्म, व्यापारिणश्चात्र निवसन्तो विपुलधनवन्तो नीतिमन्तो विलसन्तिस्म। प्रमदाजनव्रातः सर्वाङ्गसुन्दरो निरुपमशोभाऽलङ्कृतो जिनोदितधर्मचर्यानुरक्तचेता व्यलसत्। पौराश्च देवगुरुभक्तिषु भावितान्तःकरणा जिनालयेषु प्रत्यहं दर्शनार्थं संगता बहुविधपूजाभावनादिप्रकारं वितन्वन्तिस्म। प्रतिस्थानं दिव्यशोभाऽलङ्कृतानि महान्ति जिनमन्दिराणि चकासिरे। यानि विलोकमानो नभोमणिः स्वकीयस्यन्दनभङ्गभयाच्छनैः शनैः प्रचलति, यानिच ध्वजपताकाभिः कम्पमानाभिर्देवानाह्वयन्तीवदूरतो दृश्यन्ते। येषु च स्फटिकमयानि जिनबिम्बानि व्यराजन्त। भव्यजनाः सुकृतप्राचुर्याद्विशुद्धमनसः प्रतिमार्चनादिकां सेवां विधाय त्रिकालं निजजन्मसाफल्यं प्रकुर्वन्तिस्म। यस्य बहिः प्रदेशे सर्वतो रमणीयशोभाः सर्वजनप्रमोददायका महोद्याना राजन्तेस्म। यत्र सुस्वादूनि फलानि सुगन्धभाञ्जि प्रसूनानि सुकोमला लताप्रतानाश्चपरितः समुल्लसन्तिस्म। यत्र सदैव गृहीतसान्निध्यो वसन्तमासोऽभिलक्ष्यते, प्रतिवृक्षं परिभ्रमन्तो भ्रमरगणा नितान्तं रसलोलुपा मकरन्दप्रिया मधुरं गुञ्जारवं विदधतेस्म। यत्र चाम्रवृक्षेषु निविष्टाः कोकिला मधुरस्वरं कूजन्तिस्म। विशुद्धजलसंभृतेषु कूपवापीतडागेषु जलजिघृक्षया स्त्रीसमूहा नवयौवनाढ्या मूर्द्धसु धृतसुवर्णकलशा विविधभूषाभिः परिष्कृतावयवा राजवर्त्मनि गमनागमनं कुर्वतेस्म, एवं भूरिशोभापात्रं नन्दनपुरनगरं सर्वजननन्दनं प्रशास्त्यरिमर्दननामा भूपतिरनेकगुणरत्नमहोदधिः प्रजापालनदक्षः स्वप्रतापेन निर्जितवैरिवारो दिगन्तेषु विस्तृतकीर्त्तिः। प्रत्यहं सकलभूपतयो निहितप्राभृता युष्मवनिनाथं प्रणेमुः। शिरासि न्यस्ताञ्जलिपुटा नानोपहारदायिनोऽसिपत्रवदाज्ञाधारिणोऽन्ये क्षत्रकुलोद्भवा भूरिनृपतयस्तच्छरणं प्रापुः। यदीयं शासनमप्रतिहतं सर्वस्मिन्देशे प्रवर्त्तते। संख्यातीतानि ग्रामनगराणि प्रशास्ति सः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





आषाढवारिवाहभ्रमविधायिनो हस्तिगणाः, प्रभञ्जनध्येयजवना वाजिराजाः, अभिन्नवृत्तयः संभावितकीर्त्तयः स्वाम्येककार्यकरणेषूद्यताः पदातिव्राता अनेकशस्तस्य बभूवुः। तस्मिँश्चनगरे प्रभूतधनवन्तो व्यवहारिणः सन्मतमतिशालिनस्तस्थुः। तेषामग्रणीर्गुणगणराजितमूर्त्तिः सर्वसम्पत्तिमान्, बुद्धिमहोदधिर्दयादाक्षिण्यतितिक्षासमन्वितो लब्धप्रमाणपत्रः प्रशान्तकषायो जितारिषड्वर्गो जैनधर्मानुरक्तो विहितानेकलोककार्यः सतांमान्यो लब्धराजप्रसादो नृपदत्तग्रामादिवैभवशाली रत्नाकरनामधेयो विदांवरः श्रेष्ठिप्रवरः समभूत्। तस्य सद्गुणधारिणी पतिसेवायामुत्सुकमनाः सदा मनोरमा सुशीला निजभर्त्तुराज्ञानुवर्त्तिनी साक्षात्क्षिरोदतनयेव श्रीनामा पत्नी बभूव। सा च नागवल्लीदलवच्छुभगुणैः सर्वेषां माननीयाऽभवत्। योग्यसम्बन्धभाजोस्तयोर्दम्पत्योः संसारसुखंभुञ्जानयोरानन्दक्षीरोदधौनिमग्नयोः कियान्कालोव्यगमत्। परं तयोः पुत्रप्राप्तिरूपं संसारसुखं केवलं नाऽभूत्। तदा तेन श्रेष्ठिना सकलर्द्धिसंजुष्टं सर्वसुखदं स्वान्तःपुरं विकसितप्रसूनं शरवणमिव निष्फलं व्यचिन्ति। यतः—" मूर्खस्य हृदयं शून्यं, दिशः शून्या अबान्धवाः। अपुत्रस्य गृहं शून्यं, सर्वशून्या दरिद्रता ॥ १ ॥ यथा यथा नश्यति यौवनश्रीस्तथा तथा तस्य मनोभिलाषः। सन्तानदुःखानलतापितस्य, धर्मात्मनो निष्फलतामवाप ॥ २ ॥ वन्ध्यतादोषश्च स्वचेतसि स्वयं चिन्तयामास। विषयोपभोगजन्यसुखेष्वपि तस्य मनोऽभिलाषा क्षीणतामगात्। सहस्रजनपरिवेष्टितोऽपि सहायशून्यइवसोऽलक्ष्यत, चक्षुष्मानपि पदार्थाऽवलोकने पराङ्मुखः सकलजनस्याधारभूतोऽपि सनिराधारमिव सन्तानविहीनः स्वममन्यत। तथैव तत्पत्नी श्रीरपि पुत्रचिन्तामकार्षीत्। अथैकस्मिन्दिने सन्तानदुःखदुःखिता शोकनिमग्नमानसा वामहस्ततलेनिहितभालदेशा सा भामिनी यावदस्थात्, तावत्तत्प्रासादं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रत्नाकरश्रेष्ठी जगाम। सुकोमलायां महार्घ्यसंस्तरणसमाच्छादितायां मनोहारिण्यां शय्यायां निषण्णां विलपन्तीमश्रुधारा विललोचनां नीहारावृतां शशाङ्कलेखामिव मलिनवदनारविन्दकान्तिं तां श्रियं स व्यलोकत। तदीयो दासीगणः पटुमतिः समन्तात्ससंभ्रमं सेवापेक्षी विज्ञातस्वामिनीशोककारणश्चिन्तानिमग्नस्तब्धोऽजनिष्ट। सर्वेऽप्यन्तःपुरवासिनस्तुष्णीमवतस्थुः। कञ्चुकिनोध्यानारूढमनस इव स्थगिताः सङ्कुचितावयवास्तां सिषेविरे। ईषद्दूरस्थितास्तदन्तःपुरवृद्धस्त्रियस्तामाश्वासयन्तिस्म, समन्तादविरलाश्रुपातेन तस्याः परिहितवसनमार्द्रमजनिष्ट, सर्वाण्यलङ्करणानि चाङ्गोपाङ्गेभ्यः परित्यक्तानि तया। अबद्धामूर्द्धजा इतस्ततो मुखश्रियमाच्छाद्य व्यकिरन्। यतः—"अपुत्रकाणां गृहिणां मनांसि, चिन्ताऽनलार्चिर्दहति प्रकामम्। गृहाश्रमः सन्ततिमूल एव, प्रशस्यते सर्वजनोपकारी ॥ १ ॥ अतः शून्यभावमभिव्यञ्जयन्तीम लघुशुचार्दितहृदयां गाढतरं निःश्वसन्तीमशब्दं रुदन्तीं दैवजन्यदुःखपरम्परानुभवं परिशीलयन्तीमिव व्याकुलितचेतसं स्वप्रियां सादरं संप्रेक्ष्य यावद्रत्नाकरस्तदन्तिकमियाय, तावत्सा स्वस्वरंपतिगुणगौरवाकृष्टमानसादीव्योपधानशय्यासनतः समुत्थाय कृताञ्जलिपुटा तं प्रणनाम। ततस्तदपध्यानशृङ्गारूढां तादृगवस्थां तां प्रेक्षमाणोरत्नाकरः प्रोवाच–प्राणवल्लभे? किमिदमकालेशोकोत्पत्तेः प्रयोजनम्? शारीरिकाव्याधयस्तुस्वप्नेऽपित्वया नपरिचीयन्ते, तच्चिकित्सकानां धन्वन्तरिजन्मजुषां बाहुल्यात्। मानसिकाश्चाधयोऽपिविशोषितसर्वाङ्गसत्त्वा नैवाऽवकाशंलभन्ते, पुरार्जितपुण्यवैभवेनमनसाऽप्यगम्यमहिम्नां वस्तुजातानां सुलभत्त्वात्। दैवजन्योपाधिरपिप्रायोनोपसम्भाव्यते, यतस्तादृशानिकर्माणि न विहितानि। अथवा न जानेपूर्वार्जितान्तरायः स्याद्यदीत्थंतांपृच्छन्सश्रेष्ठी तदधिष्ठितशय्यायामुपविष्टः, तस्या अश्रुपातकारणमजानानः स किञ्चिदस्वा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स्थ्यमवाप। स्वकराब्जेन तत्कपोलसंलग्नानश्रुबिन्दूनसंमार्जयन्पुनरवदत्-प्रिये ? अन्तःकरणस्यप्रबलशोकाऽतिरेकान्मन्दमन्दं निःशब्दंरोदनं किमर्थंकरोषि ? पश्य ? इमास्तवपद्मपङ्क्तयोमौक्तिकानीवाश्रूणि ग्रथ्नन्ति, अयि ! कृशोदरि ! नानाविधान्याभूषणानिकथं न धृतानित्वया ! तन्वङ्गि ? लोहितपद्मायमानचरणयोः प्राभातिकार्कक्रान्तिवदलक्तकरसः कथं न सिञ्चितः ? तव चरणकमलेऽद्यमनोभवसरसिकलहंसवदाचरन्मणिमयनूपुरयुगलं कथं न स्पृशति ! प्राणप्रिये ! मनोहरस्तेकटितटः किमर्थं रत्नकाञ्चीविरहं निषेवते ? शीतांशौमृगचिन्हमिवकृष्णागरुचन्दनस्यपत्रविभ्रमः पङ्कजकोशयोरिवगौरपयोधरयोः कथं न दृग्गोचरीभवति ? कम्बुकण्ठि ! शितिकण्ठभालसंस्थितचन्द्रकलानुकारिणींग्रीवांगङ्गाप्रवाहोपमहारावल्याकुतोनविभूषयसे ? विलासिनि ? कथं त्वयाऽद्यबह्वश्रुजलाभिपातेनकपोलभित्त्योः कुङ्कुमरागोनिष्कारणंप्रक्षालितः ? सुकोमलाङ्गुलीकरणिकासुशोभितशोणकरकमलंकर्णपूरमिवकथमवधारितम् ! गौरचन्दनोज्झितललाटपट्टोपरिसंस्थितकेशराजिः कथंनसमीचीनीचक्रे ! मृगलोचने ! मृगाङ्ककलाहीनकृष्णपक्षप्रदोषवदयंतवश्यामतररुचिस्त्यक्तसितप्रसूनोधम्मिल्लोममलोचनयोः खेदमुत्पादयति। तस्मात्प्रसादंविधाययत्किमपिदुःखनिदानंसद्योमेब्रूहि। मृगनयने ! तववक्षोजस्थगितंसूक्ष्मांशुकंधुन्वन्दीर्घतरोच्छ्वासवायुर्ममनवपल्लवमिवसरागंहृदयं वेपयति। तस्माद्वद किं मयाऽजानताऽपराधोविहितः ? वा मदीयः परिजनस्तवविरुद्धत्वं किं समाचरत् ! मयाऽथवाऽन्यपरिजनैस्त्वत्सम्बन्धीविरुद्धाचरणलेशोऽपि नैवाचरित इतिसत्यंमेप्रतिभाति। ममप्राणधनानिचान्यत्सर्वंत्वदायत्तानिविजानीहि। चारुभाषिणि ? शोकहेतुंनिवेद्य मां स्वस्थीकुरु। इत्थंसाग्रहंपृष्टाऽपिसाशोकार्त्ताप्रत्युत्तरंनादात्तदा स वणिग्वरोबह्वश्रुपातप्रयोजनं तस्यादासीवर्गंपृच्छतिस्म। ततः कमललतानाम्नी तद्दासीश्रेष्ठिवचनंनिशम्यप्रोवाच-महेभ्य ! भवतोलघुरप्य-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पराधोऽस्मिन्विषयेनैवसम्भाव्यते, सर्वशक्तिमतित्वयिविद्यमानेकश्चिदप्यन्यः परिजनोऽपराद्धुं कुतः समर्थोभवेत् । परन्तु क्रूरस्य-कस्यचिन्महोग्रग्रहस्यपीडया वा दुर्दैवयन्त्रेणममस्वामिनः समागमोनिष्फलोजायते, यतः संभोगजन्यं यत्फलंतन्नैवाहंलभे, इति प्रत्यहं मत्स्वामिन्याश्चेतासिचिन्तावर्त्तते। भूरिकालाच्चैवंसन्तापपरम्परामसावनुभवति। तथाप्यद्यपर्यन्तं भवतोहृदयपीडां निवार-यितुं किञ्चिदपिनिजमनोव्यथां न प्रदर्शयाति। परन्त्वस्मिन्दिनेतयाकिमेतादृशंकिञ्चिद्विलोकितम्? किंवात्रदान्यजनमुखात्किञ्चि-च्छ्रुतंवास्वयमेववाचिंतितद्द्वयं न जानीमः। सर्वपरिचारिका वयं नामं नामं तां प्रार्थयामस्तथाऽपि सा भोजनं न करोति, भोजन-समयोऽपिव्यतीतः। आभूषणान्यपिनाङ्गेपरिधारयति, प्रत्युत्तरमपिनो ददाति, केवलमविरलाश्रुबिन्दुदुर्दिनेन मुखाम्बरमन्ध-काराच्छादितंविधाय सा रोरुद्यते। इदानींभवतामाज्ञेतिनिवेद्य सा तुष्णींतस्थौ। ततोरत्नाकरःश्रेष्ठीकञ्चित्कालं विश्रम्यदीर्घतरं निःश्वस्यमुखश्रियंम्लापयन्नुवाच–प्रियवादिनि! दैवायत्तेऽस्मिन्कार्ये नास्त्यस्माकमुपायः, अलमतिशोचितेन, भवितव्यतयैव प्राणीनां शुभाऽशुभमुपजायते। यतः–यद्भाव्यं तद्भवत्येव, नालिकेरफलाम्बुवद्। गन्तव्यंतत्प्रयात्येव, गजभुक्तकपित्थवद् ॥१॥ आवयोरुपरिदेवतानां तादृशोऽनुग्रहोनैवविद्यते, किंवा पितृदेवा अस्मत्पराङ्मुखाःसंभाव्यन्ते, कुलदेव्याश्चमन्दप्रसादोऽ-नुमीयते, येन पुत्रालिङ्गनसुधास्वादस्यसुखमावयोर्हृदयस्यदुर्लभमस्तीति विज्ञायते। प्राक्तनजन्मनि चैतादृशंसुकृतमस्माभिर्नो-पार्जितम्। यैःप्राणिभिः पूर्वजन्मनि यादृशंकर्मविहितं तादृशंफलं प्रेत्य तेऽवशा लभन्ते। यतः–कविरहस्ये–पूर्वजन्मनिय-त्कृत्यं, विहितंयच्छुभाऽशुभम्। तत्तदेवनरोलोके, ह्यवशोलभतेऽनिशम् ॥ १ ॥ तस्मादनेकेषुप्रयत्नेषुकृतेष्वपिदैवनियोगोऽन्य-थाकर्तुनशक्यते। उक्तश्च–पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किं, नोलूकोऽप्यवलोकते यदि दिवा सूर्यस्य किं दूष-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





णम्। धारानैव पतन्ति चातकमुखे मेघस्य किं दूषणं, यद्धात्रा निजभालपट्टलिखितं तन्मार्जितुं कः क्षमः ? ॥१॥ येनाञ्चलेन सरसीरुहलोचनाया-स्त्रातः प्रभूतपवनादुदयेप्रदीपः। तेनैवसोऽस्तसमयेऽस्तमयंविनीतः, क्रुद्धे विधौ भजति मित्रममित्रभावम् ॥२॥ तथाऽपि मनुष्यजातेर्यावत्कर्त्तव्यमस्ति तावद्विधेयंश्रद्धालुतया। भामिनि ! गुरुजनेष्वधिकाभक्तिस्त्वयाविधीयताम्। जिनेश्वरस्य पूजनं सर्वेष्टप्रदं भावतया विधिपूर्वकं प्रत्यहं क्रियताम्। जीवरक्षा च निजोपयोगतया विधातव्या, दीनेभ्यो दानं वितीर्यताम्, महाव्रतधारिणां साधूनां साध्वीनाञ्च शुश्रूषायां मनोऽभिलाषाऽधिकतरा प्रकटीक्रियताम्। यतो यस्योपरिनृपस्यानुग्रहस्तस्मिञ्जने मन्त्र्यादयः सर्वे प्रसन्ना भवन्ति। यथा कृष्णवासुदेवो देवस्याराधनां विधाय स्वमातुर्देवक्या गजसुकुमालपुत्रमदापयत्। अभयकुमारश्च देवताया आराधनयैव धारिणी राज्याः असमये जीमूतदोहदमपूरयत्। कृष्णः पुनर्देवोपासनाबलाल्लवणसमुद्रं प्रतीर्य धातकीखण्डं ययौ। तस्माद्देवानाम्माहात्म्यमलौकिकमस्ति, अतस्तेषामाराधनं विहितञ्चेत्ते देवा अचिरेण संतुष्टा यथेष्टं फलमतिदुर्लभं वरञ्च प्रयच्छन्ति, महात्मनां सेवाऽमोघफलं जनयते। इत्थं स्वप्रियामाश्वास्यस्वयंविचिन्तयति—रे दैव ! मद्भार्यामहं प्रफुल्लगर्भभारोद्वहनान्मन्थरगमनां शरीरकार्श्यादसमग्रविभूषणां लोध्रकुसुमवद्गौरतरांमुखशोभामाकलयन्तीं पौर्णमासीनिशामिव कदा विलोकयिष्ये ! ननु पुत्रजन्ममहोत्सवस्यामन्दानन्दे निमग्नोऽहं सूनुजन्माक्षरामृतदायिभ्योऽन्तःपुरवासिभ्योऽपरिमितं तुष्टिदानं कदा समर्पयिष्ये ! बालतृणोपमहरितवस्त्राणि परिधाय निजोत्सङ्गे सुतं निधाय प्रफुल्लवदनारविन्दा सा प्रियपत्नी शुभासनंसमारूढा समुदितेन तिग्मांशुमण्डलेन पीतकान्तिप्रसरा दिगङ्गनेव कदा मामानन्दयिष्यति ? । सर्वाभिरौषधिभिः सुरञ्जितजटीभूतकेशो रक्षाकृते तालुस्थि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तद्घृतबिन्दुशुक्लसर्षपमिश्रकिञ्चिद्विभूतिगोशीर्षचन्दनेनेषद्रक्तकण्ठसूत्रग्रन्थिर्मञ्चिकायामुत्तानशयोनिर्दशनमुखाम्भोजेनमन्दंमन्दं हास्यं कुर्वंस्तनयो ममहृदयमानन्दभाजनं कदा विधास्यति ? गोरोचनावल्कपिशकान्तिः पुनःपुनरन्तःपुरपुरन्ध्रीणां करकमलैःसञ्चार्यमाणःसकलजनवन्दितो मङ्गलप्रदीपइव शिशुरन्धकारावृते मच्चक्षुषी कदा प्रकाशयिष्यति ? भूमिविलुठनेन रजोभिर्धूसरिताङ्गो बालो मे हृदयं नेत्रे च संहरन् रिङ्खमाणोऽस्य भवनाङ्गणस्य शोभां कदा वर्द्धयिष्यति ? चरणावपातगमनानन्तरं सिंहशिशुरिव मणिमयभित्तिषु दृश्यमानानां मृगबालानां रचितानामिव बन्धनाय परितो मद्दृष्टिगोचरं कदा धाविष्यति ? हंसगामिनीनामन्तःपुरस्त्रीणां नूपुराणां नादं समाकर्ण्य ता अनुव्रजन् गृहाभ्यन्तरे प्रधावन्बालः सुवर्णकटिमेखलायाः किङ्किणीनां मधुरनादमादधानां धात्रीं कदा व्याकुलयिष्यति ? परिषदि निषण्णं सपरिवारं मां श्रीमद्भिः प्रसारितकरकमलैः सभ्यजनैः पुनःपुनर्ग्रहीतुमिच्छद्भिरभिनन्द्यमानो बालो महार्घ्यमणिभूषातेजोभिर्व्याहृतदृष्टिप्रसारः परितोरममाणो मदन्तिकमागच्छन्कदामामालिङ्गिष्यति ?। इत्यनेकशो मनोरथपरम्परां विचिन्तयतो हृदिखिद्यमानस्य तस्य कष्टप्रदायिनोवासरा व्यतियन्ति। पुनः सचिन्तयति, अस्या वन्ध्यतायाःशोकोमामपिरात्रिन्दिवमग्निवद्दहतितराम्। सर्वसमृद्धिसम्पन्नं जगदिदं शून्यमिव मे भासते। इदं सकलं धनधान्यारामप्रासादहट्टादिकं निरर्थकमिव मे नरोचते, परं विधातुरग्रे मानवसामर्थ्यं कियन्मात्रमतोऽस्माकमस्मिन्कार्ये कश्चिदुपायोनविद्यते। प्रियवल्लभे ! इमं सन्तानशोकं परित्यज्य धैर्यञ्चावलम्ब्य सद्धर्मसमाचरणेऽमोघां मेधां समाधत्स्व। यतः—" सद्धर्मवृक्षः किल भाववारा, सेसिच्यमानो नितरांजनानाम्। परत्रचामुत्रफलानि लोके, ददात्यसौ सर्वसुखप्रदानि ॥ १ ॥ कल्याणसम्पत्तिरजस्रमेति, सान्निध्यमाराधितधर्मकर्मणाम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कियद्धि तेषामिहलोकसङ्गतं, शुभार्थिनस्तच्छुभकर्मसक्ताः ॥ २ ॥ इति तां प्रबोध्यजलमानाय्य तेन सुकोमलेनकरपल्लवेन श्रेष्ठिन्या अश्रुधाराभिर्मलीमसं वदनाम्भोजं स्वेनैवामार्जि । ततस्तच्छोकशङ्कुदूरीकरणार्थं चाटूक्तिभिर्बहुशस्तां वार्चयन्मुहुर्मुहुराश्वास्य रत्नाकरइभ्यस्तदन्तिकात्स्वस्थानमियाय । अथ श्रेष्ठिपत्नी श्रीमन्दीभूतेशोकप्रस्तावेस्वोचिताऽलङ्कारान्यथार्हाण्यंशुकानिच परिदधती दिनकृत्यानि यथार्हं समाचचार, प्रतिदिनं जिनेन्द्रपूजां भावतो विदधातिस्म, यतिचर्यायां परायणा सा सत्पात्रमुपलभ्य निजसम्पत्तिं दानव्ययेन सफलयामास । सकलं समयं सा धर्मकृत्येष्वेव व्यनैषीत् । रत्नाकरः श्रेष्ठ्यपि निरन्तरं सप्तक्षेत्र्यां नीत्युपार्जितं निजं द्रव्यं वपतिस्म । विशुद्धभावेन कल्पपादपोपमां जिनप्रतिमां प्रत्यहं पूजयति स्म, एवं धर्माराधनं नित्यं कुर्वतोस्तयोर्दम्पत्योर्वासराण्यगमन् । अथाऽन्येद्युर्निशि शयानः किञ्चिज्जाग्रन्निद्रावस्थो रत्नाकरो निजचेतसीति विचारयामास । अस्मान्नगराद्बहिरुद्याने श्रीमदजितनाथस्य भगवतो मन्दिरं विराजते, प्रभाते तत्र गत्वा प्रभुपूजां विधाय सद्भावनां करोमिचेन्ममकार्यसिद्धिर्ध्रुवं प्रजायेत । एवं चिन्तयति तस्मिन्सा रात्रिर्व्यतीयाय, सूर्योऽप्युदयाचलचूलां दिगन्तराणि दिदृक्षुरिव समारूढः, प्राचीदिशा पितवर्णा बभूव । यतः—

अभूत्पिङ्गा प्राची, रसपतिरिव प्राप्य कनकम्, गतच्छायश्चन्द्रो–बुधजन इव ग्राम्यसदसि ।
क्षणं क्षीणास्तारा–नृपतय इवाऽनुद्यमपराः, न दीपा राजन्ते, द्रविणरहितानामिव गुणाः ॥ १ ॥

विदितप्रभातसमयो रत्नाकरः शय्यातः समुत्थाय नमस्कारमन्त्रं स्मृत्वा मज्जनगृहान्तः प्रविश्य प्रसाधितस्नानक्रियः शुद्धवसनानि परिधाय सर्वाणि पूजनार्हाणि महार्घ्याणि वस्तूनि समादाय नगराद्बहिर्वाटिकायां श्रीजिनालयमगमत् ।



For Private And Personal Use Only

तद्द्वारप्रदेशेऽजितबलादेव्याः सुरूपाप्रतिमास्ति, महाप्रभावशालिनीं समग्रजनेषु विदितैश्वर्यां सर्वबाधोपघातिनीमेतां विज्ञाय प्रमुदितः स श्रेष्ठी मन्दिरान्तः प्रविश्य प्रभोः पूजां यथाविधि भावतोऽकार्षीत् । ततो बहिरागत्याजितबलां देवींसंपूज्य पुत्र प्राप्त्यर्थं प्रत्याख्यानपूर्वकं विहितोपवासः स श्रेष्ठी प्रार्थयामास–देवि ! प्रसीद ममशान्तिकरं गुणज्ञं, देहि प्रभाकरनिभं भुवनेश्वरि ! त्वम् । सूनुं समाश्रितजनं न हितर्जयन्ति, दीव्यप्रभावकलिता ललितस्वभावाः ॥ १ ॥ ततः सा देवी प्रसन्नीभूय तस्मै पुत्रवरं प्रादात् । अहो ! पुण्यस्यमहिमा, नहिमाति जगत्रये । चिन्तामण्यादयोऽमी यत्–सेवकस्याऽपि सेवकाः ॥१॥ किञ्च–लक्ष्मीमानयति प्रियं प्रथयति प्रत्यूहमुन्मूलति, द्वन्द्वे द्विष्टबलं पिनष्टि हरति व्याघ्रादिभूतं भयम् । कान्तारे सह बम्भ्रमीति दिविषद्वर्गं विधत्ते वशं, पुण्यं पुण्यवतां न किं वितनुते प्राचीनमूर्जस्वलम् ॥२॥ तथाच–अत्युत्कटात्पुण्यपापा–दिहैव फलमश्नुते । क्रिया फलति कालेन, बहुधाऽपि कृता नरैः ॥ ३ ॥ शुभकर्मोदयः स्याच्चे–ज्जनानां शुभकर्मणाम् । तत्कालं फलमाप्नोति, धर्मकार्यविधानतः ॥४॥ पुनः सा देवी जगाद–भोः श्रेष्ठिन् ! त्वं सुखेन गृहं प्रयाहि, तव मनोऽभिलाषाः सफला-भविष्यन्ति, इति देव्याः सुधासोदरां गिरं निपीयप्रमुदितमनाः श्रेष्ठी प्रभुं वन्दित्वा देवीवन्दनञ्च पुनर्विधाय स्वस्थानं जगाम। गृहंगत्वा निजभार्यां प्रत्यवदत्–भगवतोऽजितनाथस्य प्रसादेनाद्याऽजितबलाख्यदेव्याऽस्माकं दुःखं दूरीकृतम् । पीयूषप्रख्यमेतद्व-चनं सादरं समाकर्ण्य सा प्रभूतप्रमोदमाबभार। ततः सा निजभर्त्तारं सर्वं तद्व्यतिकरमपृच्छत्–श्रेष्ठिना देवीवरप्रदानादिकं सकलं वृत्तान्तं सविस्तरं तस्यै न्यवेदि । अथ तौदम्पती मोदमानमनसौ संसारसुखमन्वभूताम्, तथैव दानपुण्यं परिशीलयतोस्तयोः प्रभुपूजादिधर्मध्यानेनैव सकलः समयो व्यत्यगात्। इतोऽन्यदा सा श्रेष्ठिनी नानाचित्रचित्रिते मनोहरे शयनभवने सुकोमलायां

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





शय्यायामस्वाप्सीत्, किञ्चिन्निद्रायमाणा सा नभस्तलादवतरन्तं सकलकलासम्पूर्णं शशाङ्कं स्वमुखे प्रविशन्तं संप्रेक्ष्य विगतनिद्रासमभूत्। अनेकधा सा तत्स्वप्नस्वरूपं स्वयंविचारयामास। ततः सा पादपीठिकायां पादौनिधाय शयनासनतः समुत्तीर्य सर्वाङ्गेषु परिहितवसनाभरणा नातिशीघ्रगमना नातिमन्थरगतिःकलहंसीगतिमनुकुर्वन्ती निजभर्त्तुः शयनगृहं स्वकान्तिभरेण प्रकाशयन्ती जगाम। निद्राधीनं निजभर्त्तारं विलोक्य सा श्रोतॄणामानन्दसन्दोहदायकैर्बह्वर्थबोधकैर्लघ्वक्षरैरधरीकृतसुधास्वादैर्मधुरवाक्यैर्विबोधयन्ती तत्पादारविन्दस्पर्शनेन विनिद्रं चकार। समुत्थितेन स्वस्थचेतसा श्रेष्ठिनाऽऽकास्मिकं तदीयमागमनं विज्ञाय सन्मुखस्थिते विष्टरे स्थीयतामित्याज्ञप्ता सानिषसाद। मार्गागमनश्रमं शनैः शनैः सा व्यनैषीत्। ततः श्रेष्ठी मधुरवाण्यातामपृच्छत्–शशिवदने ! अनामयं ते वर्त्ततेकच्चित् ? इदानीमत्रागमने किं प्रयोजनं तत्सत्वरं निवेद्यताम्। श्रेष्ठिन्यवदत्–स्वामिन् ? अद्यनिशायां सुखशय्यां निषेवणाया मम मुखे प्रविशन्तं निशाकरं स्वप्ने विलोक्य जागरिताऽस्मि। अस्यस्वप्नस्य कीदृशं फलं भावि तत्कथय, विज्ञाततत्सारः श्रेष्ठी कञ्चित्कालं विचार्य प्रोवाच–सुन्दराङ्गि ! त्वया प्रशंसनीयं स्वप्नमदर्शि, तच्च भूरिफलप्रदं विज्ञायते, मङ्गलमालाजनकं मनसाऽप्यगम्यलाभोत्पादकं सुखसम्पत्तिविधायकं पुत्ररत्नप्रदायकश्चेदं स्वप्नमस्ति। इति निजस्वामिमुखान्निःसृतां गिरं निशम्य हृष्टा सती श्रेष्ठिनी जगाद–स्वामिन् ? भवदुक्तिस्तथैव सत्या जायतामितिनिगद्य सा तत्स्थानान्मन्थरगतिर्निजप्रासादमभिगम्य सखीभिः सार्द्धं वार्त्तालापं वितन्वन्ती ज्ञानध्यानपरमात्मस्तुतिपाठेन च शेषांनिषांव्यनैशीत्। प्राभातिकः समयोऽजनि—व्रजति विषयमक्ष्णामंशुमाली न याव–त्तिमिरमखिलमस्तं तावदेवाऽरुणेन। परपरिभवि तेजस्तन्वतामाशुकर्त्तुं, प्रभवतिहि विपक्षोच्छेद-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मग्रेसरोऽपि ॥ १ ॥ नवकुमुदवनश्रीहासकेलिप्रसङ्गा–दधिकरुचिरशेषामप्युषां जागरित्वा । अयमपरदिशोऽङ्के मुञ्चति स्रस्त- हस्तः, शिशयिषुरिव पाण्डुं म्लानमात्मानमिन्दुः ॥ २ ॥ ततो रत्नाकरेण निजदूतान्संप्रेष्य स्वप्नवेदिनः समाहुतास्तेऽपि श्रेष्ठिनो निमन्त्रणं स्वीकृत्य सत्वरं विहितस्नानादिक्रिया विशुद्धवस्त्राभरणानि परिधाय करस्थितपुस्तकाः सहर्षाः श्रेष्ठिनो- गृहं समाजग्मुः । इतः श्रेष्ठिनाऽपि निजसेवकैः सभास्थानं समलङ्कारितम्, यथायोग्यमासनादि सकलसामग्री च प्रगुणी- कारिता । अन्तःपुराङ्गनानामुपवेशनाय समुचितं पृथक्स्थानं परिकल्पितमस्ति । तदनु रत्नाकरः श्रेष्ठी विहिततैलाभ्यङ्ग- पूर्वकस्नानविधिर्विशुद्धवसनयुगलं परिधाय प्रभोः पूजां विधाय निजनिकेतनंसमागत्य सभोचितवस्त्राभरणैर्विभूषितगात्रः सभास्थानमुपाविशत् । तत्पत्न्यपि निर्वृत्तप्रभुपूजनादिसत्क्रिया करकमलाभ्यांगृहीतश्रीफला स्वोचितस्थानमभूषयत् । ततः स्वप्ननिवेदका योग्यस्थानस्थिताः श्रेष्ठिना सत्कृताः, तथैवाऽन्येऽपिजनाः स्वोचितस्थानानि भेजुः, सर्वेसभ्यजनाः स्वप्नफल- श्रवणेच्छया कौतुकिनस्तुष्णीं तस्थुः । ततो रत्नाकरः श्रेष्ठी सविनयं रचिताञ्जलिः स्वप्नपाठकानपृच्छत्–भो वैज्ञानिकाः ! अस्यां गतविभावर्यां स्वप्नावस्थामनुभवन्ती श्रेष्ठिनी स्वमुखे प्रविशन्तं कुमुदबन्धुमपश्यत्, तस्य किं फलं भविष्यतीतिस्फुटं ब्रूत, यथा सर्वेसभासदः शुद्धान्तस्त्रियश्चभवतां मुखेनैवशृण्वन्ति तथाविधीयताम् । ततः स्वप्नपाठकाः स्वस्वप्रज्ञानुसारेण तत्फलं निश्चित्य मिथोमन्त्रयित्वा तेषां मुख्यश्चैकः पाठकोऽवदत्–श्रेष्ठिन् ! अस्य स्वप्नस्य फलमत्युत्तमं वर्त्तते, सर्वदा सर्व सम्पन्निदानं शर्मप्रदाने चिन्तामणिसमप्रभावमेतद्विभाव्यते । अस्मादेव स्वप्नात्त्वत्कुलप्रदीपकः सकलगुणसम्पदाढ्यस्तवपुत्रो भविष्यति । इत्थं नैमित्तिकमुखान्निर्गतामक्षरश्रेणिं समाकर्ण्य तौ दम्पती रोमाञ्चितगात्रौ समजनिषाताम् । ततः स्वप्नपाठकान्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





भूरिदानैः सन्तोष्य स व्यसर्जयत् । अथ कियत्सु दिनेषुगतेषु शुभमुहूर्त्तोपलक्षितेसमये स्वच्छचेतसस्तत्पत्न्याः श्रियः कुक्षौ कृतपुण्यः कश्चिज्जीवोदिवश्च्युत्वा निर्मलजलसंभृतेसरसिशशाङ्कबिम्बमिव स्वातौ सागरशुक्तिकायां मौक्तिकमिव गर्भतया प्रादुर्बभूव। सगर्भः शुक्लपक्षीयश्चन्द्र इव दिनेदिनेवृद्धिंपुपोष ततः साश्रीः कृशशरीरावयवा समग्रभूषणान्यधारयन्ती लोध्रसुमवत्पाण्डुवदनच्छविर्विरलतारकश्रीर्विभातकल्पाशर्वरीवाभिलक्ष्यतेस्म। क्षीरोदधिजलहारिणी मन्थरगतिमेघमालेव गर्भभारेणमन्दसञ्चारा साऽभवत् । पुनःपुनर्जृम्भमाणा किञ्चिन्निमीलितनेत्रकमला किञ्चिन्निःश्वसन्ती सा श्रान्तदेहेवाऽदृश्यत, सुधाकल्पेष्वपि सुस्वादुपदार्थेषु सा मनोऽभिलाषंनाकार्षीत् । केतकीकुसुमवदङ्गलतिकां नूतनजलधरवच्छ्यामीभूतपयोधरचूचुकां तांविलोक्य परेङ्गितज्ञाननिपुणमतिस्तद्दासीगणः सगर्भां कलयामास । तासु सर्वासु प्रधानपदमारूढा, सदा श्रेष्ठिकुले निवासतया सर्वकार्यविधानेऽतिदक्षा, सततपरिगृहीतश्रेष्ठिनीसान्निध्यात्प्रगल्भतरबुद्धिवैभवा, सकलमङ्गलकर्म्मनिर्माणेपटुतराप्रियदर्शनाख्यैका वृद्धपरिचारिका तदन्तिकेन्यवात्सीत् । अथाऽन्यदामङ्गलमये प्रभातसमये रत्नाकरः श्रेष्ठी निजास्थानमण्डपेसमुपविष्टः । यस्याङ्गरागेण सुगन्धितादिग्विभागा बभूवुः, परितः प्रसारिणा यदीयतेजसाक्षीणप्रभा इव दीप्राअपि तैलदीपाः सहस्रशोज्वलन्तिस्म। ज्योतिश्चक्रमध्यवर्त्ती शारदेन्दुरिव सहस्रफणिमणिगणानाम्मध्ये संस्थितो नारायण इव स विरराज। तदानीमन्येऽप्यवसरज्ञा व्यवहारिणस्तत्रसमागत्यस्वोचितस्थानेष्वस्थुः । परिजनवर्गः किञ्चिद्दूरतस्तस्थौ, स्वसमीपवर्त्तिन्यासनेस्वकीय प्रियसुहृत्सुमतिचन्द्रो जलनिधिरिवाऽगाधगाम्भीर्यः समुपविष्टः, तेनसाकं विश्वास्यतया निश्चिन्तो रत्नाकरः श्रेष्ठी विविध वार्त्तालापं विदधाति तावदवसरमासाद्य प्रियदर्शना तच्छ्रोत्रविवरे मन्दस्वरेण श्रेष्ठिन्या गर्भवार्त्तान्यवेदयत् । असंभाव्य-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मश्रुतपूर्वश्चतद्वचनं निशम्य तदङ्गानि सर्वाणि सुधारसेनसिक्तानीवसद्यः सञ्जातरोमाङ्कुरैः कण्टकितानि बभूवुः । अमन्दानन्दसन्दोहेन विह्वलीभूतमानसोमन्दस्मितेन प्रफुल्लगल्लः सोऽजनि, प्रमोदरससंभृतात्तस्यहृदयभाजनादमान्प्रेमभरः शुद्धस्फटिकसंकाशरदनकान्तिमिषेण बहिः प्रासीसरत् । तदानीं चञ्चलकनीनिका, हर्षाश्रुबिन्दुभिः स्निग्धरोमराजिस्तस्यदृष्टिः सुमतिचन्द्रमभिययौ । तदासोऽपि व्यचिन्तयत्—अहो ! अद्य श्रेष्ठिनोऽभूतपूर्वः प्रमोदभरः संलक्ष्यते, प्रियदर्शनाऽपि विकसितवदनारविन्दा विलोक्यते "अतोऽनया श्रेष्ठिन्या गर्भवृत्तान्तो निवेदित इति तेनाऽनुमितिर्विहिता" नान्यदस्मिन्प्रस्तावे प्रहर्षकारणमेतादृशं प्रबलतरं विद्यते, इति विनिश्चित्य सुमतिचन्द्रस्तस्मादुत्थाय किञ्चिच्छ्रेष्ठिसमीपं गत्वा मन्दस्वरेण पपृच्छ—स्वामिन् ! श्रियः स्वप्नार्थः सत्यतयाऽद्यप्रतीयतेकिम् ! प्रियदर्शनायाः प्रफुल्लदृष्टिर्विलोक्यते, भवानपि समुल्लसत्प्रमोदतयाऽमेयोत्साहकारणं नूतनं वृत्तान्तं श्रुत्वा महानन्दनिमग्न इव दृश्यते । मन्मानसमपि भूरिकालादेतादृशीं वार्त्तां जिज्ञासु बभूव । तस्मान्महेभ्य ! शुभवार्ताश्रवणोत्सुकां मममानसलतां मङ्गलवृत्तान्तजलप्रवाहेण प्रशमयाशु । इत्थं निगद्य सुमतिचन्द्रोविरराम. तावद्रत्नाकरः श्रेष्ठी किञ्चिद्विहस्य बभाषे—प्रियसुहृत् ! यद्वाक्यमनयाऽभाणि, तद्यदि सत्यं स्याच्चेत्स्वप्नार्थः स्वेष्टफलदायकोनिष्पन्न इति जानामि, परन्तु प्रियदर्शनायावचनं मे विश्वासपात्रं न प्रतिभाति, यतोऽभाग्यानामस्माकमेतादृशी सुखसम्पत्तिः कुतः सम्भाव्यते ! एतद्वचनश्रवणार्हानास्माकं भाग्यसम्पत्तिः । यद्यपि प्रियदर्शना वितथं वचोनब्रूयात्, तथाऽपि तादृगायतिसम्बन्धोऽस्माकं विषये कुतोऽपि योगान्न संभाव्यते, इति विज्ञाय सा मुधावचनं मामवोचदितिसम्भावयामि । अतस्त्वं सत्वरमुत्तिष्ठ, आवां तत्रगत्वा श्रेष्ठिनीं पृच्छावइति सुमतिचन्द्रं कथयित्वा सर्वान्सभ्यजनान्विसृज्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स्वाङ्गलग्नानि सर्वाभरणानि स प्रियदर्शनायै प्रायच्छत् । ततो लब्धप्रसादा सा बद्धाञ्जलिर्ललाटपट्टं भूतलेसंस्पृशन्तीश्रेष्ठिनं प्रणम्यस्वस्थानमगात् । अथ सुमतिचन्द्रसमन्वितोरत्नाकरःप्रमोदमानमानसस्तत्रगन्तुंत्वरमाणः प्रस्पन्दमानदक्षिणनयनः सर्वजनैरभिनन्द्यमानः सेवायामुचितप्रज्ञैः पार्श्वानुवर्त्तिभिः कतिपयैः सेवकैरनुगम्यमानो वर्त्मनि वायुना प्रकम्पमानज्वालाभिः प्रदीपिकाभिरन्तःपुराभ्यन्तरस्थिततेजोराशिंवर्द्धयन्निवावरोधस्थानं समाययौ । यद्रक्षाकृते विविधशस्त्रपाणयोरक्षकपुरुषाः स्थिताः सन्ति, विचित्रोज्ज्वलानेकवर्णोपशोभितस्यमङ्गलप्रदीपैर्विराजमानस्य यस्यद्वारदेशेकण्ठावसक्तपुष्पमालाःपूर्णकलशाविराजन्तेस्म, अनेकविधमनोहरचित्रैश्चित्रिताभिर्भित्तिभिर्भासमाने, प्रान्तभागेषु प्रसरन्मौक्तिकमालेन विशुद्धविशालोल्लोचेनविभूषिते, मणिमयप्रदीपैर्विनाशिततिमिरलवेतस्मिन् शयनगृहे हिमालयशीलातलविशालायां शय्यायां गर्भवत्याः स्त्रियाः समुचितायांगोरोचनाचित्रितदशांस्निग्धकान्तिनवीनमत्युज्ज्वलं वस्त्रयुगलं परिधाय प्रसुप्ताश्रीश्रेष्ठिनी तेनविलोकिता । अगस्त्योदयेनाविराजमाना दक्षिणादिगिवफेनपुञ्जेनसमावृताऽमृतकलशसमन्विताक्षीरोदधिवेलेवशोभमाना दासीभिर्दत्तहस्तावलम्बा वामजानूपरिदक्षिणभुजपल्लवं संस्थाप्ययावत्सा प्रचलितमणिभूषणानां निःस्वनेनसहस्वभर्त्तुर्गौरवार्थसमुत्तस्थौ, तावत्स्थीयतां स्थीयतामभ्युत्थानपरिश्रमोभवत्यानविधातव्यइत्यादरेणजल्पन्रत्नाकरस्तयासार्द्धं तस्यामेवशय्यायामुपविष्टः । सुमतिचन्द्रोऽपिश्वेतप्रच्छदपटैः समाच्छादितेकाञ्चनमये तदन्तिकस्थितेपल्यङ्केन्यषीदत् । प्रफुल्लगर्भचिह्नां स्वप्रियां समवलोक्य महानन्दभरेण विकसन्मनोवृत्त्यास्मितमुखः श्रेष्ठी बभाषे–प्रिये ! सुमतिचन्द्रोमन्मुखेन त्वां पृच्छति, यत्प्रियदर्शना मामब्रवीत्तत्सत्यमस्ति ? । तदा श्रेष्ठिन्याः स्मिताननं प्रफुल्लिते नयनकमले च संप्रेक्ष्य संशयितमानसौ तौ बभूवतुः । ततः स्वच्छकुन्दोपमदशनकान्तिमिषेण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वसनान्तरितं मुखमादधाना नम्रदृष्टयऽधोमुखीश्रीरस्थात् । पुनः श्रेष्ठिना तथैव साऽभाणि, तदासाऽब्रवीत्–स्वामिन् ? मुहुः मामेतत्किमर्थं पृच्छसि ? व्रीडाजनकं वचनं माब्रूहि । नाहं किमपिवेद्मि । इत्युदीर्यभ्रूकुटितटंवक्रीकृत्यनेत्रप्रान्तौ किञ्चित्तिरश्चीनौविधायभूतलाऽवनतवदनेन्दुः साश्रेष्ठिनमभिलक्ष्यसकोपंदृष्टिक्षेपमकार्षीत् । तदपि श्रेष्ठीस्मितचन्द्रिकयास्वच्छस्फाटिकायितवदनः पुनरुवाच–सुतनो ! यदिमदुक्तवचनेन भवत्यास्त्रपाप्रादुर्भवति तर्हि मौनभावं गृहीत्वाऽहं तिष्ठामि, परंविकासितपत्रसन्तानो विकस्वरकुसुमव्रातेनोज्ज्वलश्चम्पकतरुरिव सुगन्धितोऽतिमनोहरगौरकान्तिपुञ्जस्तवाहिर्यंकिंनविधास्यति ? केवलं सुवासितेनयज्ज्ञायते तद्गोपयितुं कथं समर्थाभविष्यसि ! गर्भप्रभावात्प्रादुर्भूतेन सुधासेकेन हृदयभवने प्रशान्तचिन्तानलस्य धूमसन्ततिमुद्वमन्ताविव, गृहीतनीलकमलौचक्रवाकाविव, तमालपत्राच्छादितमुखौसुवर्णकलशाविवकृष्णागरुरेखाभिरङ्किताग्रभागाविववक्षोजौ कथं गोपयिष्यसि ? प्रतिदिवसंपुष्टावयवतयासंकुचन्ती ते कटिमेखला ह्रस्वतरा भविष्यति, स्फुटतरांत्रिवलीं वहमानोऽयं ते मध्यभागोरेखात्रयशून्योजनिष्यति, तथैव प्रतिवासरं लक्ष्यमाणं शरीरकार्श्यमित्येतत्सर्वं गुप्तं कथं स्थास्यति ? तदानीं ते लज्जानभविष्यति किम् ? एवं ब्रुवाणं रत्नाकरं प्रमोदमेदुरमानसः सुमतिचन्द्रः प्रोवाच–श्रेष्ठिपुङ्गव ? किमेवं त्वया श्रेष्ठीन्युपालभ्यसे ? यया वार्त्तयाऽसौत्रपावतीजायते सा वार्त्ताऽनुच्चार्यैवेत्यभिधाय क्षणं नानाविधगोष्ठीवार्त्ता विधाय सुमतिचन्द्रः स्वमन्दिरमियाय । रत्नाकरस्तु तस्मिन्नेवशयनमन्दिरे तांनिशां स्वप्रियया साकं सुखेन व्यनैशीत् । ततः कियत्सुदिनेषु व्यतीतेषु गर्भदोहदाः समुत्पन्नाः, रत्नाकरेणतेषुपूरितेषु लब्धमनोरथा साश्रेष्ठिपत्नी गर्भदिनेषु पूर्णेषु सततगलद्वारिणा घटीयन्त्रेण शङ्कुच्छाययाच कालमानवेदिभिर्ज्यौतिषिकैर्निर्मापितेशुभलग्नसमये मेघमाला मेघज्योतिरिव सकलजनमानसपङ्कज-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तरणिमिव जगदेकमहानन्दनिदानं पुत्रं प्रासूत । तस्मिन्नेवक्षणे प्रमोदवेगेन परितोधावतां संख्यातीतानां निजपरिजनानां चरणविन्यासैर्भूमिभागं कम्पयन्नगरश्वगर्जयन्महान्महोत्सवारम्भः संजज्ञे । तज्जन्मनि जाते सति सर्वंजगत्सुखमयं जातम्–
दिशः प्रसेदुर्मरुतोववुः सुखाः, शुभाशिषः सर्वजनाबभाषिरे । बभूव सर्वं शुभशंसितत्क्षणं, भवोहिलोकाभ्युदयाय तादृशाम्
॥ १ ॥ इतस्ततःसंचरन्तीनामन्तः पुरपुरन्ध्रीणांनूपुरादिविभूषणानामवधीरितसुधापानः परमहृद्योरणत्कारः सर्वतः प्रससार। निजास्थानस्थितस्य श्रेष्ठिनः सन्निधौ सुतजन्म, निवेदितुं व्रजन्तः प्रमोदपूरनिमग्नाः केचन कञ्चुकिनोऽहमहमिकया जग्मुः । जनसंमर्देषु निपीड्यमानाः स्वात्मानमुद्धर्त्तुमसमर्थाः कतिचित्कुब्जवामनकिरातजनाः निपतनेन विकलाङ्गा बभूवुः । पारितोषिकजिघृक्षया जनव्राताः परस्परं विबाध्यमानगात्राउपर्युपरिन्यपतन् । सुतजन्महर्षितो रत्नाकरोनिजविभवानुसारेण सर्वाञ्जनान्सन्तोषयामास । मन्दराद्रिना मथ्यमानस्य क्षीरनिधेर्घोषमनुकुर्वन्दुन्दुभिनादः पूर्वंव्यनदत्, ततोमृदुमृदंग शङ्खकाहलानकदुन्दुभिप्रभृतीनि मंगलपटहसहितान्यनेकानि वाद्यानि विनेदुः । तत्र समेतानामनेकेषां कलकलध्वनिना त्रिभुवनं व्याकुलीकुर्वन्निव सुतजन्ममहोत्सवकोलाहलोबाधिर्यमुत्पादयामास, सान्तःपुरवर्गाः सामन्तजनाः समग्रप्रकृतिसमेता राजलोका वाराङ्गनाभिःसहिताबालवृद्धाश्च सर्वेजनाभृशंमुमुदिरे । चन्द्रोदयं निरीक्ष्यजलनिधिरिव श्रेष्ठिसूनोर्जन्ममहोत्सवं संप्रेक्ष्य प्रतिक्षणं जनानां प्रमोदेन साकं कोलाहलोववृधे । अथ तृतीयस्मिन्दिने यथाविधि शास्त्रमर्यादां पालयता श्रेष्ठिना बालस्यविभास्वसुनिशाकरावलोकनं कारितम् । ततः षष्ठे दिने रात्रिजागरिकां विधाय वृद्धवनिताभिः षष्ठिकाकृत्यं निर्वर्त्तितम् । द्वादशेदिनेऽथ संप्राप्ते देहशुद्धिं संपाद्य ज्ञातिसमेतान्सर्वान्सुहृद्वर्गान्मेलयित्वा सुतजन्महर्षितः श्रेष्ठी भोजनादिना सत्कृत्य



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुत्रनाम विनिर्णयामास, यतोऽयं बालोऽजितनाथभगवतो मन्दिरस्य द्वारदेशस्थिताया अजितबलाख्यदेव्याः प्रसादेन समुत्पन्नस्ततस्तदनुसारेणाऽस्यशिशोरजितसेनेत्यभिधानं ज्ञातव्यमित्यभिधाय रत्नाकरः सर्वाञ्जनान्स्वस्वस्थानं व्यसर्जयत् । प्रसवदुःखेनक्षीणदेहायाःश्रेष्ठिन्या उत्सङ्गवर्त्तिनं तं बालंविलोकयतोमहेभ्यस्यात्मनिगुरुःप्रहर्षोनप्रबभूव । तस्यशिशोर्विसर्पता तेजःपुञ्जेन मणिप्रदीपानां कान्तयो निस्तेजसोऽभूवन् । अवशिष्टेनगर्भरागेणपूर्वाद्रिचूलामारूढं बालारुणमण्डलमिव, सायंकालीनं शशाङ्कबिम्बमिव, कल्पवृक्षस्य सुकोमलः पल्लव इव, विकसितोरक्ताम्बुजव्रज इव, भूमिनिरीक्षणायदिवःसमायातो भौम इव स कुमारोबभासे । प्रवालाङ्कुराणां पल्लवैः प्राभातिकप्रभाकरबिम्बविभागैः किंवा पद्मरागमणिकिरणैर्विनिर्मिता इव तस्यशरीरावयवाश्चकासिरे । सुराङ्गनानां करकमलेभ्यश्च्युतः जयन्तकुमार इव स विरराज । अग्न्युत्तप्ततपनीयवद्भासमाननिजदेहभासा शयनगृहं सम्पूर्णमातन्वन्निव स बालोदीप्तिमानासीत् । महापुरुषचिह्नानि तस्मिन्निवासं चक्रुः । आयत्यामसौ बालो मां पालयिष्यतीति विज्ञाय मोदमानमानसा लक्ष्मीस्तं प्रथमतः समालिलिङ्ग, प्राक्तनपुण्यप्राग्भारेण सञ्जातं पुत्रं मन्यमानो रत्नाकरो निर्निमेषदृष्ट्या पुनःपुनस्तन्मुखारविन्दं विलोकमानः परमां मुदं प्राप, अनेनसूनुनानिखिलमनोरथानां फलितत्वात्सश्रेष्ठी निजजन्म कृतकृत्यममंस्त । तत्प्रियसुहृत्सुमतिचन्द्रः प्रीत्युत्फुल्लनयनाभ्यां तस्य बालस्य प्रत्यङ्गं निरीक्ष्यमाणोऽसकृच्छ्रेष्ठिनं शनैः शनैरित्युवाच–महेभ्य ? गर्भपीडनेनेदानीं कुमारस्य सर्वावयवानां सम्पूर्णा शोभा न प्रकाशते । तथाऽपीमानि चिह्नान्यस्य बालस्य प्रभावं स्पष्टं कथयन्ति–विकसितकुमुदाभं नेत्रयुग्मं विशालं, रुचिरनिटिलदेशः सान्ध्यचन्द्रानुकारी । (अष्टमीन्दु प्रकाशः) । सुरभिमुखसुगन्धं नासिका जिघ्रतीव, प्रविततमृदुकान्तिश्चास्य बालस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सुभ्रूः ॥ १ ॥ विशददशनपङ्क्तिछादयच्चाधरोष्ठं, हरति जनमनोऽलंरक्तबिम्बायमानम् । करतलगतमेतच्छत्रचक्रादिचिह्न-मतुल-विभवमूलं दृश्यतेऽस्याऽर्भकस्य ॥ २ ॥ चरणयुगलमेतच्छत्रवाजिध्वजाम्बु-रुहकलशरथानां चारुरेखाभिजुष्टम् । त्रिदशविट-पिनिर्यत्पल्लवाभानुसारि, सुखदतिलकशोभा भूषयत्यङ्गमस्य ॥ ३ ॥ ध्वनिरतिमधुरोऽस्ति प्रोन्नतोरुश्रियोऽस्य, नवजलदगभीर-स्तेजसामाश्रयस्य । विविधविभवदायीन्याश्रयन्त्यङ्गमस्य, ललितगुणगणानां हेतवोलक्षणानि ॥ ४ ॥ एवं नाना लक्षण लक्षितं तंबालं विलोक्य सुमतिचन्द्रेण प्ररूपितैस्तस्य शुभैः शरीरावयवैः सन्तुष्टमानसो रत्नाकरो निजस्थानमगमत् । सुमति चन्द्रोऽपि प्रसन्नीभूय निजनिकेतनमियाय । अथ शुक्लपक्षे शीतरश्मिकलाकलापइव, कल्पद्रुमनवाङ्कुरइव, सरसिस्थित सरोजमिवाजितसेनकुमारस्य शरीरावयवा दिने दिने वृद्धिं पुपुषुः । धात्रीभिर्लाल्यमानः स बालस्तदुदितवचनानुसारेणा व्यक्तमधुरां भाषां कोकिलबालवद वोचत् । एवं कियति समये व्यतीते क्रमेण सप्तहायनः स बभूव । तदा योग्यवयसंत-मर्भकं विज्ञाय परमप्रमोदपूरितान्तःकरणाभ्यां मातापितृभ्यां महोत्सवपूर्वकं शुभे मुहूर्त्ते स्वकुलागतकलाचार्यस्यसन्निधौ वाङ्मयप्रवेशाय स मुक्तः । बुद्धिनिधानः स कलाचार्योयान्यान्प्रबन्धानध्यापयति तान्सर्वान्सकृच्छ्रवणमात्रेणैव प्राक्पठिता-निवबुद्धिसाध्यानकरोत् । स्वल्पप्रयासेनाऽचिराद्यथाक्रमं गणिताद्यङ्कविज्ञानच्छन्दःप्रमाणकोशकाव्यव्याकरणजिनेन्द्रोक्त धर्म-शास्त्रेषु पारावारीणो न्यायसाङ्ख्यवेदान्तमीमांसापातञ्जलादिशास्त्रेषु लब्धनैपुण्योद्वासप्ततिपुरुषकलासु चतुःषष्टिस्त्रीकलासु च पारगामी स बभूव । ततः समनुज्ञातसकलकलासारं सकलविद्यानां पारदृश्वानं कुमारं विज्ञाय रत्नाकरः श्रेष्ठी कलाचार्य-स्यानुमतिश्च विदित्वा स्वमित्रं सुमतिचन्द्रं समाहूय समग्रपरिजनसमेतं समहोत्सवं सुविहितदिने कुमारानयनाय समादि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शत्। रत्नाकरस्याज्ञां गृहीत्वा सुमतिचन्द्रस्त्वरितगमनेन पथि सञ्चलन्सर्वजनसमेतो निरुपद्रवमेकान्तस्थितं शीतसुगन्धित-वायुभिः संजुष्टं शान्त्येकनिदानं विद्यालयं सम्प्राप्य झटिति द्वारपालेन सन्देशं विज्ञाप्य तेनैव प्रवेशितस्तत्र कुमारसन्निधौ गत्वा तदाज्ञानुसारेण तदन्तिके संस्थितमासनमभूषयत्। ततः क्षणं विश्रम्यलब्धस्वास्थ्यः सविनयं सोऽवादीत् कुमारेन्द्र ! तवपिता रत्नाकरः श्रेष्ठी मन्मुखेनैवं विज्ञापयति–अस्माकं सर्वे मनोरथाः सफलीजाताः, भवान्सर्वशास्त्राणां पारं प्रयातः, समस्ताः कलास्त्वया समभ्यस्ताः, निखिलशास्त्राणां परीक्षायां समुत्तीर्णोऽसि, तत्र लब्धप्रतिष्ठापत्रश्च संजातोऽसि। तस्मात्सर्वेकलाचार्यास्त्वां गृहगमनाय समादिशन्ति, चिरकालसञ्जातवियोगवेदनार्दिताः सर्वाः प्रजाः समस्तकलाविज्ञान परिपूर्णं भवन्तं पूर्णिमायाः शशाङ्कमिव संप्रेक्ष्य निजनेत्रयोः साफल्यं वितन्वन्तु। नगरवासिनः सर्वेजनास्त्वां प्रेक्षितुं परमोत्सुकमानसा वर्त्तन्ते। सप्तहायनस्य ते विद्यामन्दिरे वसतोऽधुनैकोनविंशतितमं वर्षं जातमतोबहिर्निष्क्रमणमिदानीं विधीयताम्। सकलजनानां मातापित्रोश्चस्ववपुर्दर्शनेन महोत्साहं विधत्स्व, जिनेन्द्रपूजाराधनं विधाय सद्गुरूँश्चाभिवन्द्य धनधान्यादि महर्द्धिशालिपैतृकं पदं प्रतिपद्य यथाभिऽलाषं सदाऽनुवर्त्तस्व। सर्वे जनाः पितृवत्समावर्जनीया इत्युक्त्वा यावत्सुमतिचन्द्रोविरराम, तावदजितसेनः स्वपितुराज्ञां शिरसिमाल्यमिव समाधाय कलाचार्याणां मनः सम्पाद्य प्रणामञ्चविधाय गृहीततदाज्ञस्ततोनिरगात्। सुमतिचन्द्रसमेतः समारूढवाहनोऽजितसेनः समहोत्सवं निजगृहमभियातुं प्रतस्थे, वर्त्मनि प्रतिस्थानं सम्मिलितानां पौराणां नयनानन्दं वर्द्धयन्निजनिकेतनमियाय। तन्निरीक्षणैकदक्षदृष्टीनां सदोगतानां मध्यतोगत्वा मोदमानः स पितुः पादौ शिरसापस्पर्श, तावत्पुत्र ? स्वागतमस्तुतवेति ससंभ्रमंवदन्रत्नाकरो निजबाहुलतां प्रसार्य महताऽऽनन्देन तं समालिलिङ्ग। ततोऽजितसेनः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पितुरन्तिके विनयशालितया भुविन्यविशत् । तदनुश्रेष्ठीकुशलोदन्तं पृष्ट्वा तमवोचत्-प्रियपुत्र ? तवमीलनोत्सुकां हर्षाश्रूणिस्रुश्रन्तीं विह्वलचेतसं त्वज्जननीमभिवन्दस्व, पश्चात्त्वद्दर्शनोत्सुकान्सर्वाञ्जनान्दृष्टिविलासेन सम्भावयेतिपित्राऽऽदिष्टःसकुमारोजनकाज्ञानुसारीविनयाश्रितचेताःसत्त्वरंविसृष्टाऽन्यसेवकः सुमतिचन्द्रसमन्वितो निजमातृभवनंजगाम । अतीवशान्तमूर्त्तिं परिहितशुद्धवसनामनर्घ्यभूषणविभूषितावयवां धर्मवासितचेतसं मङ्गलैकनिधानं सकलजनस्पृहणीयशीलां विविधकथानुवाद निपुणमार्तिं पुरातनवार्त्ताप्रसंगान्विवृण्वतीमैतिहासिकग्रन्थान्वाचयन्तीं जनोपयोग्यजैनधर्मोपदेशं वितन्वन्तीं वृद्धाभिः परिचारिकाभिर्विविधालापैर्विनोद्यमानां स्त्रीवेषधारिभिः स्त्रीभाषाश्चब्रुवद्भिः कञ्चुकिभिर्निषेव्यमाणां नानाचित्रितव्यजनैश्चामरैश्चवीज्यमानां गृहीतवस्त्राभूषणपुष्पमालापटवासताम्बूलव्यजनविलेपनभृङ्गाराभिः समन्ततो मिलिताभिर्युवतिभिः सेव्यमानां पयोधरप्रदेशे लम्बमानेन मौक्तिकहारेण गिरिद्वयेवहमानया स्वर्धुन्या वसुन्धरामिवराजमानां स्वमातरमुपव्रज्य प्रणनाम । तदानीं कार्यदक्षेषुदासीजनेषु निरीक्षमाणेषु निजासनात्समुत्थाय सा सप्रमोदं चिरमागतं सूनुं स्वागतपूर्वकं शुभाशिषा संवर्द्धय शिरसि समाघ्राय दृढतरमालिलिङ्ग । ततः सा सुमतिचन्द्रं सत्कृत्य योग्यासने सन्निवेश्य स्वयश्चनिजासनमास्थाय भूतले निषीदन्तमजितसेनं विनयाश्रितचेतसमनिच्छन्तमपिबलादाकृष्य निजोत्सङ्गे निवेशयामास । असकृत्तं समालिङ्गन्ती महेभ्यपत्नी ललाटपट्टे वक्षस्थले मस्तकेऽसयोश्चमुहुः करस्पर्शं कुर्वाणा व्याजहार । सूनो ! तव जनकस्य हृदयं वज्रादपि कठिनं विभाव्यते, यतस्त्रिभुवनैकललामभूतेयं मनोहारिणी सुकोमला तव तनुश्चिरन्तनकालं विद्यागुरुकुलवासेन क्लेशैकभाजनं विहिता । अस्यां मेदिन्यां धन्यस्त्वं, बाल्यावस्थायामपि विबुधजनकार्यसम्पादको धृतधैर्यकञ्चुकः सर्वेषां प्रशंसनीयोऽसि, यद्बाल्योचितक्रीडनकाद्युत्कण्ठाऽपि दूरत-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्त्वया परिहृताऽस्ति, पूजार्हेषु गुरुजनेषु निर्व्याजतया तवासाधारणी सेव्यबुद्धिः सहजातेव विराजते। विशेषतस्तवपितुःप्रसादेन यथाऽहं समभ्यस्तसकलविद्यातत्त्वं त्वामधुनापश्यामि, तथैवाऽचिरादनुरूपवधूवृतं त्वां विलोकयिष्यामीत्याशासे, इत्यभिधाय श्रेष्ठिनी स्मिताननमजितसेनं किञ्चिद्व्रीडावनतमुखारविन्दं विलोक्य गण्डस्थलयोश्चुम्बनं विधाय तं व्यसृजत्। कुमारोऽपि ततः समुत्थाय तत्परिजन वर्गं संभाष्य पुनर्निज पितुरन्तिके समभ्येत्य सदोगतान्सर्वाञ्जनान्सम्मील्योचितासनमलङ्करोतिस्म। रत्नाकरोऽसकृत्तस्य शरीरसम्पत्तिमनुत्तरं रूपलावण्यञ्चानिरीक्ष्य निजचेतसि व्यचिन्तयत्-सर्वगुणसम्पन्नोऽयं पुत्रो युवतिजनप्रार्थनीययौवनारूढोजातोऽस्ति। अतस्तदनुरूपा कन्या काऽपि विलोकनीया;-कवीश्वरः काव्यकृतिं नवीनां, योगीश्वरः शुद्धधियाऽऽत्मतत्त्वम्। विचिन्तयत्येवमनल्पबुद्धी-रत्नाकरो योग्यवधूस्वरूपम् ॥ १ ॥ समानलावण्यगुणा यदा कनी, न लभ्यते तर्हि विधातुरुद्यमः। कुमारमेतं प्रविधातुरुत्तमं, मुधाभवेत्सर्वगुणैकभाजनम् ॥ २ ॥ यतः—गुणैर्हीनो भवेत्स्वामी, परिवारोनयोज्झितः। विरूपास्त्री विमूढत्वं, शल्यमेतच्चतुष्टयम् ॥ १ ॥ पुण्यवतामेव सुविहिताभार्यालभ्यते-उक्तश्चान्यत्र-सरसा सुपदन्यासा, सालङ्कारा सुवर्णमयमूर्त्तिः। आर्या तथैव भार्या, न लभ्यते पुण्यहीनेन ॥ १ ॥ तथाच-कुलं रूपं कलाभ्यासो-विद्या लक्ष्मीर्वराङ्गना। ऐश्वर्यत्वं प्रभुत्वञ्च, धर्मेणैव प्रजायते ॥ १ ॥ इत्थं विचारमालां ग्रथ्नन्महेभ्यो यावत्स्थितस्तावत्तत्र स्ववंशजः कश्चिदेकोवणिक्सुतः समागम्य श्रेष्ठिनमभिवन्द्य तस्थिवान्। तदा व्यवहारिणा कुशलवार्त्तां पृष्ट्वा स भणितः,-व्यापारार्थं देशान्तरं पर्यटतस्तव कियाँल्लाभोऽजनि? तदुक्तिमाकर्ण्य वणिक्सुतः प्रोवाच-श्रेष्ठिपुङ्गव! भवदाज्ञां समादायाहं देशान्तरमव्रजम्, तत्रानेकग्रामनगरपुराणि विलोकमानो द्वीपान्तरे परिभ्रमन्गृहीततत्तद्देशक्रयाणाकोहमेकस्मिन्वासरे सर्वदा मङ्गलमालासमन्वितायां धनधान्यादिस-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





र्द्धिसमाजुष्टायां सद्धर्मपालाकाढ्यजनसमाश्रितायां कृतमङ्गलानगर्यां जग्मिवान्। तत्र स्थितेन मया भूरिव्यापारं विदधता विपुला लक्ष्मीः समुपार्जिता, ततस्तस्मिन्नेवपुरे जिनदत्ताऽभिधो व्यवहारी निवसति, तेन साकं व्यापारं कुर्वतोममाऽनेकशो-दानादानादिव्यवहारेण भूयसी प्रीतिर्जाता, तस्मादेकस्मिन्वासरे बह्वाग्रहेण तेनाऽहं निजगृहे भोजनार्थं निमन्त्रितः, पटुबुद्धिः स भोजनसमये मां स्वगृहमनयत्, मज्जनगृहे प्रवरासने मां सन्निवेश्य सुगन्धितोष्णवारिणा स्नपयामास। ततो भोजनशालायां मण्डितेषु वरासनेषु जिनदत्तप्रमुखा वयं सर्वे निषण्णाः, स्वादूनि पक्वान्नादिभोज्यान्यास्वाद्य पूगीफलताम्बूलैलाजातिफल देवकुसुमादिकमुखवासं गृहीत्वा प्रशान्तिभाजोवयमुपविष्टास्तत्र वार्त्ताविनोदानकुर्महि, तदानीञ्चैका कन्या ममदृष्टिपथं समायाता। यस्या रूपसौभाग्यं वर्णयितुं साक्षाद्वाचस्पतिरप्यप्रभुस्तथाऽपि यत्किञ्चिदहं वर्णयामि तत्सावधानतया शृणुत। रत्नाकरोऽपि यस्मिन्कार्ये निमग्नस्तदेवस्वाभीष्टकार्यवृत्तान्तं विज्ञायाऽनन्यबुद्ध्याऽशृणोत्। ततोवणिक्पुत्रोऽवादीत्-महेभ्य? हीरकोपरिसंस्थितपद्मरागमणिबिम्बानुकारिण्यस्तच्चरणाङ्गुलीनखानां कान्तयो विभान्ति, घुसृणकुङ्कुमद्युतयस्तदङ्गुल्यश्चम्पककलिकाइव विराजन्ते, तच्चरणतलेऽकृत्रिमरागेण विजितपद्मविभे प्राभातिकसूर्यनिभे भ्राजेते, पक्वजम्बीरद्युती कन्दुकसमवृत्त पीनौ पार्ष्णिभागौ माङ्गलिकमणिप्रभां तर्जयतः, तदीयपादग्रन्थियुगलं पञ्चबाणस्य कनकरथनाभियुगलमिवोल्लसति, अवरुद्धरतिगतिविलासश्रीकंतच्चरणयुगं मनोभवस्य सज्जीकृततूणीरयुगलमिव विभाति, तज्जानुग्रन्थिद्वयं संतर्जितमुकुरप्रभापुञ्जमिव विलोक्यते, सुवर्णमयकरिकरायमाणं सक्थिद्वयं कदलीगर्भसमानाकारं दृश्यते, रमणीयकान्तिस्तस्या नितम्बाभोगः सम्भृतवारिणः सरसः समानतां बिभर्त्ति, विडम्बितकूर्द्दमानपश्चाननश्रोणिस्तस्याः कटितटोनवपल्लवइव लम्बमानो विभाति, तन्नाभिनिवेशो



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सिन्धुनद्या जलावर्त्तवद्गम्भीरो वर्त्तते, उदाराकृति तदुदरं नागवल्लीदलाकारं समस्ति, तदुपरिलब्धसन्निवेशा त्रिवली जलोर्मिरेखात्रयीव प्रकाशते, शैवलानुकारिणी तदीयजठरसंस्था रोमराजिः श्यामरज्जुनिभा कृष्णपिपीलिकाश्रेणिमनुसरति, तस्याः पार्श्वभागौ चातीवमांसलावमराङ्गनानामपि विलोभनीयौ स्तः, तस्या वक्षोजौ कपित्थानुकारिणौ कुसुमायुधस्य क्रीडार्थं कन्दुकाविवाऽथवात्रिलोचनस्यलक्ष्यभूतौमनोभुवा विनिर्मितनिवसनप्रासादाविव विराजेते, भुजवल्ल्यौ मदनपाशाविव, तिरस्कृतपङ्कजनालसुषमा बाहुलता पञ्चसायकदण्ड इव, हस्ततले विष्णोर्वीजनाय क्षीरोदतनयागृहीतव्यजन इव, कराङ्गुलयः कामबाणाइव, करशाखानखाः सज्जीकृतासिधाराइव, पृष्ठविभागो मनोहरकदलीदलखण्डइव, कपोतग्रीवेवशिरोधरा, कम्बुरिव कण्ठनालः, पक्वाम्रफलोपविष्टभ्रमरशिशुरिव हनुप्रदेशे विनिर्मितं मषीचिन्हं विराजते। पक्वबिम्बोपमानावधरोष्ठौ नवपल्लवाविव, दीप्यमानादशनश्रेणिर्दाडिमकलिकेव, पद्मरागनिभा रसना पद्मपल्लवइव विभाति। निर्जितकोकिलाध्वनिः सा स्मितं कुर्वन्ती प्रकाशमानशशाङ्ककलेवविकासते। सुगन्धसुवासितमाननं समाघ्रातुं समागतेव नासिका शुकचञ्चुदीपशिखाचम्पककलिकाकृतिर्नयनयोः सीमदण्डइव, चञ्चलकनीनिके कर्णान्तविश्रान्ते नेत्रे मृगाङ्गनाखञ्जरीटमत्सीभ्रमरकमलानां रूपगुणान् निर्जित्य विलसतः। मेषोन्मेषत्वं वारितरङ्गवत्प्रकाशते, भ्रकुटिश्च कामदेवस्य सज्जधनुरिवविभासते, शशाङ्कार्धविशालो भालपट्टः सरोजखण्डइव विराजते। शुक्तिकाकारौ श्रवणपुटौ कामस्य दोलायन्त्राविव, केशकलापो मन्मथस्य चामरइव शोभते। तथैव विद्याभ्यासे पटुतरबुद्धिः, स्त्रीकलासु प्रावीण्यमुपगता, सांसारिकपारमार्थिककार्येषु लब्धनैपुण्या, मातापितृभक्तिपरायणा ज्ञातजैनधर्मरहस्या सा कुमारिका विद्यते। त्रिभुवनैकतिलकायमानमूर्त्तिस्तादृशी नापरा विद्यते। महेभ्य ! तथा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





विधां हृदयप्रियां तां कन्यां विलोक्य जिनदत्तवणिजमहमपृच्छम्—कस्येयमात्मजा ? तेन भणितम्–निर्जितकामरूपेयं मदीयाङ्गजा वर्त्तते । अस्या विवाहार्थे महती चिन्ता मे जायते, केवलं वरस्यैव योग्यतया कन्याविवाहो न विधीयते, प्रथमं रूपगुणधामवरोविलोकनीयः, ततः प्रेमचिन्तनं, तच्छ्वशुरपक्षीयकुलबलाऽभियोगः, स्वजनसज्जनता, सपत्नीशल्यं, शीलपालनस्वामिजन्यशर्म्मसन्ततिप्रभृति सर्वं विलोक्यते । यतः–कन्या वरयते रूपं, माता वित्तं पिता श्रुतम् । बान्धवाः कुलमिच्छन्ति, मिष्टान्नमितरे जनाः ॥ १ ॥ अतः कन्याजनकस्तत्सर्वं पर्यवेक्ष्य सर्वजनसंमतं निर्बाधमेव विवाहकार्यं प्रकुर्वीत, अन्यथा लोकविगर्हणीयः स्यात्तस्मात्कन्यायाः पिता सदा दुःखकान्तारे पतितो ज्ञातव्यः । उक्तश्च–गमनं न वरं कोशं, सुतैकाऽपि न संमता । ऋणं वरं न पितॄणां, यदि दैवकृपा भवेत् ॥ १ ॥ वणिक्सुत ? समग्रगुणमण्डिता विशेषतोऽवर्ण्यरूपसम्भारा शशिमुखी शीलवतीत्यभिधानं सार्थकं व्यञ्जयन्ती परिणामेऽपि तथैवभाविनीयंकन्यासौभाग्यैकखानिश्चतुःषष्टिकलासु निपुणा, संप्राप्तशकुनस्वरोदयविज्ञाना, काकोलूकमयूरदुर्गातित्तिरीदेववर्त्तिकाक्रोष्ट्रादिपशुपक्षिणांभाषायांनिपुणमतिर्विद्यते । शकुनशास्त्रे चोक्तम्—त्रिविधानि शकुनानि, क्षैत्रिकं यात्रिकमागन्तुकश्चेति–क्षैत्रिकं क्षेत्रमुद्दिश्य विचार्यते, यात्रिकं कस्मिन्नपिस्थाने, आगन्तुकश्च वर्त्मनि विलोक्यते । तत्राद्यं यथा–पृच्छकोयत्किञ्चित्क्षेत्रविषयकं स्वमनसि विचारयेत्तत्कालाद्यर्थविशेषं कथयेद्देवश्च क्षेत्रस्थपादपेषु निषण्णं शास्त्रोक्तविधिना पक्षिणं दृष्ट्वा तत्फलस्य निवेदनं क्षैत्रिकं ज्ञानमुदाहृतं शकुनवेदिभिः । यात्रिकं यथा–ग्रामान्तरं व्रजता पुरुषेण चतसृषु दिक्षु निरीक्षणीयम् । ग्राम्या आरण्यका वा प्राणिनः कस्यांदिशि व्रजन्ति कीदृशीं चेष्टाश्च कुर्वन्ति, कीदृशानि वचनानि ब्रुवन्तीति वेदनं यात्रिकं ज्ञानम्, तृतीयं यथा–प्रतिदिशं प्रतिप्रदेशश्च यानि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शकुनानि भवन्ति तेषां यथादेशकालभाविशान्त्युद्दीप्तिसमुद्वेगादिजनकं यत्फलं तत्प्रकारताशालिज्ञानमागन्तुकज्ञानमित्यादिशाकुनिकविज्ञानपरिपूर्णाऽसौवर्त्तते, किंबहुनोक्तेन, निःसीमगुणभूमिस्त्रैलोक्यजनमाननीया प्रियत्वादिन्येषा मदङ्गजा प्राप्तविवाहकाला सञ्जाताऽस्ति। तस्मादन्वहं तस्या विवाहचिन्ता मे हृदयस्थलं न जहाति, एवं जिनदत्तोक्तिमाकर्ण्य मयेत्यवादि–हे बुद्धिनिधान ! मैवं चिन्तां कुरु, येनेदृशी रूपगुणशालिनी कन्या विनिर्मिता तेनैव विधिना तस्या योग्यो-वरोऽपि समुत्पादितोऽभविष्यत् । यदुक्तम्—जानाति मुग्धस्त्वहमेववित्त–मुपार्जयाम्यन्यजनाश्च सर्वम् । खादन्ति काष्ठे स्थित मङ्क्षिजातं, शुष्के जलं पाययतीतरः कः ॥१॥ यथा शिशोर्गर्भगतस्य चिन्तां, कुर्वन्विधाता प्रथमं जनन्याः । दुग्धप्रवाहं स्तनयोर्विधत्ते, तथाऽन्ययोगा अपि भावनीयाः ॥ २ ॥ भाग्यानुयोगेन जना लभन्ते, उच्चावचांसङ्गतिमुत्कटाशाः । दैवप्रभावाद्विभवो हि लोके, विपत्तिरप्याशु दुरन्तदुःखा ॥ ३ ॥ अतोहेश्रेष्ठिन् ? सावधानमनसा त्वया सुधासोदरा मदुक्तिः श्रूयताम्—नन्दनपुराभिधे पत्तने रत्नाकरनामामहेभ्योऽस्ति, रूपेणनिर्जितमन्मथःस्वकीयौजसा तर्जितभास्करप्रभः सकलश्लाघ्यगुणगणवसतिः साक्षात्कामकुमारइवाऽमेयदीप्तिरजितसेनाभिधस्तस्य सूनुरस्ति। सएव रोहिणीं शशभृदिव तवपुत्रीं वरीतुं योग्योऽस्ति। इति मदुक्तं वचनंनिशम्य प्रमुदितमानसः सोऽब्रवीत्–अहो ? रत्नाकरश्रेष्ठिनः सम्बन्धःसर्वथासर्वेषां माननीयः केषामप्रियः स्यात् ? भवदुक्तं वचनं तथैवाऽस्तु, शुभेऽस्मिन् श्लाघ्यकर्मणि कोविलम्बं कुर्यादिति गदित्वातेन स्वकीयंपुत्रं जिनशेखराख्यं मयासार्द्धं तत्कालमेवप्रेषितोऽस्ति। सोऽधुना मद्गेहे तिष्ठति, यदि युष्माकमाज्ञाचेत्तमत्रानयामि। कर्णयोः पीयूषोपमं तदीयंवाक्यं निशम्यरत्नाकरस्तं कथयामास–सुहृदात्मज ? त्वयाऽतिसुन्दरं कार्यं विहितमस्तीत्यसकृत्तत्प्रशंसां कुर्वन्नि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नशेखरं निजसद्मनिसद्यः समानाय्य सत्कारं च विधाय शुभे वासरे विवाहसम्बन्धोविहितः। ततो लग्नसमयं निर्णेतुं समभ्यस्तविद्याञ्ज्यौतिषिकानाहूय सुमुहूर्तलग्नं निश्चिकाय। गणकानपि सत्कृत्य विससर्ज। ततः प्रमोदपूरितान्तःकरणोजिनशेखरोनिजनगरं प्रययौ। अथोभयत्रविवाहोचितकार्याणि बभूवुः। आदौ विघ्नविघाताय श्रीमानजितसेनकुमारो मङ्गलप्रदां श्रीजिनेन्द्रमूर्त्तिपूजयामास। ततः सुरूपायां शीलवत्यां निमग्नचेतसस्तस्यदक्षिणकरोमङ्गलसूचकेन मदनफलसमन्वितकौतुकसूत्रेण विभूषितोऽभूत्। उभयस्मिन्स्थाने कुशलैर्भृत्यैर्विरचितान्विवाहमण्डपान्सर्वभूषणभूषिताः स्वस्वसम्बन्धिनः सप्रमोदा विभूषयामासुः। तेषु मण्डपेषु च विविधगीतकलासु कोविदा गायकाः प्रगायन्तिस्म। मृदङ्गवीणादुन्दुभिप्रमुखवाद्यानां ध्वनयः प्रादुरभूवन्। मधुरवाग्विलासा वारविलासिन्यो नृत्यन्तिस्म। सर्वस्मिन्नगरे प्रतिगृहं कनककलशाः कौशेयध्वजपताकाश्च प्रकाशन्तेस्म, कविगणा यशोराशिं वर्णयन्तिस्म, नवीनदुर्वाङ्कुराणां तोरणानि प्रतिद्वारमलञ्चक्रुः। गुलालपुञ्जेनाभ्रिरचयेनच नभस्तलं व्याप्तमासीत्, विचित्ररङ्गैः स्वस्तिकानां विविधरचना विनिर्मिताः सन्ति, घुसृणकर्पूरमृगमदसुगन्धिततैलचन्दनादिविलेपनद्रव्यैर्विलिप्ताङ्गावयवाः सुमनोहरैर्विचित्रवर्णैर्वस्त्राभरणैरनेकविधमौक्तिकजात्यरत्नाऽलङ्कारैश्च कृतशृङ्गाराः पौरजना विराजन्तेस्म। मनोहरवेषधारिण्यः सधवा योषितो मधुरस्वरैर्धवलमङ्गलानि गायन्तिस्म, स्वादिष्टाऽभीष्टमिष्टान्नभोज्यादिभिः सकलजनाः प्रसन्नमनसोजज्ञिरे। एवमुभयस्मिन्नगरे विवाहमहोत्सवोऽवर्त्तत। अथ नन्दनपुरादजितसेनपुरःसरा वरयात्रिकाः प्रयाणं चक्रुः, शृङ्गारितास्तदीयाः कुञ्जरव्राता अञ्जनगिरिभ्रमंवितन्वन्तिस्म, तरसानभोङ्गणमाक्रमितुमभीप्सवइवसमुत्पतन्तस्तुरङ्गमाः सादिभिर्बलादाकृष्टवल्गा नियमिताश्चेलुः। शस्त्रास्त्रव्रातैर्विराजमानाः पदातिगणाः सोत्साहं व्रजन्तिस्म, किङ्किणी-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जालनादितदिग्विभागाः सौवर्णरथाः संभृतवस्तुचयाः शकटश्रेणयः शिबिकाः सुखासिकाश्चापरिमिता अध्वनिविशालेऽपि ससंकुलं व्रजन्तिस्म, वायुनोऽधूयमाना रथस्थितध्वजपटा जनानां मार्गश्रमजनितस्वेदलवान्निवर्त्तयन्तिस्म, अनेकविधवाद्यानिनिनदन्तिस्म, वरगुणान् कीर्तयन्तः कवयो विचित्रां काव्यरचनां वितन्वन्तिस्म, गाथकाः समयोचितं गायन्तिस्म, वारवनिता नृत्यं व्यधुः। एवं व्रजन् स्वजनपरिवृतः कतिभिर्दिवसैरानन्दितान्तःकरणोवरयात्रिकैरनुगम्यमानोऽजितसेनः सदा सन्मङ्गलैर्विराजमानां कृतमङ्गलानगरीमवाप्य तद्बहिरुद्याने निवासमकरोत्। ततो ज्ञाततदागमनवृत्तान्तो जिनदत्तश्रेष्ठी लब्धसर्वस्वइव महताडम्बरेण पुरप्रवेशं कारयित्वा प्रथमत एव सज्जीकृते योग्यावासे वरपक्षीयान्सर्वाञ्जनान्निवासयामास। ततो लग्नवासरेऽपराह्णसमये कौसुम्भरञ्जितमहार्घ्यवसनैर्विभूषिताङ्गो मौक्तिकहारेण विराजितकण्ठकन्दलो मणिमयकुण्डलकान्त्या संदीप्तगण्डस्थलः शिरसिविधृतरत्नमुकुटः केयूराभ्यां विराजितभुजदण्डो रत्नवलयाभ्यां विभूषितकरकमलः किङ्किणीव्रातेन वाचालया रत्नकाञ्च्या समालिङ्गितकटितटो महारत्नाङ्गुलीयकैः सुशोभिताङ्गुलिगणो नानापरिमलसुवासितैर्निजाङ्गैः सुरभीकृतदिक्चक्रोमूर्ध्निधृतधवलातपत्रोऽधिकफायमानाभ्यां चामराभ्यांवीज्यमानःसमानवयोभिर्भव्यविचित्रालङ्कारमण्डितगात्रैः सुहृन्मण्डलैरनुगम्यमानः प्रवरतुरङ्गममारूढोऽजितसेनकुमारो मेघगम्भीरदुन्दुभिमृदङ्गभेरीप्रमुखवादित्रगणैर्बधिरीकृतदिङ्मण्डलो नगरप्रतोलिकामाससाद, तस्मिन्नवसरेऽनेकेध्वजपताकानिःस्वानधारिणः श्रेणिभिर्विराजमानास्तदग्रे चलन्तिस्म, स्कन्धस्थितसुवर्णयष्टयोबिरुदावलीमुच्चारयन्तोवरघोटकादिद्दवयासमागच्छतोव्यग्राञ्जनानपवारयन्तोऽनुचरा विचेरुः। तत्क्षणमागता युववर्गास्तद्विलोकनैकदत्तचक्षुषश्चिरंजीव चिरंजीवेतिमधुरशब्दैरन्तरिक्षं पूरयन्तिस्म, धृत-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





प्रमोदभरा बन्दिजना उच्चैःस्तुतिपाठैर्जनानानन्दयन्तिस्म, राजवर्त्मनि समागतमजितसेनकुमारं मूर्त्तिमन्तं रतिपतिमिव निरीक्षमाणाः सर्वे नागरिकास्त्यक्तान्यकार्यास्तदेकध्याननिमग्नाःशशिकलोल्लासितकुमुदखण्डवद्विकस्वराबभूवुःअस्यकुमारस्य शरीरकान्त्या स्वकीयकुमारसंज्ञां मुधामन्यमानः कार्त्तिकेयस्त्रपां धारयतिस्म, अहो ! अस्माकं भाग्यं कीदृशम् ! यदीदृशीमस्य कुमारस्य दीव्यामाकृतिं सादरं संवीक्ष्य हृदयसरसो निरवकाशतया निर्गच्छताऽऽनन्दजलेन व्याप्तैरत्याश्चर्येण प्रफुल्लैर्नेत्रैरसौ निर्विघ्नतयाऽस्माभिर्विलोक्यते, अद्यैवाऽस्माकं जन्मसफलं समजनि, रूपान्तरेण धृतभव्यस्वरूपाय श्रीमदजितसेनकुमाराय नमोऽस्त्विवति मुहुर्ब्रुवाणा जनव्राता विहिताञ्जलयस्तं समभावतयाप्रणेमुः, सर्वत्र वर्त्मनि स्वस्वगृहद्वाराणि समुद्घाट्य तद्दिदृक्षवोजना बहूनि गवाक्षाणि व्यावृण्वन्तिस्म, तस्मात्तन्नगरमपि निर्जितकाममजितसेनरूपं विलोकितुं कौतुकेन स्फारदृष्टिव्रजमिवाऽदृश्यत ! अनेकमण्डनविराजिततनुरजितसेनकुमारो महोत्सवपूर्वकं शीलवतीं परिणेतुं समागच्छतीत्येवं श्रवणानन्तरमेव तंकुमारं निरीक्षितुमुत्कण्ठिताःप्रमदवयसःपुराङ्गनाःप्रासादशिखराण्यारोहन्तिस्म, काश्चनप्रमदाः करधृतमुकुराः पार्वणशशिना पूर्णिमारजनीवद्विभान्तिस्म, काश्चनाऽलक्तरसाभिरञ्जितचरणतला बालातपकान्तिं परिपीय विकसितारुणपद्मिन्यइव विरेजुः । काश्चन ससंभ्रमं सञ्चलन्त्यश्चरणस्खलनेन स्वस्थानात्संचलितमेखलाभिरवरुद्धपाद सञ्चारा मन्थरगामिन्यः करिण्यइव बभुः । काश्चन करस्थितपुष्पमालाः स्वपतिमिलनोत्सुका अच्छस्फटिकमालां करे कृत्वा जपपरायणाः स्वीकृतरतिरूपा इव तस्थुः । काश्चनस्त्रियो मरकतमणिमयगवाक्षेषु स्थिता गगनारविन्दविभ्रमं वितन्वन्त्यस्तंकुमारं विलोकयन्तिस्म, तद्रूपविलोकनकौतुकेन निर्निमेषदृष्टयः स्वर्गवासिन्य इव सर्वायुवतयोनिरीक्षन्तेस्म,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आदर्शाच्छस्फटिकाभेषु तासां हृदयस्थलेषु तस्य कुमारस्य प्रतिबिम्बं समाक्रमत, ततस्ताः प्रमदाः स्मिताननाः सपरिहासं सभयं सविश्वासं सासूयं सविलासं कामचेष्टासहितं सस्पृहं मिथःसंलापं चक्रुः—सत्वरगमने ! विलोकने कौतुकितां मां सहनय, निरीक्षणोत्सुके ? गृहाणेदं पतितं तवोत्तरीयवसनम् । चपलमानसे ? मुखकमलमाच्छादयन्तीं तवकेशच्छटां निवारय, मूढमते ? त्वदीयामिमां चन्द्रलेखां गृहीत्वा व्रज, कामान्धलोचने ! पूजार्थं समानीतानामेषां कुसुमानामाघातेन पतिष्यसि ! मदोन्मत्ते ? तवकेशपाशं तु समीचीनं कुरु, कुमारदर्शनोत्सुके ? तवकटिमेखलां स्थानवर्त्तिनीं विधत्स्व, पापाधमे ? गण्डस्थलस्थिते चञ्चले दन्तपत्रिके दूरीकुरु, मुग्धे ! तवपतितमिदं दन्तपत्रं गृहाण, यौवनाभिमानिनि ! तवपयोधरकुम्भौ वस्त्राञ्चलेन समाच्छादय, यत इमे सर्वेजनास्त्वां निरीक्ष्य हसन्ति, निर्लज्जे ! सञ्चलितं तव वस्त्रं तु परिधेहि, मृषाचातुर्यधारिणि ! सत्वरं गच्छ, विलोकनरसिके ! मां दर्शय, सन्तोषहीने ! कियत्कालं त्वं प्रेक्षिष्यसे ? ममाऽप्यवसरं देहि, तरलमानसे ! किञ्चित्तवपरिजनस्यापेक्षां विधेहि, पिशाचिनि ! तवेदमुत्तरीयं वसनमधःपतद्विलोकमाना जनाः कृतभूरिहास्या स्त्वदङ्गानि विलोकयन्ति, प्रेमान्धलोचने ! इमास्तेप्रियसखीरपि त्वं न गणयसि ! रे कुटिलगामिनि ! हृदयतापमुत्पाद्य मुधा त्वं जीवसि, मिथ्याविनये ! किमर्थं त्वं प्रच्छन्नतया कटाक्षबाणान्प्रक्षिपसि ! निर्भरयौवने ! स्वस्थमनसा विलोकयतां वक्षोजभारेण मां कुतः पीडयसि ! क्रुद्धमानसे ! त्वमग्रे याहि, पश्चादहमागमिष्यामि, मात्सर्योपहत स्वभावे ? त्वमेकाकिन्येव वातायनानि निरुध्य स्थास्यसि किमु ! प्रकटीकृतमन्मथविकारे ! इदं ममोत्तरीयं किमाहरसि ? नेदं त्वदीयम्, प्रमोदमत्ते ! किञ्चिदुचितं समाचर, अधीरलोचने ! गुरुजनसमक्षं निर्लज्जतया सत्वरं किं धावसि ?

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सत्त्वरगामिनि ? व्याकुलमानसा किं जाताऽसि ? मदनज्वरेण संभूतमिमंरोमाञ्चकञ्चुकं समाच्छादय, दुराचारे ? किमर्थं संभ्रान्तचेतसा व्याकुला दृश्यसे ? विकारभावे ? कामचेष्टां प्रकटयन्ती मध्यभागं मुधासंपीड्य किं खिद्यसे ? शून्यहृदये ? गृहान्निष्क्रमणमपि किं नस्मरसि ? विलोकनोत्सुके ? श्वासगतिमपिनिरुध्य किं पश्यसि ? भ्रान्तचित्ते ? नेत्रयुगलमुन्मील्य पश्य ? अजितसेनकुमारस्त्विदानीं व्रजति । इत्थं परस्परं वदन्त्यः सर्वाः पुराङ्गनास्तं कुमारं प्रशंसन्तिस्म, शीलवत्यपि धन्यतमाऽस्ति, यतो या कमलाधिकसौकुमार्यस्यास्य पाणिग्रहणं करिष्यति, कुमारमाताऽपि भाग्यवतीनां धौरेया विभाव्यते, या चैतादृशं सूनुं जनयामास । एवं नानाविधानि वाक्यानि प्रवदन्त्यः सर्वा युवतयोलग्नमण्डपं यावदजितसेनमनुव्रजन्त्यस्तमेवविलोकयन्त्योनेत्रसाफल्यं मेनिरे, काश्चन वधुव्यस्तुतेन कुमारेण सहैव परितश्चेलुः । यावन्मण्डपान्तिके वरघोटकः समागतस्तदाश्वश्रूर्वरं पटान्तरितं विधाय कुलमर्यादया संवर्द्ध्य मण्डपान्तः प्रवेशयामास, ततोऽजितसेनो योग्यासनमलञ्चकार, तस्यमण्डपस्य मध्य देशे चोरिकामण्डपोरचितस्तस्यचतुष्कोणेषु सौवर्णकलशानामुपर्युपरिश्रेणयोविराजन्तेस्म, तस्य मण्डपस्य सर्वस्मिन्भागे काञ्चनरजतमयकौशेयविनिर्मितोमहोल्लोचो निबद्धोऽस्ति, प्रासादाङ्गणभूमिर्नानावर्णविचित्रिता भूरिशोभां जनयति, प्रवालस्तम्भशोभिते चन्दनकपाटसन्नद्धे तस्मिन्मण्डपे विविधालङ्कारमण्डिताः कुलवध्वोऽनेका उपविष्टाः, चित्रकर्मकर्मठैश्चित्रकारैर्विविधवर्णैश्चित्रिता भित्तयः समन्तात्प्रकाशमानचन्द्रशोभां वितन्वन्ति, मणिमौक्तिकलताभिर्विराजमानैराभूषणैर्विचित्रवर्णैर्महामूल्यैर्वसनैर्भूष्यमाणशरीरावयवाः प्रमदागणा महोत्सवपूर्वकं प्रासादगवाक्षस्थिता मङ्गलगीतानि प्रगायन्ति, स्वर्गाङ्गणादवतीर्य देवाङ्गना महोत्सवं रचयन्तीव सर्वे मेनिरे । ततो विवाहकर्मकुशलाः पण्डिता लग्नसमयंविज्ञाय कन्यामानेतुं दासीवर्ग-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मादिशन्, पट्टबुद्धयस्ताः शीलवतीं प्रसाधयितुं सर्वसामग्रीं कर्तुं लग्नाः, पिष्टिकावासिततैलाभ्यङ्गपूर्वकं स्वच्छसुगन्धितवारिणा विहितमज्जना शुद्धाम्बरविभूषिताङ्गी, अगरुवासितकचकलापा, मलयजचन्दनविलिप्तवक्षोजा, साक्षतघुसृणार्चया विभूषितललाटपट्टा, कनकतन्तुनिर्मितरक्तकौशेयान्तरीया घुसृणरञ्जितसदशपीतवसनोत्तरीया, हरितवर्णां कमलतन्तुविनिर्मितामिव कञ्चुकीं सुदृढं वसाना, लाक्षारसरञ्जितपादतला, अङ्गुलीयकविराजितपादाङ्गुलीव्रजा, नूपुरकिङ्किणीव्रातेन वाचालितपादयुगा, कनकमयकाञ्चीसूत्रेण विभूषितकटीतटा, महार्घ्यमणिहारेण मध्यस्थितपद्ममणिमुक्तामालया च विराजितकण्ठलता, काञ्चनहारावलिभिः समालिङ्गितकपोतग्रीवा, नासिकेयेन भ्राजमाननासिका, कर्णावतंसराजितश्रवणयुग्मा, केयूराभ्यां विराजितभुजदण्डा, कङ्कणश्रेणिभिराश्रितकरकमला, ऊर्मिकालिङ्गितदशाङ्गुलिका, रक्तिकयारक्तीकृतनखकरतला, हीरकेण तिलकितचन्द्रार्द्धनिभभालदेशा, चूडामणिनोल्लसद्धम्मिल्ला, वेणीदण्डाग्रलम्बमानवेणीभूषणभूषितपार्ष्णिभागा, ताम्बूलवीटिकारसेनरक्ताधरोष्ठबिम्बा, सिन्दूरप्रकरेणसंभृतसीमन्ता, कज्जलनयना, कज्जलबिन्दुनाऽङ्कितगल्लदेशा सा शीलवती मणिमुकुरे मुखंविलोकमाना परां लज्जां प्रपेदे। तत्र समागताः समानवयस्यास्तां वरवर्णिनीं प्रबोध्य शनैः शनैः सञ्चारयामासुः, गजगामिन्या तया कुमारिकया सह तद्दास्यः करस्थितकुङ्कुमचन्दनसुरभितैलजलकर्पूरादिसौभाग्यद्रव्यपात्राः सञ्चेलुः। नूपुरादीनां रणत्कारेण बाधिर्यमुत्पादयन्त्यः कोकिलकण्ठ्यः सर्वाः सुन्दर्योमधुरस्वरं मङ्गलगीतानि गायन्तिस्म, क्रमेण सा शीलवती सहस्रदिनकरप्रभां वितन्वन्ती मातृकाभवनमाजगाम। ततो विवाहवेदिकायां योग्यासनोपविष्टयोर्वरकन्ययोः सुरभितैलादिसुवासितमालत्यादिकुसुमहाराः समर्पिताः, पण्डितप्रवरैः शास्त्रोक्तप्रयोगानुसारेण कन्यादानसङ्कल्पादिविधिपूर्वकं वरकन्ययोः करसम्मेलनसमयः प्रसा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





धितः, ततश्चतुर्विंशतितन्तुभिर्निर्मितां चतुर्हस्तप्रमाणां वरमालां तयोः कण्ठदेशे प्रक्षिप्योभयोर्वस्त्राञ्चलग्रन्थिं निबद्ध्य सधवयोषित्सु विवाहगीतानि गायन्तीषु पण्डितैर्यथाविधि चतुरस्रवेदिकायां पञ्चभूसंस्कारान्निर्वर्त्त्य विभावसुमानाय्य गृह्यसूत्रोक्त विधिनाऽऽहुतिप्रदानं विधाय वरं कन्याश्चोत्थाप्य वरस्यहस्ते कन्याहस्तं स्थापयित्वा लाजाहोमो विहितः । ततश्चतुःकृत्वो-मङ्गलभ्रमणं कारयित्वा वामभागे कन्यां दक्षिणे च वरमुपवेशयामासुः । कन्यायाश्चरणस्पर्शंकृत्वा वरेणसप्तपदीपूजनं विहि-तम् । ततो विहितकंसारभोजनाचारे वरकन्ये भूरिप्रमोदं प्रापतुः । ततः सौभाग्यवतीभिश्चतसृभिर्युवतिभिः कन्यायाः कर-कमले कुङ्कुमाक्षतैः स्वस्तिकं विधाय शिवपार्वती ब्रह्मसावित्री कृष्णरुक्मिणीवज्रीन्द्राणीनां नामान्युच्चार्य तेषामिव युवयोः शश्वत्सौभाग्यं भूयादित्यवादि । विद्वद्भिश्च कुङ्कुमतिलकानि विधाय मन्त्राभिषेककृत्यं पूर्णयित्वा शुभाशीर्वादोदत्तः । ततोवर-कन्योभयपक्षीयैर्जनैर्बहुधनप्रदानैर्विप्राः सन्तोषिताः, सधवाभिराशीर्वादपुरःसरा वर्द्धापनिका विहिता, ततो देवगुरूणां यथोचितभक्तिं विनिर्माय गोत्रदेवीं तौ दम्पती प्रणेमतुः । अथ जिनदत्तः श्रेष्ठी वरपक्षीयान्सर्वाञ्जनाननेकविधपक्वान्नादि भोजनैस्तर्पयामास । एवं कतिचिद्दिनानि तत्रस्थित्वाऽजितसेनो निजदेशगमनाय निजश्वशुरं विज्ञापयामास, तदाऽसन्तुष्टमान-सोजिनदत्तो निजचेतस्येवं विचारयामास, यन्मार्गेतानि विभूषणानि कियद्दिनानि तिष्ठन्ति ? तेषु ममत्वबुद्धिर्विफलैव, विदेश-वासिभिः प्रीतियोगोऽपि दुःखजनक इति विज्ञाय श्वश्रूश्वशुरौ हस्तौ नियोज्य सादरं नयनयोरश्रुधारां वहन्तौ निजजामा-तरमितिकथयामासतुः, कुमारेन्द्र ? इयं शीलवती पुत्र्याजन्मतोऽद्ययावत्सदा सुखक्रीडानुभाविन्यस्मदुत्सङ्गवर्त्तिनी प्राणतोऽ प्यधिकवल्लभाऽधुना भवते धनग्रन्थिरिव प्रदत्ताऽस्ति, अतो भवानपराः कन्या यदि परिणयेत्तथाऽपीयंप्राक्परिणीताऽऽत्मवत्प



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रिपालनीयेत्यभिधाय प्रयाणसमयज्ञौ तौ दम्पती निजामङ्गजां शिक्षयामासतुः । वत्से ! शीलवतीनां क्षमैवविभूषणमतःसर्वदाक्षमात्वयाधारयितव्या, यतः—क्षमाधनुः करेयस्य, दुर्जनः किं करिष्यति । अतृणे पतितो वह्निः, स्वयमेवप्रशाम्यति ॥ १ ॥ नरस्याभरणंरूपं, रूपस्याभरणंगुणः । गुणस्याभरणं ज्ञानं, ज्ञानस्याभरणं क्षमा ॥ २ ॥ क्षमा बलमशक्तानां, शक्तानां भूषणं बलम् । क्षमा वशीकृतिर्लोके, क्षमया किं न सिद्ध्यति ! ॥३॥ कदाचिदपि क्रोधवर्त्मनि त्वया न वर्त्तितव्यम् । परदूषणानि न निरीक्षितव्यानि, परापवादविचारश्च निजात्मनि नैवविधातव्यः, सर्वदा स्वपतिर्देववत्पूजनीयो माननीयश्च, भर्त्तुराज्ञानुसारेणसर्वथा वर्त्तितव्यम्, पूज्यतमानांश्वश्रूश्वशुरज्येष्ठादीनां मर्यादा कदापि नोल्लङ्घनीया, तेषां विनयः सदाचारेण सम्पादनीयः, प्रमादतमश्च सावधानतया सदा परिहर्त्तव्यम्, स्वकुलमर्यादाभङ्गोनविधातव्यः, भर्त्तुः प्राक् शयनादुत्थातव्यम्, निद्रामसेवमानात्तस्मात्प्राग् नशयितव्यम्, सपत्नीवर्गोभगिनीसमोमाननीयः, तदुक्तं वचनं प्रेम्णा स्वीकर्त्तव्यम्, मिथ्यात्वमूलोद्वेषभावो नचिन्तनीयः, भर्तृपरिवारजनेषु भुज्यमानेषु पश्चाद्भोक्तव्यम्, स्वाश्रितानां दासदासीनां पश्चादिगणानाश्च समवलोकनं विधातव्यम्, श्रीमज्जिनवरस्य सुगुरुजनस्य च प्रत्यहं पूजाभक्तिर्विशेषतोभावपूर्वकं विधेया, पतिव्रताव्रतं यथाविधि पालयितव्यम्, किमधिकशिक्षाप्रदानेन ? स्वयमेवत्वं सकलगुणवेदिनीवर्त्तसे, सुते ? श्वशुरं श्वश्रूश्च मातापितृवद्गणयित्वोभयकुलशोभा विवर्द्धनीया, तथैवत्वयावर्त्तितव्यं यथा सर्वेजनाः सन्तुष्टा भवेयुः । इत्थं सभार्येणजिनदत्तेन निजसुतां शिक्षयित्वाऽनेकविधमुक्तामण्यादिवस्तूनिवितीर्यशुभे मुहूर्त्ते प्रयाणाज्ञा प्रदत्ता । ततोऽजितसेनकुमारः स्वप्रियपत्नींसमादाय कतिभिर्दिवसैर्निजनगरमभीयाय, महाडम्बरेण रत्नाकरेण पौरैर्नगरप्रवेशोत्सवः कारितः । सर्वान्स्वजनबन्धुवर्गान्यथोचितसन्मानपूर्वकं सत्कृत्य-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स्वस्थानं विससर्ज। ततः शीलवत्यासमं सकुमारोऽभ्रंलिहे ध्वजपताकाभिर्मण्डितेऽतिमनोहरे प्रासादे जलधिफेनसंहतिसन्निभायां सुधोज्ज्वलप्रच्छादनपटाच्छादितायां परितोविकीर्णमल्लिकाकुसुमप्रकरायां वसनगुच्छादिभिर्विविधैर्दूष्यैः समलङ्कृतायां चन्दनमृगमदकेसरजलैः सिञ्चितायां शय्यायां शयानः काममन्त्रमाराधयामास। यस्याः समीपे चुवाचन्दनाऽगरुसुगन्धितन्तवः संस्थापिताः सन्ति। क्रमुकलविङ्गैलाताम्बूलजातिपत्रजातिफलतमाल पत्रादिमुखवासपदार्थाश्चम्पकपुष्पप्रभृतिसुरभिकुसुमानि च तत्र सुवासंतन्वन्ति, महारत्नखचितसुवर्णकलशा जलसंभृतास्तिष्ठन्ति, कर्पूरमिश्रितकुसुममालाभिः समलङ्कृतानि द्वाराणि विराजन्ते, यत्रनिबद्धानि मनोहराणि व्यजनानि सुरभिवातं विकिरन्ति, सूर्यप्रभानुकारिणोदीप्रदीपाः प्रज्वलन्ति, तुलितसुवर्णकान्तिनिचये रङ्गमण्डपे परितश्चित्रकारैश्चित्रितानि काचफलकानि विराजन्ते, तत्रसर्वत्र महार्घ्यरत्नकम्बलपटाः समाच्छादितास्तत्रशयनोपवेशनार्थमनेकविधान्युपकरणानि सन्ति। प्रासादाद्बहिर्भागे नर्त्तका नृत्यन्ति, वारयोषितश्च गायन्ति, इत्थं सर्वसाधनानामानुकूल्येन सर्वदा संसारसुखमनुभवतोस्तयोर्दिवसाः सुखेन व्यतीयुः। अथाऽन्येद्युरुडुगणविराजितपूर्णनिशाकरकलितायां निशायां निद्रायमाणं निजपतिं निषेवमाणा साशीलवती सहसोत्पन्नमेकंशृगालशब्दमशृणोत्, श्रुत्वा च पशुपक्षिणां भाषायां लब्धनैपुण्यासा स्वचेतसि विचारयामास--शृगालोऽयमेवंब्रूते—अस्यामापगायां निर्मलवारिप्रवाहेणोह्यमानं दैववशादेकंमृतकं समायाति, तत्कटिनिबद्धवस्त्राञ्चलेकोटीमूल्यानि पञ्चमहारत्नानि निबद्धानि सन्ति, तच्चशवं जानुदघ्नजलस्थितं नद्यास्तटसन्निधौ वर्त्तते, अतोयस्य रत्नग्रहणेच्छास्यात्तेनदेहिना तच्छवंबहिर्निष्कास्य रत्नानिस्वयंगृहीत्वा तन्मृतकं बुभुक्षिताय मह्यं प्रदीयताम्। इत्थं क्रोष्टुशब्दं मुहुः शृण्वन्ती पवित्रपतिसेवाधर्मैकसक्ता साशीलवती निजमानसे व्यचिन्त-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यत्-यदिदं मृतकं क्रोष्ट्रे दत्त्वा रत्नानि मया गृहीतव्यानि, यतः शृगालभाषितमिदं कालत्रयेऽपि वृथा नैव भवेत् । इदं वृत्तान्तं यदीदानीं भर्त्तारं विबोध्यतदग्रे कथयामि तथाऽपि स मद्वचनं सत्यं नमंस्यते, यदीदंकार्यं न करोमि तर्हि शिक्षिताया मे विद्यायाः किं फलम् ? द्रव्यस्य नास्ति मे प्रयोजनं, प्राणप्रियं परित्यज्य क्षणमपीतो गन्तुं मे क्रमौनक्रमतः, परं विद्यायाः परीक्षार्थं प्रतीत्यर्थश्चेदं कार्यं मया विधातव्यमन्यथा चमत्कारकरीं मे विद्यां लोकाः कथं जानीयुः ? इतिनिश्चयन्ती सा निजशय्यातः समुत्थाय मनोहरमेकं घटं हस्ते समादाय जलानयननिमित्तेन सरितं प्रतिचचाल, तत्रगत्वा साविलोकयतिताव-त्तत्तटिन्यास्तटसमीपगंशबंनिरीक्ष्य सद्यस्तत्रगत्वाशबकक्षानिबद्धवसनग्रन्थिछोटयित्वारत्नपञ्चकंगृहीत्वातच्छवश्चबहिर्निष्कास्य तरंमक्षुधार्दितायशृगालायप्रादात् । शृगालोऽपि तेनमृतकेन तृप्तिमियाय । ततःशीलवती स्नानंविधाय जलभृतं कुम्भंशिरसि निधाय निजसद्मनि समागता, रत्नग्रन्थिश्च निजशय्यायां गुप्तीकृत्यस्वचेतसिसाव्यचिन्तयत्-प्रभातेऽहं सर्ववृत्तान्तामिदंस्वामि-नोऽग्रे निवेद्य रत्नानि दर्शयिष्ये, यतोगाढनिद्रितोऽयं प्राणवल्लभो नैवेदानीं विबोधनीयः । अहो ? अस्याः कामिन्याः कीदृशं गाम्भीर्यम् ? ईदृशंदुर्घटंकार्यं विधाय यन्मनासि निरुत्सेकता स्थिरतामवाप, क्षुद्रहृदयानां प्रमदानांचेतसिक्षणमपिवार्त्ताविश्रामो न भवति, सद्विद्याप्राप्तेः सारस्तु स एवाऽस्ति, यत्प्रभावेण कदाऽपि गर्वाविर्भावो न स्यात्, विद्यावतांप्रवृत्तिः सदैवश्लाघनीया वर्त्तते । इतः शीलवतीगमनानन्तरं किमपिशारीरिकं कार्यमुद्दिश्य जागरितोऽजितसेनो निजभार्यामनवलोक्य स्वचेतसि विचाराभ्ररचनामकार्षीत्-अहो ? अधमेयं स्त्री नूनं स्वच्छन्दचारिणी दुराचाररता वर्त्तते, पापकर्मानुकारिण्यसौ वामनयना मया नैव रक्षणीया, तस्या मुखावलोकनमपि महापापस्य निदानमस्ति, अस्या दुष्कृत्यानि मयाऽद्यैव विज्ञातानि, दुष्टहृदयेयंभामिनी

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ममप्राणानपि कदाचिद्विहिंस्यात् ? असौरमा मत्प्राणतोऽप्यधिकतरावल्लभामेऽभवत्, यां महताडम्बरेणाहंपर्यणयं सा ममैववैरिणी समजनि, सुशीलाभार्यास्वाम्यर्थं स्वजीवितमपि त्यजति, दुःशीलातुनिजपतिंहिनस्ति, मित्रमपि शत्रुमिवपश्यति, वैरिणश्च मित्रबुद्ध्यापूजयति। ईदृक्स्वभावा स्त्रीजातिर्विद्यते, तथैव सादुर्नयस्यपात्रं साहसकार्याणां नगरं विविधदोषाणां खानिः कपटजालस्यवसतिर्मुधापवादानां करण्डको निगद्यते, यस्याहृदये हालाहलं तिष्ठति, जिह्वायाश्चमधु तिष्ठति। तस्मादियं कुलटा न विश्वसनीया-उक्तश्चान्यत्र-शास्त्रं सुनिश्चितधिया परिचिन्तनीय-माराधितोऽपिनृपतिः परिशङ्कनीयः। आत्मीकृताऽपियुवतिः परिरक्षणीया, शास्त्रे नृपेच युवतौ च कुतः स्थिरत्वम् ॥ १ ॥ कुलमर्यादामुल्लङ्घयन्त्याऽनयानिष्कलङ्कमस्मदीयंकुलंसकलङ्कं विहितम्। इयंवनिता महाऽनर्थानां मन्दिरमस्ति, सर्वेषामाश्चर्यजनकमस्याः कुलटायाश्चरित्रं किं वर्ण्यते ? कल्पद्रुमिव वाञ्छितार्थप्रदंमांविहाय साऽन्यस्मिञ्जारपुरुषे बद्धरागा सञ्जाता, तस्मात्तांधिगस्तु, अधिकं किं ब्रवीमि ? यतः—

विद्याबुद्धिपराक्रमप्रियवचोदानक्षमानम्रता–संपद्भोगभयेन सत्यकरुणासत्त्वादिभिः सद्गुणैः।
यो नारींकुलटां सुधीर्वशयितुं वाञ्छत्यसौस्नेहतः, पाथोधिं तरितुंशिलाप्लवगतः सद्यः समुज्जृम्भते ॥ १ ॥

दुराचारिणी भार्याकस्मिन्नपि काले केनाऽप्युपायेन वशवर्त्तिनी नभवति, इत्थं स्वमनसि विचिन्त्योद्विग्नमानसोऽजितसेनः शीलवतीमत्याक्षीत्। प्रभातेच तदेकध्यानपरायणो विच्छायवदनः स कुमारः पितुः सन्निधावुपविष्टस्तदा तज्जनकेन तदौदासीन्यकारणं पृष्टम्-ततो विनयाऽवनम्रः सोऽभाणीत्-हे पितः ! भवदग्रे किं कथयामि ! मदीयभार्या दुराचारिणीसमाना दृश्यते, ततो रत्नाकरोऽवादीत्-केयं दुराचारिणी ? तस्याः कीदृशान्याचरणानि ? तत्सर्वं कथय, अथाजितसेन-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्तद्वृत्तान्तमचीकथत्–धनधान्यादिमहर्द्धिसंजुष्टं चन्द्रपुराभिधं नगरं समस्ति, तत्र चन्द्रसेननामा नृपतिः प्रजाः पालयन्राज्यं करोति, न्यायकर्मकर्मठः स चैकदागुप्तवेषेण नगरचर्याविलोकमानोमध्याह्नसमये कस्यचिद्विप्रस्यगृहाङ्गणेस्थितस्तदानीं तद्गृहाधिपतिर्वृद्धविप्रो वायसान्नंगृहीत्वा गृहाद्बहिर्निश्चक्राम, ततोजलेनभूमिं संशोध्य तत्र वायसबलिं निक्षिपतस्तस्य वाङ्-वस्यहस्तसञ्चालनं निरीक्ष्य महतास्वरेण शब्दान्प्रकुर्वन्तोऽनेके वायसाः संमिलिताः, तेषां कटुध्वनितं निशम्य तस्य विप्रस्य भार्या भीतमानसेव कराभ्यां निजवक्षस्थलं ताडयन्ती भयप्रदमाक्रोशं चकार। निजभार्याया भयजनकामारटीं श्रुत्वा विप्रोऽवदत्–प्रिये ! कुतस्त्वंबिभेषि ? तत्पत्नी प्रोवाच–स्वामिन्नेतादृशं क्रूरं, वायसानां ध्वनिं कथम्। पतिव्रताः स्त्रियः श्रोतुं, जायन्ते मद्विधाः क्षमाः ॥ १ ॥ द्विजेनाऽवादि पतिव्रतपरायणे !–त्वादृशीनां सतीनां वै, मर्यादा शोभनेदृशी। स्वभाव सिद्धमेतद्धि, वर्त्तनंकुलयोषिताम् ॥ १ ॥ एवं तयोर्दम्पत्योर्वार्त्तालापंशृण्वन्भूपतिः स्त्रीचरित्रं विचित्रं मन्यमानः स्वचेतसिव्य-चिन्तयत्–नूनमियंस्त्रीव्यभिचारिणीदृश्यते, मृषावादिन्यसौ नारी स्वपातिव्रत्यंदर्शयितुं सरलस्वभावंनिजपतिं वञ्चयति, यतोऽहं काकशब्दादपिविभेमीति। तस्मादस्याः परीक्षा मयाकर्त्तव्या। एवंनिश्चित्यभूपतिर्निजस्थानं जगाम। ततस्तस्यामेव रात्रौ पुनर्वेषान्तरं धृत्वा तस्याः स्त्रिया गृहान्तिकेऽदृश्यतया स तस्थिवान्। तावन्निशीथसमये जाते निजपतिं निद्रितं विज्ञाय सादुराचारिणी निजसख्यैकयावेश्यया बलिकुल्माषादिसंभृतामेकांमञ्जूषामुत्पाट्य नगरपरिसरे सरिदन्तिकं जगाम, भूपतिरपितदीयचेष्टां विज्ञातुकामो गुप्ताकारतया तामनुययौ। अथ साद्विजपत्नी स्मशानतटवासिनः सर्वान्भूतप्रेतपिशाचा-न्बलिप्रदानेन तोषयित्वा दर्शनमात्रेण भयदायिन्यां प्रभूतजलपूर्णायां महावेगेनवहमानायां तस्यामापगायां निपत्य तेषां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





व्यन्तरादीनां साहाय्येन क्षणात्परतटमियाय। नृपतिरपि कौतुकजिज्ञासया प्रचण्डविक्रमोनिजसत्त्वबलेन नदीजलंतीर्त्वात-याऽलक्ष्यमाणस्तत्रगत्वा रहसि स्थितः। स्वच्छन्दचारिणी सा स्वच्छजलपूर्णायास्तस्यास्तटिन्यानिर्जने तटे निजसङ्केतितेन स्वाधीनीभूतेन महाऽवधूतवेषधारिणैकेन पुरुषेण साकंयथेच्छं विषयसुखंबुभुजे। तत्कृतमेतत्सर्वंकार्यंसाक्षाद्विलोक्यविस्मितो नृपतिः पुनः सरितं तीर्त्वास्वस्थानमाजगाम। विप्रभार्याऽपि निजं कृतार्थं मन्यमाना स्वकीयं गृहमियाय। प्रभाते भूपतिः समुत्थाय प्रसाधितप्राभातिककार्यः सिंहासनमारुह्य निजैर्दूतैस्तांदुष्टां समानाय्य रात्रिकृतं तदीयं चरित्रं सर्वजनसमक्षं संश्राव्य शिक्षा प्रदानपूर्वकं नगराद्बहिर्निष्कासयामास। तस्माद्-हे जनक ! स्त्रीचरित्राणां सीमा नविद्यते,-यतः-अन्येन सह जल्पन्ति, कुलटायोषितोऽपरम्। ध्यायन्ति चेतसा चान्यं, कुर्वन्ति नेत्रगोचरम् ॥ १ ॥ परस्य मारणोपायान्, रचयन्ति मदोत्कटाः। रिरंसया वशीकुर्व-न्त्यपरान्प्रेमरश्मिभिः ॥ २ ॥ अतः कुलीनैः कुलटानां सङ्गतिः सर्वथा दूरतः परिहर्त्तव्या। इत्थमजित सेनकुमारो दुराचारिण्याः कथां निवेद्य शीलवत्याः सर्ववृत्तान्तं पितुरग्रे कथयित्वा स्वस्योद्विग्नताया हेतुः सैवेति ज्ञापयित्वा विरराम। पुत्रोक्तं वृत्तान्तं समाकर्ण्य रत्नाकरः श्रेष्ठ्यपि सूनुवद्भृशं चिन्तातुरोऽजनि। ततस्ताभ्यामेवं मन्त्रितं, यदेवं दुर्गन्ध समानोलोकाऽपवादो यावद्बहिर्नप्रसरति तावत्तां शीलवतीं तत्पितुर्गृहं संप्रेष्य सर्वमिदं कार्यं साधनीयम्। एवं निश्चित्य शीलवतीं निजान्तिके समाहूय रत्नाकरो मायामयं वचनं प्रोवाच-स्नुषे ! तत्रपितुः पत्रं त्वदाह्वानकृते समायातम्, तत्र चावश्यकं कार्यं किमपि विनिर्दिष्टमस्ति, अतः सत्वरं तत्रत्वयागन्तव्यं, वसनादिकं गृहीत्वाद्रुतं सज्जीभव, विलम्बं माकुरु। इति श्वशुरवचनं निशम्य सा व्यग्रतामापन्ना निजचेतासि विचिन्तयति, तावन्निजविद्याबलेन स्वभर्त्तृश्वशुरयोश्चिकीर्षितं सर्वं विज्ञा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यपश्चात्तापपरायणा जज्ञे। हहा ! मयाऽपकृत्यं विहितम्, प्राणप्रियं भर्त्तारमनापृच्छय यत्सरितं प्रतिगताऽहम्, पुनरागत्यापि तस्मैतद्वृत्तान्तं मया न निवेदितम्, इदानीं किंकरोमि ? क्वगच्छामीति विकल्पयन्ती भयभीतचेताः सा समजनि। दुःखोदधिनिमग्नासा विचिन्तयितुं लग्ना, इदानीं मे विचारकल्पनापि निरर्थकैव, यतः पश्चाद्भाविनी याबुद्धिः सा यदि प्राक्समुत्पद्येत तर्हि कार्यहानिर्नस्यात्, लोकेषु च हास्यमपि नभवेत् । परन्त्विदानीमस्मिन्कार्येसङ्कल्पविकल्पकरणेनसृतम्, कुमित्रवचनमिवैतन्निष्फलमस्ति-यतः-परोक्षेकार्यहन्तारं, प्रत्यक्षे प्रियवादिनम् । वर्ज्जयेत्तादृशंमित्रं विषकुम्भंपयोमुखम् ॥ १ ॥ मधुरिम रुचिरं वचः खलाना-ममृतमहोप्रथमं पृथु व्यनक्ति। अथ कथयति मोहहेतु मन्त-र्गतमिव, हालहलं विषं तदेव ॥ २ ॥ अस्तुनामैषलोकापवादः, सत्यमेव सर्वत्र विजयते, सत्यवादिनां न कुत्राऽपि दूषणं सम्भवति। यदिमदीयंशीलं निर्मलमस्ति तदा न काऽपिक्षतिः। इत्थं ध्यायन्ती सा शुभशकुनं यावत्प्रेक्षते तावदेव दैवप्रेरितानीव प्रशस्यतराणि शकुनानि सञ्जातानि,-आपद्वार्धिनिमग्नानां, शकुनानि शुभानिवै। आलम्बनं समादिष्टं, यथा सज्जनसंगमः ।। १ ॥ अथ रत्नाकरः श्रेष्ठी रथं सज्जंकारयित्वा शीलवतीं तत्र सन्निवेश्य स्वयश्च सारथीभूय नगराद्बहिर्निश्चक्राम। तस्मिन्समये दुर्गापक्षिणी स्वस्थानादुड्डीय गृहीतमुखभक्षणा किञ्चिद्दूरं गत्वा पुनस्तत्रसमागत्यस्वभाषया किञ्चित्प्रोवाच, निजपतिप्राणसमानाया दुर्गाया वाचंनिशम्य निपुणमतिः शीलवती तद्वाक्यार्थं विचारयति-अनेन वचनेन मे भूरिलाभो भविष्यति, अर्धवर्त्मनिगत्वा पश्चादहमत्राऽऽगमिष्यामि, बहुमान पूर्वकश्चमेगृहप्रवेशः पुनर्भविष्यति,। ततोऽन्यान्यपि शकुनानि महाफलप्रदानि समभवन्। परन्तु सा स्वचेतासि महापीडामनुभवन्ती भृशं चिन्तातुरा जज्ञे । यतः—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कलङ्कशल्येन विभिन्नतां गतं, मनोयदीयं नितरां स दूयते । गताऽपराधा अपि सापराधतां, व्रजन्ति दैवोपहताहि देहिनः ॥ १ ॥ रत्नाकरोऽपि निजकार्यसमीहया महाजवेन रथाश्वौ चालयन्कश्चिन्मार्गमुल्लङ्घ्यप्रययौ, तावत्तत्रैकं मुद्गक्षेत्रं समागतम्, तच्चभूरिमुद्गाढ्यंविलोक्य महेभ्योजगाद–अस्यक्षेत्रस्याधिपतेर्बहुधान्यलाभोभविष्यति । तथाविधंश्वशुरवचनं निशम्य शीलवती प्रोवाच–भवद्भिर्यदुक्तं तत्सत्यं परन्तु तद्धान्यं तत्क्षेत्राधिपतिर्नैव भोक्ष्यते । इत्थं तद्गिरं समाकर्ण्य श्रेष्ठी हृदि व्यचिन्तयत्–अस्यक्षेत्रस्य स्वामी जीवन्नस्ति, कथं समुद्गान्न भक्षयिष्यति, स्वल्पमपिधान्यं भोक्ष्यते, विपरीतवादिनीयं विनयहीना विलोक्यते, अन्यथा विरुद्धवादं कथंब्रूयात्? ततोग्रेगच्छन्रत्नाकरस्तांबभाषे–स्नुषे ? रथादवतीर्यताम्, यतोऽग्रे महापङ्कवती सरिदेका समायाति, तत्रपङ्के निमग्नचक्रोरथोमन्दगतिर्भविष्यति, शून्यमपिस्यन्दनं बलाद्वाहयिष्यामि, तस्मात्त्वमधः समुत्तीर्य चोपानहौ हस्ते गृहीत्वा नदीप्रवाहमुत्तर । इत्थं श्वशुरवचनं श्रुत्वा सत्वरं रथादवतीर्य चरणयोरुपानहौधृत्वा शीलवती सरितमुत्तरति, तावत्तच्छ्वशुरेण कथितं–उपानहौत्वया करेणगृह्येतामन्यथा ते पङ्कविलिप्ते भविष्यतः । इत्थं निषिद्धाऽपि सा श्वशुरगिरमनादृत्य सोपानत्कचरणा नदीमुल्लङ्घ्य परतटमियाय । रत्नाकरस्तदा निजचेतसि विषण्णोबभूव, व्यचिन्तयच्च, धिगिमामधमां स्त्रियम्, मयानिषिद्धाऽपि सा निजेप्सितमकरोत् । ततोऽग्रेव्रजन्रत्नाकरोवर्त्मनिसमायान्तं निशितशरविद्धशरीरंधावमानं महाव्यथामनुभवन्तमेकं सुभटं निरीक्ष्येतितं प्रशशंस, अयं सुभटः पराक्रमशाली सुभटाग्रणीर्विद्यते । तच्छ्रुत्वाशीलवत्यवदत्–अयं पुरुषः कातरोदृश्यते, सारमेयवदयं केनचित्कुट्टितः पलाय्यव्रजति । इत्थं वधूवचनश्रवणाद्रत्नाकरोमनसिव्यचिन्तयत्–अहो ? महादुष्टेयं विपरीतभाषिणी मत्तोविरुद्धमेवभाषते । एवमग्रे प्रयाणं कुर्वति तस्मिन् दिव्यशोभा



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऽलङ्कृतमभ्रंलिहं महाविशालमेकंदेवसद्म समागतं, तद्विलोक्य रत्नाकरः प्रोवाच–देवमन्दिरमिदं मनोहरं, शोभतेऽमर विमानकान्तिहृत् । भूरिभाग्यजनदृष्टिगोचरं, जायते सुरवरैरुपासितम् ॥ १ ॥ तच्छ्रुत्वा शीलवतीजगाद–नेदं देवसदनं प्रशंसनीयमस्ति, तथैवनास्माकमुपयोगिदृश्यते । एतादृशंतस्या विरुद्धं वचनं समाकर्ण्य महेभ्यश्चेतस्यज्ञासीत्–यदियंप्रगल्भ-वनितावद्विपरीतवादिनी विलोक्यते । पुनरग्रे तस्मिन्व्रजति सति भूरिजनसमाकीर्णं महर्द्धिसम्पूर्णं विचित्रशोभाऽलङ्कृतं-रमणीयतरमेकं नगरं समागतम् । तन्मध्ये व्रजतारत्नाकरेण तदीयांदीव्यशोभां निरीक्ष्य प्रोक्तम्–महर्द्धिकैः सेवितमप्रमेयै-रखण्डितार्थैरकलङ्कभाग्भिः । नरोत्तमैः सर्वसुखैकधाम, विभ्राजते पत्तनमीक्षणीयम् ॥१॥ अतोऽत्रैवैकानिशा निर्गमयितव्ये-ति श्रेष्ठिवचनं निशम्य सा शीलवत्यवदत्–इदं नगरं कान्तारमिव शून्यं मे प्रतिभासते, नात्रक्षणमपिस्थेयमिति तस्या वि-रुद्धोक्तिश्रवणेन संजातमहाखेदः स पुरतोव्रजन्कृषीवलसमाजुष्टमेकं ग्रामंविलोक्य समाचख्यौ–शून्योऽस्ति धनधान्यसमृ-द्धिहीनो–ग्रामोऽयमाराधकहानिदायी । विज्ञायविद्वद्भिरिति स्वयंद्राक्, गन्तव्यमस्मात्सुभगे ! तिदूरम् ॥१॥ तदा शीलवती जगाद–अहो ? अस्मिन्ग्रामे प्राक्तनपुण्यप्रभावेणोत्तमजनानां निवासो भवति । इत्यादि तदीयं विरुद्धजल्पनं निशम्य स श्रेष्ठी सरलाभिप्राये स्वचेतसिपरं विषादमापन्नो व्यचिन्तयत्–अहो ? गृहीतविपरीतशिक्षणस्तुरङ्गम इवदुर्विनीतेयं विद्यते, दुष्टहृदयाचेयं सर्पिणीव वक्रगामिनी वर्त्तते, अस्या वध्वादुश्चरित्रं पुत्रेण यन्निवेदितं तत्सत्यमेवाऽस्ति, तथाऽपकृत्यं सेवितं नवेतितुनमयाप्रत्यक्षीकृतम्, परन्त्वनेनविरुद्धजल्पनेन तदनुमीयते । प्रत्यक्षविषये सा मृषावादिनीतिनिश्चयस्तु जायते । एवं-ध्यायतस्तस्यरथो ग्राममध्ये प्रयाति, तावत्तद्ग्रामवास्तव्यः शीलवतीमातुलः स्वसम्बन्ध्यागमनं ज्ञात्वा स्यन्दनान्तिकं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





समागत्य श्रेष्ठिनं शीलवतीञ्च महतादरेण स्वगृहंनिनाय। बहुधोपचारप्रयोगेण, स तयोः सत्कारगौरवंविधाय विविधैः पक्वान्नैस्तौ भोजयामास। सज्जनपुरुषोयदि सम्बन्धरहितं कञ्चन पुरुषं दृष्ट्वा वाक्कायमनोभिः स्वशक्त्यनुसारेण सेवाभक्तिं करोति तर्हि सम्बन्धिनस्तुका कथा? ततो रत्नाकरो मध्यान्हकालिकमातपमविगणय्य गमनैकमानसो रथं सज्जीकृत्य पुरतः प्रयाणमकरोत्। यतो यस्यचित्तमुद्विग्नीभूतमस्थिरञ्चस्यात्सनरो मनोहारिण्यपिस्थाने चिरं कथंतिष्ठेत्? ततः कियन्तं प्रदेशंव्रजतस्तस्य पुरोऽध्वनिघनच्छायो विस्तृतशाखाकदम्बक एकोन्यग्रोधः समायातः, रमणीयतरं निबिडच्छायंतंविलोक्य श्रान्तवाहो विश्रामार्थं रत्नाकरोरथादुत्तीर्य तस्य न्यग्रोधस्याऽधस्तान्निषसाद। तदानीं शीलवत्यपि रथादुत्तीर्य रथच्छायायामुपविष्टा। तदाश्रेष्ठी तां जगाद—स्नुषे? मनोहारिण्यां वटच्छायायामुपविश, एवं वदन्तंतमनादृत्य खिन्नमानसा सा संसारमसारतया जानन्ती योगिनीव वटच्छायां परित्यज्य दूरतस्तस्थौ। तस्मिन्समये समीपवर्त्तिनि कस्मिँश्चित्करीरपादपे संनिविष्टो वायसो ज्ञानवानिवाऽसकृदुच्चैः स्वरेणनिजभाषया वदतिस्म, तद्वचनंनिशम्य विज्ञातसर्वभाषा शीलवती तदर्थमनिच्छन्तीद्विधापि यथार्थं तद्विज्ञाय निर्ग्रन्थेवार्थमनर्थं भावयन्ती सांसारिकदुःखेन विषण्णहृदया तंवायसं प्रत्युत्तरमदात्—रेवायस ! भवदुक्तं सर्वं मया विज्ञातम्, परं किं करोमि ! पराधीनाऽस्मि, पूर्वमेकेनाऽपराधेन श्वशुरेणाहं त्यक्ताऽस्मि, इदानीं यदि द्वितीयमपराधं करोमि तर्हि जनकग्रामस्य दर्शनमपि दुर्लभं स्यादतोमयि प्रसादं विधाय स्वोक्तितो विरम। इति शीलवतीगदितानिवचांसिनिशम्य निपुणबुद्धिवैभवः श्रीरत्नाकरः सादरस्तां पप्रच्छ, हेस्नुषे ? भवत्या किमेतत्कथितम्? तद्रहस्यमगोपनीयंचेन्मां निवेदयेत्युक्ता साऽवदत्—तात ! भवदग्रे किं कथयामि ! अनर्थजनकं वचनमकथनीयमेववरम्। ततः श्रेष्ठिनो बह्वाग्रहं विलो-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्य गाढंनिःश्वसन्ती साऽवोचत्–पितृवर्य ? किमहं ब्रवीमि, मन्दभाग्यानामहं मूर्धन्याऽस्मि, यतोयस्यगुणंतनोमि, स एव मयि दोषदृष्टिः सञ्जायते। मञ्जिष्ठा सुगन्धितपादपा अश्माकराः कार्पासस्त्वक्सार इक्षु मृत्तिकामौक्तिकानि प्रवालानि चन्दनं कौशेयवसनं सुवर्णादिधातवो दक्षिणावर्त्तशङ्खो मधुमक्षिका उष्ट्रोऽश्वोहस्ती वृषभादयः सर्वे सर्वेषां सुखदायिनः सन्ति, तथाऽपि हतदैवस्य कस्यचिन्नरस्य दुःखदायिनो जायन्ते। अतो दैवगतिर्विचित्रा दृश्यते। यतः–आहारे शुचिता ध्वनौ मधुरता वाचालतामाधवे,बन्धौनिर्ममता जनेषुनिरता नीडेपराधीनता। एतैरेवगुणैर्युताःपरभृतास्त्यक्त्वाकिमेतेजना, वन्दन्तेखलुखञ्जनंक्रमिभुजं चित्रागतिःकर्मणाम् ॥ १ ॥ कांश्चित्तुच्छयतिप्रपूरयतिवाकांश्चिन्नयत्युन्नतिं, कांश्चित्पातविधौकरोतिचपुनःकांश्चिन्नयत्याकुलान् । अन्योऽन्यं प्रतिपक्षसंहतिमिमां लोकस्थितिं बोधय–न्नेषक्रीडति कूपयन्त्रघटिकान्यायप्रसक्तो विधिः ॥२॥ रामे प्रव्रजनं बलेर्नियमनं पाण्डोःसुतानां वनं,वृष्णीनां निधनं नलस्य नृपते राज्यात्परिभ्रंशनम्।काराऽगारनिषेवणंचमरणं सञ्चिन्त्य लङ्केश्वरे, सर्वोदैववशेन नश्यति नरः कोवापरित्रायते ॥३॥ एवं कथयित्वा सा पुनःश्वशुरं प्रत्याह–हे तात? भवद्भिर्दृढाग्रहेण यदिपृच्छ्यतेतदाहंयद्ब्रवीमि-तत्सावधानतयात्वया श्रूयताम्–निशिसुप्ताहं क्रोष्टुशब्दंनिशम्यसरितं प्रत्यगमम्, तत्र प्रवाहेणोह्यमानशबवसनग्रन्थिमाच्छोट्य पञ्चरत्नानि समानयम्, तानि च रत्नानि मया निजशय्यायां गुप्तीकृतानि सन्ति, इत्यादिकं पूर्ववृत्तान्तं सर्वं गृहनिर्गमनमारभ्यागमनावधि निवेद्य सा श्वशुरं सन्तोषयामास। तात? तेषां रत्नानां प्रभावेण मया गृहं परित्यक्तम्। अधुनाऽयंवायसः पितृगृहत्याजनस्योपायं निवेदयति–तद्यथा-अस्यकरीरस्याऽधोभागेनिधानीकृतानां दशकोटयोनिष्काणां सन्ति, तद्ग्रहणेच्छा यस्य भवेत्तेनदेहिनासुखेन तद्धनं गृह्यताम्, परन्त्वहमतिबुभुक्षितोऽस्मि, ततोऽहं भक्ष्यप्रदानेन तर्पयितव्यः। इत्थं वायसोक्तिं निशम्य पूर्वदुःखस्म-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





रक्षेन मयेत्यभाणि, हे वायस ? नास्तिमेद्रव्यजिघृक्षा, तवभक्षणमपि न दास्यामि। एवं निगद्यसाशीलवती तुष्णींबभूव । तदा-रत्नाकरः श्रेष्ठी तस्याईदृशानि वचनानि श्रुत्वा हृदिसंजातहर्षो ऽचिन्तयत्-अहो ? विशेषविज्ञानशालिनीयं वधूः पवित्रा-विद्यते, निरवधिरस्या बुद्धिप्रभावोऽस्ति, तथापीयं सत्यं वदतिवाऽसत्यामिति तत्परीक्षामिदानीं करोमि । इतिनिश्चित्य तन्नि-कटवर्त्तिनि कस्मिंश्चिद्ग्रामेगत्वा कुशीखनित्रादिसाधनानि समादाय सत्वरं पुनस्तत्र समागत्य निक्षिप्तधन इव स महेभ्यस्तां भूमिं निचखान, तत्क्षणात्तत्र यथादिष्टो धनराशिः प्रकटीबभूव । ततस्तस्मै वायसाय भक्ष्यं प्रदाय सुवर्णमणिमुक्तामय दशकोटीधनंरथे निक्षिप्य गुप्तसञ्चारः सश्रेष्ठी निजचेतसि विचिन्तयितुं लग्नः। इयं शीलवती वधूर्मद्गृहे साक्षात्कामदुघाऽस्ति, मुधापवादिनं मां धिगस्तु, तथैवाविमृश्यकारिणं ममसूनुमपिधिगस्तु । यतो मूढतया ससुतेनमया गृहादियं तिरस्कृत्य-निष्कासिता, तदतिनिन्द्यंकर्म मयासमाचरितम् । अद्यप्रभृति यदुचितं तद्विचार्यैव बहुधाविधेयमन्यथा तदविमृष्यकारि-मदनसेन नृपवत्परिणामेदुःखावहं जायते ॥

इतिश्रीजगद्विभूषणशासनमहोदधिशीतरश्मिस्वपरसमयपारदर्शितपोगच्छदिवाकरभव्यजनतारकप्रातःस्मरणीययोगनिष्ठाध्यात्मज्ञानविभाकरशास्त्र-विशारदश्रीमद्बुद्धिसागरसूरीश्वरशिष्यरत्नश्रीमदजितसागरसूरिविरचितेऽजितसेनशीलवतीचरिते रत्नाकरमहेभ्यतत्पत्नीश्रीदेव्या-अनपत्यत्वात्स्वेष्टदेवतोपासनाप्रसादजन्यपुत्रप्राप्तितदूढशीलवतीभार्याकृतविविधविद्याबलेन निशायां सरित्प्रवाहसमायातशबवसन-निबद्धपञ्चदीव्यरत्नलब्धितदुपरिमिथ्याकलङ्कप्रदानमजितसेनकथितदुराचारिणीदृष्टान्तश्रवणानन्तरं तज्जनकविहितशीलवती निर्यापणं पुनस्तद्विद्याप्रभावविज्ञानमित्यादिवर्णनाधिकारे प्रथमः प्रस्तावः समाप्तिमगमत् ॥ १ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## ॥ अथद्वितीयःप्रस्तावः ॥

देवेन्द्रासुरमानवेन्द्रनिवहैः संपूजितं भावतो-ध्यानारूढतया विशोध्य हृदयाम्भोजं सदायोगिभिः। प्रत्यक्षीकृतमूर्त्तिमाशु विमलं शान्तिप्रदं तान्तिदं। श्रीमच्छान्तिजिनेश्वरं प्रशमिताशान्तिं स्तुवे सर्वदा ॥१॥ अथरत्नाकरश्रेष्ठिनस्तादृशं वचनं श्रुत्वा शीलवती विनयान्विता तं पप्रच्छ। कोऽयं मदनसेनो भूपः? कीदृशश्चतेन साहसिकं कार्यं विहितम्? तत्सर्वं मामाचक्ष्व, ततोरत्नाकरोऽवादीत्-लक्ष्म्येकनिकेतनं लक्ष्मीपुराभिधं पत्तनं भुविविख्यातमस्ति, तत्र लक्ष्मीपतिनामामहेभ्यो निवसतिस्म, तस्य रूपगुणशाली मनोहरमूर्त्तिर्नानाविधविद्यानिपुणः सकलकलानिधानो धनपालाभिधेयः पुत्र आसीत्। तस्य च महा-दुर्गुणशीला द्यूतव्यसनपरायणा वेश्यासंगविधायिनो निन्द्यतमाचरणचणाः सुहृदोबभूवुः। सततं तेषामसत्सङ्गेन स धन-पालोऽपि तादृग्गुणो निष्पन्नः, जनः साधुजनसमागमेन सदाचरणसक्तोभवति, दुर्जनसङ्गेन च दुराचारी निष्पद्यते। यतश्चो-क्तम्-अणुरप्यसतां सङ्गः, सद्गुणं हन्ति विस्तृतम्। गुणो रूपान्तरं याति, तक्रयोगाद्यथा पयः ॥१॥ संतप्तायसि संस्थि-तस्यपयसो नामाऽपि न ज्ञायते, मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते, स्वातौ सागरशुक्तिसम्पुटगतं तन्मौक्तिकं जायते, प्रायेणाधममध्यमोत्तमगुणः संवासतोजायते ॥२॥ असत्सङ्गाद्गुणज्ञोऽपि, विषयासक्तमानसः। अकस्मात्प्रलयंयाति, गीतरक्तो यथा मृगः ॥३॥ आहृत्य रक्ष्यमाणाऽपि, यत्नेनान्तर्विरागिणी। असन्मैत्री च वेश्याच, श्रीश्चकस्य कदास्थिरा ॥४॥ पात्रमपात्रीकुरुते, दहतिगुणं स्नेहमाशु नाशयति। अमले मलं नियच्छति, दीपज्वालेव खलमैत्री ॥५॥ दुर्जनजनसंसर्गात्सज्जन-

५

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पुरुषोऽत्र दोषमायाति । रावणकृतापराधा-ज्जलनिधिरपिबन्धनं प्राप्तः ॥६॥ दुर्वृत्तसंगतिरनर्थपरम्पराया-हेतुः सतांभवति किं वचनीयमत्र । लङ्केश्वरो हरति दाशरथेः कलत्रं, प्राप्नोति बन्धनमसौ किलसिन्धुराजः ॥७॥ हंसोऽध्वगः श्रममपोहयितुं दिनान्ते, कारण्डकाकबककोककुलं प्रविष्टः । मूकोऽयमित्युपहसन्ति लुनन्तिपक्षा-न्नीचाश्रयोहि महतामपमानहेतुः ॥ ८ ॥ नीचाश्रयोन· कर्त्तव्यः, कर्त्तव्यो महदाश्रयः । पयोऽपिशौण्डकीहस्ते, वारुणीत्यभिधीयते ॥९॥ अहो ! दुर्जनसंसर्गा-न्मानहानिः पदेपदे, पावको लोहसङ्गेन, मुद्गरैरभिहन्यते ॥१०॥ अन्तर्मलिनसंसर्गा-च्छुतवानपिदुष्यति । यच्चक्षुःसन्निकर्षेण, कर्णोऽभूत्कुटिलाशयः ॥११॥ दुष्टता दुष्टसंसर्गा-ददुष्टमभिगच्छति । सुराबिन्दुनिपातेन, पञ्चगव्यघटी यथा ॥१२॥ विद्वानुपालम्भमवाप्यदोषा-न्निवर्त्ततेसौ परितप्यते च । ज्ञातस्तुदोषो ममसर्वथेति, पापोजनः पापतरं करोति ॥१३॥ वरं शून्या शाला न च खलुवरो दुष्टवृषभो-वरं वेश्यापत्नी नपुनरविनीता कुलवधूः । वरंवासोऽरण्ये न पुनरविवेकाधिपपुरे, वरंप्राणत्यागो न पुनरधमानामुपगमः ॥१४॥ वरं मौनं कार्यं न च वचनमुक्तं यदनृतं, वरंक्लैब्यंपुसां न च परकलत्राऽभिगमनम् । वरंप्राणत्यागो न च पिशुनवाक्येष्वभिरुचि-र्वरं भिक्षाशित्वं न च परधनास्वादनसुखम् ॥१५॥ ततःकियताकालेन लक्ष्मीपतिर्वृद्धावस्थामनुभवन्नसन्मार्गानुयायिनं पुत्रं विलोक्य स्वसन्निधौतं समाहूय विविधमुपदेशंदत्त्वा काश्चनहितवार्त्ताः कथयामास, तद्यथा-ज्ञानेनवयसा च ज्येष्ठानां पूज्यानां गुणिनाञ्च-कदाप्याज्ञा नोल्लङ्घयितव्या, परस्त्री मातृवद्विलोकनीया, परधनञ्चाश्मतुल्यंज्ञातव्यम्, परवस्त्वपहरणंद्यूतञ्चसर्वदाहेयम्, दुर्जनसंसर्गो नैवविधेयः, कपर्दिकामात्रोऽपिव्यवहारोदानादानतः शुद्धतरः पालनीयः, विश्वासपात्रेषु कार्यवाहकभृत्यादिषु सत्स्वपि सकल कार्यचिन्तां तदधीनां विधाय निवृत्तितया सद्मनि नशयितव्यम्, किन्तु सर्वं कार्यं स्वेनैवतत्रस्थित्वानिरीक्षणीयम्, तथैव



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महाहानिप्रदोदुर्गुणानां दुर्व्यसनिनां सङ्गः सर्वथा परिहर्त्तव्यः, सज्जनानां संसर्गोहितावहस्तस्मात्सुमित्रैः सहवस्तव्यम्। इत्थमनेकविधस्तत्पितुः सदुपदेशस्तस्यमानसंनाऽस्पृशत्। प्रत्युतप्रत्यहं स कुमित्रसंसर्गवर्द्धयामास। यतोदुर्जनपाशपतितो जनोहिताऽहितविधानविमूढोनूनमाप्तजनोपदिष्टसत्क्रियायां पराङ्मुखो भवति, मूर्खजनसम्पर्कजातदोषकर्दमाभिव्याप्तजनस्य सुधास्वादुः सदुपदेशोऽपिव्यर्थतां भजति। यतश्चोक्तम्—अज्ञः सुखमाराध्यः, सुखतरमाराध्यते विशेषज्ञः। ज्ञानलवदुर्विदग्धं, ब्रह्माऽपि तं नरं न रञ्जयति ॥ १॥ प्रसह्यमणिमुद्धरेन्मकरवक्त्रदंष्ट्राङ्कुरा—त्समुद्रमपि सन्तरेत्प्रचलदूर्मिमालाकुलम्। क्वचिदपि च पर्यटन् शशविषाणमासादयेत्, नतुप्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ २॥ लभेतसिकतासुतैलमपियत्नतः पीडयन्, भुजङ्गमपिकोपितं शिरसिपुष्पवद्धारयेत्। पिबेच्चमृगतृष्णिकासुसलिलंपिपासार्दितः, नतुप्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ ३॥ शक्योवारयितुं जलेनहुतभुक्छत्रेणसूर्यातपो—व्याधिर्भेषजसंग्रहैश्चविविधैर्मन्त्रप्रयोगैर्विषम्। नागेन्द्रो निशिताङ्कुशेन समदौ दण्डेन गोगर्दभौ, सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्यनास्त्यौषधम् ॥ ४ ॥ पोतोदुस्तरवारिराशितरणेदीपोन्धकारागमे, निर्वातेव्यजनं मदान्धकरिणां दर्पोपशान्त्यैसृणिः। इत्थं तद्भुविनास्ति यस्यविधिना नोपायचिन्ताकृता, मन्ये दुर्जनचित्तवृत्तिहरणेधाताऽपिभग्नोद्यमः ॥ ५॥ पण्डितोऽपि वरं शत्रु—र्नमूर्खोहितकारकः। वानरेणहतोराजा, विप्रश्चौरेण रक्षितः ॥ ६ ॥ वरं वनचरैर्भ्रान्तं, गिरिगह्वरकानने। न मूर्खजनसम्पर्कः, सुरेन्द्रभवनेष्वपि ॥ ७॥ किन्तेन जातु जातेन, मातृयौवनहारिणा। आरोहति न यः स्वस्य, वंशस्याग्रेध्वजोयथा ॥ ८॥ किं तयाक्रियतेधेन्वा, या न दोग्ध्रीनगर्भिणी। कोऽर्थः पुत्रेण जातेन, यो न विद्वान्नधार्मिकः ॥ ९॥ एकेनशुष्कवृक्षेण, दह्यमानेन वह्निना। दह्यतेतद्वनं सर्वं, दुष्पुत्रेण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कुलं यथा ॥ १० ॥ कोटरान्तः स्थितो वह्नि-स्तरुमेकंदहेत्खलु। कुपुत्रस्तु कुले जातः, स्वकुलं नाशयत्यहो ॥ ११ ॥ अजातमृतमूर्खाणां, वरमाद्यौ न चान्तिमः। सकृद्दुःखकरावाद्या-वन्तिमस्तु पदे पदे ॥ १२ ॥ अजातमृतमूर्खेभ्यो-मृता जातौ सुतौ वरौ। यतस्तावल्पदुःखाय, यावज्जीवं जडोदहेत् ॥ १३ ॥ यस्य पुत्रो नवै विद्वा-न्नशूरो न च धार्मिकः। अप्रकाशं कुलं तस्य, नष्टचन्द्रेवशर्वरी ॥ १४ ॥ अविनीतः सुतो जातः, कथं न दहनात्मकः। विनीतस्तु सुतो जातः, कथं न पुरुषोत्तमः ॥ १५ ॥ दाने तपसि शौर्ये च, यस्य न प्रथितं मनः। विद्यायामर्थलाभे च, मातुरुच्चारएवसः ॥ १६ ॥ निरुत्साहंनिरानन्दं, निर्वीर्यमरिनन्दनम्। मास्मसीमन्तिनी काचि-ज्जनयेत्पुत्रमीदृशम् ॥ १७ ॥ वरंगर्भस्रावो वरमपि च नैवाभिगमनं, वरंजातप्रेतो वरमपि च कन्यैव जनिता। वरं वन्ध्या भार्या, वरमपि च गर्भेषुवसति-र्नचाविद्वान्रूप-द्रविण गुणयुक्तोऽपि तनयः ॥ १८ ॥ पित्रोर्नैव वचः शृणोति दिवसत्यागेव्रजत्यालयं, यान्तीभिर्युवतीभिरध्वनिमुहुः कौतूहलं विन्दति। बन्धूनामुपदेशवाचि ददति क्रोधैकतानंवचः, साधून्निन्दति दुर्जनं च मनुते मित्रं कुपुत्रोजनः ॥ १९ ॥ एवं चिन्तातुरमानसः प्रतिदिवसं व्याधिग्रस्तशरीरो लक्ष्मीपतिर्विशेषतः क्षीणसत्त्वः स्वकीयमवसानसमयं विज्ञाय तस्मिन्समये धनपालं गृहेऽपश्यन्स्वभृत्यान्नगराभ्यन्तरेतमाह्वातुंप्रैषीत्। स्वाम्याज्ञैकविधायिनस्तेऽपि सर्वत्र भ्रमन्तः क्काऽपि तच्छुद्धिमलभमानाः खिन्नास्ततोभूरिप्रयासेन भ्रममाणास्तं वारवनितावेश्मनि क्रीडमानं धनपालं निरीक्ष्य विज्ञापयामासुः-बन्धो! त्वदीय जनकोऽद्य सुरेन्द्रलोकं, गन्तुं समुद्यतमतिः कृतधर्मकृत्यः। सान्निध्यमिच्छति विशेषतयात्वदीयं, सत्स्वप्यनेकनिजबन्धुजनेषु वृद्धः ॥१॥ अतस्त्वां समानेतुंवयमागताः, विलम्बंमाकुरु, तदा धनपालेन कथितम्-यूयं सर्वे सत्वरं व्रजत, भवतामनुपदमहमागच्छामि,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्थंनिगद्यस भृत्यान्निजगृहंप्रैषीत् । इतो गृहकर्मणि संस्थिता लक्ष्मीपतेः सम्बन्धिनोधनपालागमनं प्रतीक्षन्ते तावद्भृत्यास्तत्रसमागत्य तदुक्तं वचनमाचख्युः । कियान्समयोव्यतीतस्तथाऽपि व्यसनासक्तमानसः सतु नागतः । वितथवादिनांवचनमप्रमाणं सदा विज्ञेयम् यतः—नाऽसत्यवादिनः सख्यं, न पुण्यं न यशोभुवि । दृश्यतेनाऽपि कल्याणं, कालकूटमिवाश्नतः ॥ १ ॥ असत्यमप्रत्ययमूलकारणं, कुवासनासद्म समृद्धिवारणम् । विपन्निदानं परवञ्चनोर्जितं, कृताऽपराधं कृतिभिर्विवर्जितम् ॥ २ ॥ यशो यस्माद्भस्मीभवतिवनवह्नेरिववनं, निदानं दुःखानां यदवनिरुहाणामिव जलम् । न यत्र स्याच्छायाऽऽतप इव तपः संयमकथा, कथञ्चित्तन्मिथ्या वचनमभिधत्ते न मतिमान् ॥ ३ ॥ जिह्वैकैवसतामुभेफणवतां सृष्टुश्चतस्रो मता—स्ता सप्तैव विभावसोर्नियमिताः षट्कार्त्तिकेयस्यच । पौलस्त्यस्यदशैवताः फणिपतेर्जिह्वासहस्रद्वयं, जिह्वालक्षसहस्रकोटिगणना नो दुर्जनानां मुखे ॥४॥ दुर्जनः प्रियवादीच, नैतद्विश्वासकारणम् । मधु तिष्ठति जिह्वाग्रे, हृदि हालाहलं विषम् ॥५॥ दुर्जनेन समंसख्यं, प्रीतिश्चैवनकारयेत् । उष्णो दहति चाङ्गारः, शीतः कृष्णायतेकरम् ॥६॥ दृष्टो वा सुकृतशतोपलालितो वा, श्लिष्टो वा व्यसनशताभिरक्षितो वा । दौः शील्याज्जनयति नैवजातुसाधु- र्विस्रम्भं भुजग इवाङ्कमध्यसुप्तः ॥७॥ एकः खलोऽपि यदि नाम भवेत्सभायां, मोघीकरोति विदुषां निखिलप्रयासम् । एकाऽपि पूर्णमुदरं मधुरैः पदार्थै—रालोड्य रचयति हन्त न मक्षिका किम् ॥ ८ ॥८॥ हालाहलं खलु पिपासतिकौतुकेन, कालाऽनलं परिचुचुम्बिषति प्रकामम् । व्यालाधिपञ्च यततेपरिरब्धु मद्धा, योदुर्जनं वशयितुं कुरुते मनीषाम् ॥ ९ ॥ प्राक्पादयोः पतति खादति पृष्ठमांसं, कर्णे कलं किमपि रौतिशनैर्विचित्रम् । छिद्रं निरूप्य सहसा प्रविशत्यशङ्कः, सर्वं खलस्यचरितं मशकः करोति ॥ १० ॥ पुनरन्यो भृत्यस्तैस्तस्याह्वानकृते प्रेषितः,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सोऽपि तं तथैवकथयित्वा पश्चाद्वलितः, तथाऽपि धनपालस्तु गृहं नागमत् । एवं त्रिश्चतुर्वारं समाहूतोऽपि स नागतस्तदानीं श्रेष्ठिनो मुख्येन कार्यवाहकेन विज्ञातमस्मदीयः सर्वप्रयासो विफलो जातः, रे ! इदानीं किं कर्त्तव्यमितिचिन्तामग्नेनतेन पञ्च पट् पुरुषास्तमानेतुं युगपत्प्रेषिताः, तेषां बलात्कारं वीक्ष्य तस्माद्वेश्याग्रहान्निष्क्रम्य स स्वगृहं प्रयाति तावत्तस्मिन्नेव-वर्त्मनि निजसद्मनिस्थिताऽन्या पुरयोषित् कटाक्षमिषेण स्वसन्निधौ तं समाजुहाव । ततो ज्ञाततदीयसङ्केतोधनपालः स्व-गृहगमनात्पराङ्मुखीभूय तत्र गन्तुं प्रवृत्तस्तस्मिन्नवसरे भृत्यास्तं प्रोचुः-श्रेष्ठिसुत ? तीर्थकल्यो भवतः पिता मरणाभिमुखो-जातस्तथाऽपि त्वं वेश्यागृहं व्रजसि, तदनुचिताचरणं परित्यज्य सत्वरं स्वगृहं गत्वा तातस्य संभावनां कुरु । इत्थं भृत्यैर्नि-वारितोऽपि धनपालस्तान्निर्भर्त्स्य वाराङ्गनानिकेतनं जग्मिवान् । भृत्यवर्गस्तु बहिःस्थितस्तावच्छ्रेष्ठिगृहादन्ये जना स्तत्र समागत्य श्रेष्ठिनोमरणवृत्तान्तं तं निवेदयामासुः । पितृमरणंश्रुत्वाऽपि विषयासक्तमानसो धनपालस्तद्गृहान्ननिश्चक्राम । ततो व्याकुलितचेतसः सर्वे जना व्याघुट्य श्रेष्ठिगृहं समाजग्मुः । पितृमरणंश्रुत्वाऽपि वेश्यासक्तचेतसं धनपालमनागतं विज्ञाय तस्यश्रेष्ठिनोमेधावीमुख्यश्चैकः कार्यकर्त्तानिजाज्ञानुवर्त्तिनोऽन्यान्कार्यवाहकजनान्संमेल्यनिजगाद-महेभ्यस्त्वधुना कालवशंगतः, तत्पुत्रश्च दुर्व्यसनाभिभूतो वेश्याजनप्रसक्तबुद्धिः सञ्जातोऽस्ति । तस्मात्स्वल्पकालेनैव निजजनकोपार्जितानां महासम्पदां व्ययं द्युतादिव्यसनपरायणैः कुमित्रैः सह क्रीडमानोधनपालो हन्त करिष्यति । तन्मित्राणिचव्यापारादिकार्येषु तस्य मनो व्याकुलयिष्यन्ति, तस्मादस्माभिरस्य सर्वसंपदः संरक्षणीयाः, यावत्तस्य हस्तगतास्ता न भवेयुः । इत्थं विचार्य तदानीमेव तस्य श्रेष्ठिन उत्तरक्रियासाधकमात्रं द्रव्यं मुक्त्वाऽवशिष्टं सर्वं धनं स प्रधानः स्वसाच्चक्रे । किञ्चिद्द्रव्यञ्च तत्पत्न्यै



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वितीर्य तां श्रेष्ठिनीं तत्पितु गृहं प्रेषयामास । ततः स प्रधानः स्वयं यत्र धनपालोऽवस्थित स्तत्र वेश्यासदने जगाम, तत्र स्थितं धनपालंदृष्ट्वा स प्रोवाच–कुमार ! भवतस्तातोऽधुना स्वर्गगामी सञ्जातस्तस्मादिदानीं भवता स्वगृहेगन्तव्यमन्यथा लोके तव महादुर्यशोजनिष्यति, इति प्रधानोक्तिं समाकर्ण्य धनपालोऽवदत्–रे प्रधान ! भवानत्रकुतः समायातः ? सत्त्वरमह मागच्छामि । एवमसमञ्जसंतद्वचनं निशम्य प्रधानः स्वमनसि ज्ञातवान्, यदिदं धनरक्षणं प्रागेवविहितं तन्मया योग्यमेव कृतम् । यावदयं स्वजनकोपार्जितं द्रव्यमसेविष्यत तावद्विशुद्धमार्गंनागमिष्यत् । आधुनिकप्रवृत्तिनिरीक्षणेन प्रतिदिनं तस्यदुःस्थितिः संभाव्यते । इति चिन्तयता प्रधानेन पुनः स जगदे–कुमार ! नायं विलम्बनसमयः पितृमरणे श्रुतेसति कार्यशतान्यपि विहाय गमनमेवोचितं सज्जनानाम् । इत्थं प्रधानगिरं समाकर्ण्य विषयान्धमतिर्धनपालोऽवदत्–रे प्रधान ! त्वं गृहं याहि, गृहागमनेन मे किं प्रयोजनम् ? यूयं सर्वे प्रधानवर्गाः सम्बन्धिनश्च मिलित्वा मृतं ममपितरं शिबिकामारोप्याऽस्मिन्नेव मार्गे समानयत । अहमपि भवद्भिः सहास्मादेवस्थानादागमिष्यामि, एवं कृते मम गमनागमनप्रयासोऽपि न स्यात् । स्मशानभूमौ च वयं सर्वे सार्द्धं गमिष्यामः । ईदृग्विधां तदुक्तिं श्रुत्वा चेतसि चमत्कृतिंदधानः प्रधानस्तमवोचत्–श्रेष्ठिसूनो ! अनागतेत्वयि भवतः पितामरणाऽवसरे स्वयमेव समग्रं धनं भाण्डादिकं सकलं वस्तुजातं रथाश्वोद्यानप्रासादप्रभृति सर्वं च धर्मकार्येषु न्ययुङ्क्त । अवशिष्टं किमपिनास्ति, यदि तस्मिन्समये भवानागमिष्यत्तदा स कतमद्धनं भवदर्थेऽरक्ष्यत् । परन्तु त्वां मधुबिन्दुलोभेन वेश्याजनमोहपाशे निपतितं विज्ञाय सर्वं धनं तेन व्ययितम् । भवतश्च कृते वासगृहमेकमवशिष्टमस्ति, तथैव कानिचित्पात्राणि मह्यं समर्पितानि त्वदीयजनकेन, यस्माद्भवतः पत्नी बहुदुःखिता जाता, पुन-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





भवतो दुराचरणेन सोद्विग्ना सा दुरन्तं परिणामं विनिश्चित्य कूपपातं विधायाऽम्रियतेति प्रधानोक्तिं कर्णगोचरीकृत्य धनपालस्तमपृच्छत्-प्रधानाग्रणीः ! सा वराकी कूपे पतिता तदानीं युष्माभिर्बहिर्निष्कासिता न वा ? प्रधानोऽवदत्-भवतः पितुरवसानकालोऽभवत्तस्मिन्नेवक्षणे तया कूपपातो विहितस्तस्मादस्माभिस्तदीयमपकृत्यं न ज्ञातं कैश्चिदपि, यतो वयं सपरिवारा महेभ्यस्यान्तकालोचितायां क्रियायां व्यग्रा अभूम, कियन्तो जनाश्च भवन्तं समाह्वातुं व्याकुलचेतसोऽभवन् । अतस्तदवसरं स्वचिकीर्षितानुकूलं ज्ञात्वा सा दैववशात्केनाऽप्यदृष्टसञ्चारा निन्द्यतमं कूपपतनमकरोत् । कुतश्चित्कार्यवशात्तस्याः शुद्धिर्विहिता, तदाऽस्माभिः प्रासादे सा नालोकिता । तदनुसर्वत्र जनैःसा परिशोधितातथाऽपि कुत्रचित्तच्छुद्धिर्नालभ्यत, ततः खिन्नास्ते वाप्यादिकं विलोकयन्तः कूपे पतितां प्राप्तपञ्चत्वां तां निरीक्ष्यास्माकं सन्निधौ शीघ्रंसमागत्य तद्वृत्तान्तं न्यवेदयन् । इदानीमपित्वत्पत्नीदेहः कूपोपकण्ठे पतितोऽस्ति, तादृशं तद्वचनं निशम्य धनपालः समाचख्यौ-स्त्रीमरणवृत्तान्तं श्रुत्वाऽमन्दानन्दः सञ्जातः, जनकस्य मरणं विदित्वा यो मे विषादोऽभूत्सोऽस्याः स्त्रियाउदन्तं निशम्योपशान्तः । संसार काननेनिपतितानां सुखदुःखे समाने भवतः, अतस्तज्जन्यशुचं शिथिलीकृत्य त्वं गृहं याहि, द्वयोर्मृतवपुषी गृहीत्वा भवन्तः सर्वेऽत्रागच्छन्तु, अहमप्यत्रस्थितो भवद्भिः सार्द्धं स्मशानभूमिं समागत्य द्वयोर्देहयोर्यथाविधि संस्कारं विनिर्माय दाहक्रियां पूर्णयिष्यामि । ईदृग्विधेन तदीयवचनेन सञ्जातक्रोधः प्रधानोऽवदत्-भवानस्माकं स्वामिनः सूनुस्तस्मादियच्चिरं भवता यदुक्तं तत्सर्वं श्रुतमस्ति, परन्त्विदानीं त्वदविनयेन त्याजितमर्यादोऽहं त्वां किञ्चित्कथयामि-श्रेष्ठिवंशे भवादृशः कुपात्रोऽकृत्यसेवी कोऽन्योऽङ्गारकसदृशःपुत्रोभवेत् ? त्वादृशं मूर्खं कुत्राऽपि न व्यलोकितवानहम् । मूर्खशिरोरत्न ! यौ मातापितरौ



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समुत्पाद्याऽनेकविधं त्वदर्थे दुःखं विषह्य पोषणञ्च विधाय त्वामवर्द्धयताम्, वृद्धावस्थायां च निजसुखहेतवे धृताभिलाषौ यौ त्वामपालयताम् तस्येदं फलं त्वया प्रदत्तम्। यतस्तस्यान्तसमयोऽद्याऽवर्त्तत, त्वदाननविलोकनेच्छया त्वांमुहुः स्मरँस्त्वत्पिता दैवगतिं प्रयातस्तावत्पर्यन्तं वेश्यापाशनिबद्धो विषयान्धीभूतहृदयस्त्वमिदानीमपि मया सार्द्धमनागच्छन्नस्यादुराचारिण्या वाराङ्गनाया मुखमुद्रां निरीक्ष्योपविष्टोऽसि। अस्मादधिकं धिक्कारपदं किमन्यत्? रे वैयात्य! भूरिकष्टेन सम्पादिताः सर्वा महर्द्धयस्त्वया क्षणिकसुखवाञ्छयेदृग्विधेन नीचकर्मणा विनाशिताः। कुलकलङ्कदायकस्त्वत्समानो दुष्टकर्मविधायकः कोऽन्यः? भवादृशानां निर्लज्जानामग्रे किं बहुभाषितेन! रे पापाधम! वेश्याङ्गनाः कमनीयरूपेन्धनेन संवर्द्धिताः प्रचण्डकामाग्नेर्ज्वालाः सन्ति, यासु च कामिपुरुषैर्यौवनानि धनानि च हूयन्ते, यतश्चोक्तम्–अयंच सुरतज्वालः, कामाग्निः प्रणयेन्धनः। नराणां यत्र हूयन्ते, सुगुणानि धनानिवै ॥ २ ॥ इह सर्वस्वफलिनः, कुलपुत्रमहाद्रुमाः। निष्फलत्वमलं यान्ति, वेश्या विहगभक्षिताः ॥२॥ तस्माद्धेमूढमते! वेश्याजनसम्पर्केण यौवनधनानां व्ययं कथं करोषि? पुनः शास्त्रकारेण ज्ञापितम्–कुलीनेन जनेन कस्मिन्नपि समये वेश्यासङ्गो न विधेयः, वेश्याङ्गनानां चरितं विद्वद्भिः किञ्चित्प्रगीतं तच्छृणु–धनाशाकैतवस्नेहै–र्वितथैश्चित्ततोषणम्। एकमप्यस्तिनास्मासु, कथं वेश्यासमा वयम् ॥ १ ॥ कष्टं जीवति गणिका, गणकोऽपि च राजसेवको वैद्यः। दिवसे दिवसे मरणं, परस्ययच्चित्तरञ्जनं वृत्तिः ॥ २ ॥ न पर्वताग्रे नलिनी प्ररोहति, न गदर्भा वाजिधुरं वहन्ति। यवाः प्रकीर्णा न भवन्ति शालयो–नवेशजाताः शुचयस्तथाङ्गनाः ॥ ३ ॥ हारहीरकहिरण्यभूषणै–स्तोषमेति गणिका धनैषिणी। प्रेमकोमलकटाक्षवीक्षितैरेव जीवतिकुलाङ्गनाजनः ॥ ४ ॥ एता हसन्ति च रुदन्ति च वित्तहेतो–र्विश्वासयन्ति पुरुषं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





न च विश्वसन्ति। तस्मान्नरेण कुलशीलसमन्वितेन, वेश्याः श्मशानघटिका इव वर्जनीयाः॥ ५॥ जात्यन्धाय च दुर्मुखाय च जराजीर्णाऽखिलाङ्गायच, ग्रामीणाय च दुष्कुलाय च गलत्कुष्ठाऽभिभूताय च। यच्छन्तीषु मनोहरं निजवपुर्लक्ष्मीलवश्रद्धया, पण्यस्त्रीषु विवेककल्पलतिकाशस्त्रीषु रययेत कः॥ ६॥ केशः कुन्दमिषादिवोपहसति द्रव्यैर्विहीनाङ्गना-न्न्यूनं ग्रन्थिधनं विलोकितुमिवोद्ग्रीवः स्तनस्तिष्ठति। प्रेमच्छेदकृपाणवल्लिसुषमारोमालिरालम्बते, यस्याः सा कथमस्तु चेतसि चमत्काराय वाराङ्गना॥ ७॥ वाप्यांस्नाति विचक्षणो द्विजवरो मूर्खोऽपिवर्णाऽधमः फुल्लां नाम्यति वायसोऽपि हि लतां या नामिता बर्हिणा। ब्रह्मक्षत्रविशस्तरन्ति च यया नावा तयैवेतरे, त्वं वापीव लतेवनौरिवजनं वेश्याऽसि सर्वं भज॥ ८॥ तस्माद्धे धनपाल! अधुनाऽपि सन्मार्गं समाश्रय, दुर्जनोचितं दुराचारं परिहर, पैतृकं धनं त्वया स्वहस्तेनैव विनाशितमग्रे तव का गतिर्भविष्यति? तस्य त्वं विचारं कुरु, यथा कट्वौषधं भक्षणकाले दुःखजनकं परिणामे सुखकरं शरीरस्थव्याधिविनाशनेन सम्पद्यते, तथैवममेदं वचनमायतौ हितकरं तव भविष्यति, यावदेवं न मन्यसे तावत्त्वं सुखभाजनं कदाऽपि न भविष्यसि, उक्तश्चान्यत्र-परिणामसुखेगरीयसि, व्यथकेऽस्मिन्वचसिक्षतौजसाम्। अतिवीर्यवतीवभेषजे, बहुरल्पीयसि दृश्यतेगुणः॥ १॥ अतोहितवाक्यमनादृत्य ये स्वेच्छावर्त्तिनो भवन्ति ते नराधमा दुरन्तदुःखोदधौ निमज्ज्य म्रियन्ते। हे श्रेष्ठिन्! परितोदृष्टिं प्रसार्य विलोकय, अद्ययन्निरीक्षसे, तत्परस्मिन्दिने न द्रक्ष्यसे। तव पितुर्मरणात्तद्गृहस्य व्यवस्था सकलाऽपि त्वदीयकुत्सिताचरणेन विलयंगतास्ति। त्वत्पितुरग्निसंस्कारं विधाय सर्वेजनाः स्वस्वगृहं गमिष्यन्ति, दुःखभागिनस्तवमुखाऽवलोकनमपि ते नकरिष्यन्ति। यतः-सर्वे सम्बन्धिनः स्वार्थैकपरायणा भवन्ति, तद्यथा-वृक्षं क्षीणफलं त्यजन्ति विहगाः शुष्कं सरः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सारसा–निर्द्रव्यं पुरुषं त्यजन्ति गणिका भ्रष्टं नृपं मन्त्रिणः । पुष्पं पर्युषितं त्यजन्ति मधुपा दग्धं वनान्तं मृगाः, सर्वः कार्यवशाज्जनोऽभिरमते तत्कस्य कोवल्लभः ॥ १ ॥ दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः सङ्गात्सुतो लालना–द्विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात् । ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रया–न्मैत्री चाप्रणयात्समृद्धिरनयात्स्वार्थी सदा बान्धवः ॥ २ ॥ मित्रं स्वच्छतया रिपुं नयबलैर्लुब्धं धनैरीश्वरं, कार्येण द्विजमादरेण युवतिं प्रेम्णा शमैर्बान्धवान् । अत्युग्रं स्तुतिभिर्गुरुं प्रणतिभिर्मूर्खं कथाभिर्बुधं, विद्याभीरसिकं रसेन सकलं स्वार्थेन कुर्याद्वशम् ॥ ३ ॥ कोऽर्थान्प्राप्य न गर्वितो विषयिणः कस्यापदोऽस्तं गताः, स्त्रीभिः कस्य न खण्डितं भुविमनः को नाम राज्ञां प्रियः । कः कालस्य न गोचरान्तरगतः कोऽर्थीगतो गौरवं, को वा स्वार्थपरायणो न समभूत्त्रैलोक्यवर्त्तीजनः ॥ ४ ॥ सन्तश्चेदमृतेन किं यदि खलस्तत्कालकूटेन किं, दातारो यदि कल्पशाखिभिरलं यद्यर्थिनः किं तृणैः । किं कर्पूरशलाकया यदि दृशः पन्थानमेति प्रिया, निःसारे जगतीतले यदि जनः स्वार्थ्यस्ति किं व्याधिना ॥ ५ ॥ लोभश्चेदगुणेन किं पिशुनता यद्यस्ति किं पातकैः, सत्यं चेत्तपसा च किं शुचि मनो यद्यस्ति तीर्थेन किम् । सौजन्यं यदि किं गुणैः स्वमहिमा यद्यस्ति किं मण्डनैर्निःसारे जगतीतले यदि जनः स्वार्थ्यस्ति किं व्याधिना ॥ ६ ॥ क्षान्तिश्चेद्वचनेन किं किमरिभिः क्रोधोऽस्ति चेद्देहिनां, ज्ञातिश्चेदनलेन किं यदि सुहृद्दिव्यौषधैः किं फलम् । किं सर्पैर्यदि दुर्जनाः किमु धनैर्विद्याऽनवद्या यदि, निःसारे जगतीतले यदि जनः स्वार्थ्यस्ति किं व्याधिना ॥ ७ ॥ तस्मात्सर्वे सम्बन्धिनः स्वार्थसाधका विभावनीयास्त्वयानूनम् । इदानीमेव तव दुरन्ता स्थितिर्भाविनीतिसत्यं त्वं जानीहि, असौ गणिका श्वस्तनदिने

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





भिक्षान्नमपितुभ्यं न दास्यति। अतस्तामसतीं परित्यज्य मया सार्द्धं सत्वरं समागच्छ, एवं विधानि प्रधानोक्तवचनानि श्रुत्वास्वमनसि विचार्य विलज्जितो धनपालः प्रधानेन सह निजगृहं गन्तुमक्रमत। तदानीं सा गणिका स्वचेतसि विचिन्तयितुं लग्ना–इतोगमनानन्तरमसौमहेभ्यसूनुर्मह्यंवराटिकामात्रमपि द्रव्यं न दास्यति, अतोयत्किञ्चिद्धनमस्मिन्समये गृहीष्यामि तदेवात्मीयमिति विचार्य तयाकटाक्षमिषेण पुनः स वणिक्सुतो निजान्तिके समाहूतः। धनपालः प्रधानसङ्गं परित्यज्य गणिकान्तिकं जगाम, गणिकाऽवदत्–प्राणवल्लभ! अद्यवासरे मे प्रियसखीमिलनाय जिगमिषा वर्त्तते, अतो भवतः कण्ठस्थितो मौक्तिकहारो मह्यं प्रदीयताम्, आगत्य च तं पुनस्तुभ्यं दास्यामि, एतदुपकारं यावज्जीवं न विस्मरिष्यामि। धनपालोऽवादीत्–प्रिये! मदीयोऽयं हारस्त्वदधीन एव ज्ञातव्यः, इति निगद्य तेन स्वहस्तेन स्वकण्ठादुद्धृत्य स तस्याः कण्ठे निचिक्षिपे। ततः स स्वगृहमियाय। अथ ज्ञातिरीतिमनुसरन्धनपालः स्वजनकस्य श्मशानभूमौ देहसंस्कारं निर्वर्त्तयामास। स्वप्रियायास्तु विस्मरणं तस्य सञ्जातम्। द्वितीयस्मिन्दिने प्रधानेन धनपालोऽभाणि–अद्य प्रभृति भवते यद्रोचते तद्विधीयताम्, इदमवशिष्टं यत्किञ्चिद्वस्तुजातमस्ति तत्सर्वं मदीयमस्ति, यतो भवज्जनकेनैव कृतज्ञतया मे सर्वं पारितोषिकी कृतम्। इत्थं तदुक्तिश्रवणेन भृशं निःश्वस्य साश्रुलोचनो धनपालस्तस्याःपण्यस्त्रियाः सदनं जगाम। यावद्दूरत आगच्छन्तं तं सा वारवनिता विलोकयति तावन्निजदास्या गृहद्वारं निरोधयतिस्म। ततो द्वारदेशमागत्यद्वारमुद्घाट्यतामिति धनपालेन भृशमुद्घोषेकृतेऽपि न कोऽप्युत्तरं ददाति, नापितदुद्घाटयति, यदा तेनासकृदुच्चैःस्वरेण विरावाविहितास्तदा तद्दास्येकाऽवोचत्–ममस्वामिन्यधुना लब्धास्वास्थ्या विषण्णाऽस्ति, मीलनावसरो नास्ति, यः कश्चिद्भवेत्स सत्वरं गच्छतु। ततस्तेनक्ु-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मारेण मुहूर्त्तमात्रं विचिन्त्य प्रोक्तं—रे दूतिके ! ह्यस्तने दिने तव स्वामिन्यै मया नवप्रसरो यो मौक्तिकहारः प्रदत्तः स तस्याः सकाशादानीय मह्यं प्रदीयताम् । दास्यपि महाधूर्त्ता कूटकर्मविधायिनी बभूव, यतः सज्जनस्य परिवारः सत्कर्मशाली भवेत् । परमेतादृशनीचकर्मसेविन्यास्तस्याः परिजनोऽपि तादृशस्तत्र कः संशयः ? सा दासी किञ्चिद्गृहान्तरं गत्वा कूटं प्रत्युत्तरमदात्-रे विरुद्धवादिन् ! मम स्वामिनी कथयति—त्वदीयो हारो मया न विलोकितः, कीदृग्विधस्तव हारः ! यस्यै स समर्पितस्तां प्रति गत्वा तं मार्गय, उत्तमपुरुषाणामीदृशं वृथाऽपवादमोचनमनुचितम् । त्वं तु महेभ्यसूनुरसि, मादृशस्य रङ्कजनस्य गले किंपतसि ? इत्थं तदुक्तिश्रवणेन संभ्रान्तमना धनपालो मनसि पश्चात्तापं प्रकुर्वाणो व्यचिन्तयत्—रे दैव ! मदीयाः समृद्धयः क्व गताः ? साम्प्रतं विपद्गणः कुतः संप्राप्तः ? पुरा पितुः सन्निधिस्थं मां जना उपादिशन्, तत्स्मरणमद्य मे स्फुरितम्, तद्यथा—यावच्छुभानां कर्मणामुदयो भवति तावच्छशाङ्ककान्तिशुभ्राणिमन्दिराणिरथतुरगादिपशवो विलासवत्यः प्रमदाः श्वेतातपत्राणि चामरव्यजनानि च प्रस्फुरन्ति । लक्ष्मीसुखमपि तावदेव, यदा च शुभकर्म क्षीणतां याति तदा तज्जन्यः सर्ववैभवः कामक्रीडाक्लेशेन त्रुटितस्य मौक्तिकहारस्य मुक्तागण इव युगपत्प्रतिदिशं विशीर्यते । वस्तुतः सकलसुखानिविनश्यन्ति । उक्तञ्च—दैवमुल्लङ्घ्य यत्कार्यं, क्रियते फलवन्न तत् । सरोम्भश्चातकेनात्तं, गलरन्ध्रेण गच्छति ॥ १ ॥ न केवलं मनुष्येषु, दैवं देवेष्वपि प्रभु । सति मित्रे धनाध्यक्षे, चर्मप्रावरणोहरः ॥ २ ॥ सच्छिद्रो मध्यकुटिलः, कर्णः स्वर्णस्य भाजनम् । धिग्दैवं निर्मलं चक्षुः, पात्रं कज्जलभस्मनः ॥ ३ ॥ भगवन्तौ जगन्नेत्रे, सूर्याचन्द्रमसावपि ! पश्य गच्छत एवास्तं, नियतिः केन लङ्घ्यते ॥ ४ ॥ किं करोति नरः प्राज्ञः, शूरो वाऽप्यथ पण्डितः । दैवं यस्य फलान्वेषि, करोति विफलाः क्रियाः ॥ ५ ॥ दैवे विमु-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



खतां याते, न कोऽप्यस्ति सहायवान् । पिता माता तथा भार्या, भ्राता वाऽथ सहोदरः ॥ ६ ॥ पिबन्ति मधु पद्मेषु, भृङ्गाः केसरधूसराः । हंसाः शैवालमश्नन्ति, धिग्दैवमसमञ्जसम् ॥ ७ ॥ दैवं फलति सर्वत्र, न विद्या न च पौरुषम् । समुद्रमथनाल्लेभे, हरिर्लक्ष्मीं हरो विषम् ॥ ८ ॥ यथा धेनुसहस्रेषु, वत्सो विन्दति मातरम् । तथा पूर्वकृतं कर्म, कर्त्तारमनुगच्छति ॥ ९ ॥ पुरुषः पौरुषं ताव-द्यावद्दैवन्तु सन्मुखम् । विपरीतगते दैवे, पुरुषो न च पौरुषम् ॥ १० ॥ तथैव ममाऽधुना समभवत् । हे प्रभो ! मयेदानीं किं विधातव्यम् ? मदन्तिके वराटिकामात्रमपि धनं नास्ति, दुर्दैवशरणमवशिष्टम् । एवं चिन्तयतस्तस्येतिबुद्धिरुदपद्यत, यस्मिन्नगरे येन स्वज्ञातिजनैः सम्बन्धिभिः कौटुम्बिकसुहृद्गणैश्च सह विविधवैभवसुखानि भुक्तानि तस्मिंस्थाने स कदाचिन्निर्धनतामवाप्नुयात्तर्हि तत्स्थानंपरित्यज्य देशान्तरेऽरण्येवागत्वाभिक्षादीनांसेवनंकुर्यात्तद्वरम्, परं कुटुम्बिजनेषु निःस्वतया नस्थेयम् । यथा व्याघ्रगजेन्द्रसेविते वने वासो वरम्, वृक्षस्याधस्तात्पर्णकुटीं निबध्य पक्वफलानामशनेन जलपानेन च निर्वाहः शोभनः, तृणशय्यावल्कलपरिधानादिकमपिश्रेयस्करं मन्ये, परं बन्धुजनेषु सम्पदाढ्येषु निःस्वस्य जनस्य जीवितं धिगस्तु । इत्थंध्यात्वा सकुमारः स्वकीयं लक्ष्मीपुरपत्तनं परित्यज्य देशान्तरं प्रतस्थे । ततः स कतमैर्दिवसैः परिभ्रमन्वर्त्मनि विविधां वेदनां सहमानो मणिपुरपत्तनमियाय । तन्नगराधिपतिः प्राप्तयौवनो मदनसेनाभिधः पराक्रमशाली तेजसा तिग्मरश्मिरिवास्ते, तत्सन्निधौ गत्वा विनम्रः शिरसा तं वन्दित्वा स धनपालो राजसेवां समीहमानोनिजाभिप्रायं ज्ञापयामास । नृपेणाऽवादि-साम्प्रतं त्वद्योग्यं कार्यं नास्ति मे, तथाऽपि प्राहरिककर्मणि यदीच्छास्याच्चेदस्यरङ्गप्रासादस्य बहिर्भागेयामिकस्थाने त्वं तिष्ठ, पश्चादपरस्मिन्कार्ये त्वां योजयिष्यामि । इत्थं नृपवचनं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वीकृत्य तस्मिन्नेवस्थाने स तस्थौ। इतोऽन्येद्युर्निशीथसमये दूरं रुद्यमानस्येव कस्यचिद्ध्वनिर्नृपस्य श्रवणातिथिर्बभूव। तदानीं भूपतिः स्वचेतसि व्यचिन्तयत्–नीतिवेदिनोमे राज्ये कीदृशोऽयं नरो दीनावस्थां प्रयातः, यतोऽर्द्धरात्रिसमये रोदनं करोति, तस्य शुद्धिं तु कारयामि। यतः–पक्षिणाश्च बलं व्योम, मत्स्यानां विहितं जलम्। दुर्बलानां बलं राजा, बालानां रुदितं बलम् ॥ १ ॥ अतो निर्बलस्य नृपतिबलमवश्यमेव भाव्यम्। यतः प्रजाः सुखवर्त्तिन्यो भवन्ति चेन्नरपति-रपि सुखीस्यात्। अतस्तं दुःखिनं शोधयित्वा तस्य दुःखान्तं विदधामि। इत्थं मनसि विचार्य भूपालः प्राहरिकं नरमाजुहाव, तदानीं प्राहरिकस्थाने दुःखितो धनपाल आसीत्। सोऽपि नृपशब्दं समाकर्ण्य तत्सन्निधौ समागत्य जगाद–अन्नदायक? आदिश्यताम्, भवदाज्ञाविधाने तत्परोऽस्मि। नृपेण समादिष्टम्–निशीथसमयेऽद्य को रोदिति? तस्य निर्णयं कृत्वा शीघ्रं मां निवेदय। इति नृपाज्ञां शिरसि समाधाय स्वस्य स्थानेऽन्यं प्राहरिकं नियोज्य स्वयं रुदनध्वनिमाकर्णयँस्तदनुसारेण व्रजन्परितोऽभ्रमत्, तथाऽपि तच्छुद्धिं न लब्धवान्। सर्वाः प्रजाः सुखशान्त्या निद्राणाः संप्रेक्ष्य स गोपुरद्वारमभिययौ। तत्र स्थितःस बहिर्भागादागच्छन्तंध्वनिं विज्ञाय गोपुरद्वारं समुद्घाट्य बहिर्निश्चक्राम। ततो रुदनशब्दानुसारेण प्रचलन्स दूरस्थिततन्नगरदेव्या भवनान्निःसरन्तं शब्दं श्रुत्वा तत्र गत्वा चाभ्यन्तरे प्रविश्य परितः पश्यतिस्म, परं कोऽपि मनुष्यस्तेन न लक्षितः, साश्रुलोचनां देवीं विलोक्य धृतधैर्यः कृताञ्जलिः सन् स्वयं देव्या अग्रे स्तुतिश्चकार–हे जगज्जननि! सर्व-जनरक्षिके? त्वं सकलभुवनजनानां कष्टनिवारिकाऽसि। अहश्च नृपाज्ञया समागतोऽस्मि, निशीथेरोदनं कः करोति! तस्य शुद्धिहेतवे सर्वत्र परिभ्रमन्भवत्याः सन्निधौ संप्राप्तोऽस्मि। हे अम्बिके? भवत्यानेत्रकमलादश्रुपातस्यकारणं मयि कृपां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कृत्वा सद्योब्रूहि । देव्युवाच-हेराजसेवक ? त्वदग्रेऽहं किं कथयामि ? अस्यनगरस्याधिपतीराज्याभिषेकमारभ्याऽद्यावधि प्रजानां संरक्षणं शुद्धभावेन करोति, राज्यमपि सुनीत्या यथायोग्यं पालयति, धर्मकार्येषु मुख्यो दयापालने बद्धकक्षो विद्वज्जनपरिपालको दीनजनोद्धारकोऽयं भूपतिर्वर्त्तते । तथाऽपि पूर्वार्जितदोषेणास्य नृपस्य प्राणापहारी महाघातोऽष्टमे दिने जनिष्यति, तद्भयेनाहं रोदिमि, यदहोधर्मिष्ठोऽसौभूपतिर्दिवंगमिष्यति, जगति गुणिनां नराणां संस्मरणं देवा अपि कुर्वन्ति, तेषाञ्च सुखेन स्वयं सुखिनः, दुःखेन च दुःखिनो भवन्ति । तस्माद्धन्या गुणाः, गुणैश्च सर्वत्र पदंनिधीयते । ईदृग्विधो महाप्रतापशाली नीतिप्रियो लोकवल्लभो नृपोऽस्यां राजधान्यांनान्योभविष्यति । इत्थं देवीवाचंनिशम्यधनपालोऽवदत्-हेमातः ? त्वां सविनयोऽहमेतावत्प्रार्थयामि, यदस्य संरक्षणस्यकश्चिदुपायोविद्यतेचेद्ब्रूहि । देव्यवोचत्-अस्य महाघातस्य यदि परावर्त्तनंस्याच्चेद्दीर्घकालमस्य नृपतेर्जीवनं केनाऽपि न विहन्येत, परन्तु तस्मिन्काले यदि कश्चिदुपायं करिष्यतिचेत्साऽऽवलिर्निर्वर्त्स्यति नूनम् । तच्छ्रुत्वा धनपालोऽपृच्छत्-जगत्पालिनि ? तत्सम्बन्धिप्रयासमहं करिष्यामि, परमस्य विघातस्य समयो निवेद्यताम् । तवकृपया भवत्याः कथनाऽनुसारेण सर्वं त्वत्सहायेन विधास्यामि । देव्यब्रवीत्-इतोऽष्टमेऽह्नि रात्रेर्मध्यकाले महिष्या समं नृपतिःप्रमोदनिर्भरोऽन्तःपुरवर्त्तिसुखशय्यायां भृशंनिद्रितो भविष्यति तस्मिन्समयेराज्ञ्या नासिकाविवरादेका भ्रमरी निःसरिष्यति, साचतस्मिन्नेवक्षणे भुजङ्गीभूय नृपतेर्दक्षिणपादाङ्गुष्ठं दङ्क्ष्यति, तेनैवदंशेन राजा मृत्युमवाप्स्यति । परंतु तं समयं विदित्वा यदि त्वं तत्सन्निधीभूय लाघवेन तं सर्पं हनिष्यसि चेन्नृपति-निर्विघ्नतया जीविष्यति । परं तावत्कालमियं वार्त्ता षट्कर्णगोचरा न भवेत्तथा त्वया कर्त्तव्यमन्यथा तव मृत्युर्भविष्यति ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अस्मिन्कार्ये तव धैर्यस्याचेदुपायकरणे त्वं सञ्जीभव, तव सहायमहं करिष्यामि खलु। इत्थं देवीवचनमङ्गीकृत्य तां देवीं प्रदक्षिणीकृत्य प्रणम्य च धनपालो राजमन्दिरमवाप। तदानीं निद्रावशं भूपतिं ज्ञात्वा तां वार्त्तामनिवेद्य शीघ्रं स्वयमपि सुष्वाप। अथान्येद्युः प्रभाते समुत्थाय स्वकार्यकरणे निमग्नतया स देव्युक्तं वृत्तान्तं व्यस्मार्षीत्। तथैव तत्स्थाने नियोजितः स यामिकोऽपि मां विमुच्य रात्रौ त्वं क्व गत इत्येतां वार्त्तां नास्मरत्। तस्मात्सावार्त्ता तस्य स्मृतिगोचरा नाभूत्। अथैवंदिनेषु गच्छत्सु चाष्टमे दिने सम्प्राप्ते देव्युक्ता वार्त्ता धनपालस्य हृद्यस्फुरत्। ततस्तेन सर्वानात्मवर्गीयान्समाहूय विज्ञापितम्, परेद्युर्मम किञ्चित्कार्यं विद्यते, तस्मादहं ग्रामान्तरं गमिष्यामि, तत्रचदिनद्वयं स्थास्यामि, अतोऽस्यांनिशि केवलोऽहं प्राहरिको भविष्यामि, वासरद्वयस्यमत्कृत्यं भवद्भिर्निर्वाह्यम्। इदानीञ्च भवन्तः सर्वे सुखेन स्वपन्तु। इत्थं सर्वान्कथयित्वा स्वयं स्वकार्यतत्परो बभूव, अन्येच सर्वे निद्रां भेजुः। ततो जाते निशीथे धनपालो विकोशं खड्गं करेकृत्वाऽन्तःपुरमाससाद, महिष्या समं गाढनिद्रितं नरेन्द्रं निरीक्ष्य नृपाङ्गनाया नासिकामभिलक्ष्यैकाग्रदृष्ट्या ध्यानारूढ इव स तस्थौ। एतस्मिन्समये देव्यागिरं सत्यापयन्ती कालरूपिणी भ्रमरी राज्ञ्या नासिकारन्ध्रान्निःससार, सा च सहसाभुजङ्गरूपं बिभ्रती नरपतेर्दक्षिणचरणमभिलक्ष्ययावत्प्रयाति तावत्सावधानतया धनपालो धृतधैर्यस्तीव्रेण खड्गेन तस्यभुजगस्यशिरश्छेदं विधाय नरेन्द्रपर्यङ्कस्याधस्तान्निपतिते रौप्यस्थाले भुजङ्गखण्डान्भृत्वामञ्चकस्याधोभागे स संस्थापितः। ततो धनपालो रुधिरलिप्तां करस्थितां खड्गलतां दृष्ट्वा खड्गात्पतितैरुधिरबिन्दुभिर्व्याप्तं राज्ञ्या वक्षस्थलं च विलोक्य चिन्तयितुं लग्नः, प्रचण्डविषमयजन्तोर्विषमयरुधिरबिन्दूनां निपातेन कदाचिदियंनृपाङ्गनाविषमूर्च्छिता भवेदतस्तद्रुधिरं निवर्त्तयामि, परं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वक्षःस्थिता रुधिरबिन्दवः कथं निवर्त्तनीयाः ? यदि विनिद्रां राज्ञींकरोमि तर्ह्यपि दूषितः स्याम् । यदुक्तम्–पापानां बोधने दुःखं, चौरयोगः सुदुःसहः । अधर्मसेवनाच्छ्भ्रं, निद्राभङ्गेकुलक्षयः ॥ १ ॥ एवं स निजचेतसि कश्चित्कालं विचार्य शयनासनात्कार्पासं निष्कास्य जलार्द्रं तद्विधाय तेन राज्ञ्या हृदये यत्र यत्र रुधिरबिन्दवः पतितास्तान्सर्वान् हस्तलाघवेन-प्रममार्ज । परं जलार्द्रकार्पासपुम्भिकायाः स्पर्शेन शीतार्त्ता राज्ञी मदीयं वक्षस्थलं कःस्पृशतीतिव्याहरन्ती यावत्सावधाना पश्यति तावत्करस्थितं खड्गं तत्र विमुच्य व्याकुलितमानसं बहिर्निःसरन्तं धनपालं विलोक्य स्वचेतसि व्याचिन्तयत्, अहो ! अयं प्राहरिकः प्रासादस्य बहिर्भागे रक्षाकृते नियोजितस्तस्यात्राऽऽगमनेऽस्मिन्समये किं प्रयोजनम् ? नन्वयंकरगृहीत-नग्नखड्गः कपटभावेनाऽस्यां वेलायां नृपतिं निहन्तुं समागत इति प्रतिभाति । एवं वितर्कयन्ती सा स्वयमेकाकिन्येवोद्बोध्य स्वपतिमुदबोधयत्, बहिश्चान्ये ये आरक्षका निद्रितास्तानपि समुत्थापयतिस्म । ततो निजान्तिके तान्सर्वान्समाहूय राज्ञी धनपालस्य यथादृष्टं सर्वं वृत्तान्तं समाचख्यौ । तच्छ्रवणेन समुत्पन्नक्रोधोभूधरस्तत्कालं निजसेवकैस्तं समानाय्य निग-डितकरचरणं कारागृहे प्राक्षिपत् । द्वितीयस्मिन्वासरे प्रभाते सिंहासनमारुह्य नृपतिर्दुर्गपालं समादिशत्–रे ? इममधमं धनपालं शूलायामारोपय, इत्थं नृपादेशमङ्गीकृत्य कृतप्रणामो दुर्गपालो धनपालं वध्यस्थानं निनाय, पूर्वं नृपनिवेदितं रात्रिवृत्तान्तं सर्वं तेन धनपालाय निवेदितम्, ततस्तेन धनपालः समाख्यातः, यादृशी तव मनोभिलाषा स्यात्सा मदग्रे निवेद्यताम्, राजनियमानुसारेण तामहं पूरयामि । धनपालोऽवदत्–राजपुरुष ! न मया राजविरुद्धं किमपि समाचरितम्, तथाऽपि भूपतिना शूलारोपणस्याज्ञा विहिताऽस्ति, केनाऽपि ममन्यायाऽन्यायौ न वीक्षितौ, ईदृग्विधोऽनेनापराधो विहित



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति न निर्णीतम्, तस्मादधुना नृपाग्रे किञ्चित् मम विज्ञापनीयमस्ति। अतो भवान् भूपान्तिके गत्वा मदुक्तं वचनं निवेदयतु, येनाऽहं सद्गतिभाग् भवामि। इत्थं तद्वचनं तेन नृपाग्रे समेत्याचख्ये। नृपोऽपि सत्वरं धनपालं सभामध्ये समाकार्य पपृच्छ–रे दुराचार ? किं तव विज्ञापनीयं विद्यते ? सद्यस्तत्समाख्याहि। धनपालेन भणितम्–राजन् ? मदुक्तं वृत्तान्तं सभासमक्षं समाकर्ण्य पश्चाद्यत्कर्त्तव्यं तत्सुखेन विधीयताम्। भूपतिनाऽपि तद्वचनमङ्गीकृतम्, ततो धनपालो निजां वार्त्तां कथयितुं प्रारेभे। भूमण्डले चन्द्रवत्प्रकाशमानं चन्द्रपुराभिधं नगरं समस्ति, तत्र चन्द्रसेननामा यथार्थसंज्ञो नरेन्द्रो राज्यं पालयति, ततो दैवयोगेन कस्मिंश्चिद्दिने मृगयाभिलाषी स नरपतिर्वनान्तरं जगाम, तत्र गच्छन् स वर्त्मनि सम्प्राप्तं रमणीयमेकंशुकं गृहीत्वा स्वमन्दिरमानयत्। स च कीरो महागुणाकरो नानाविधभाषानिपुणो विविधवार्त्ताऽभिलापैर्भूपतिं सन्तोषयन् न्यायकार्ये च स्वमतं प्रदर्शयन् राज्ञो निजप्राणतोऽप्यधिकवल्लभो बभूव। अथैकस्मिन्दिवसे स राजसद्मनि सुवर्णशलाकाभिर्विनिर्मिते मनोहरे पञ्जरे क्रीडारसमनुभवन्नस्ति, तावत्समये तज्जातीया अनेके शुकास्तत्पञ्जरं परितः समावृत्य तस्थुः। बन्धनस्थितस्य तस्य च निन्दां प्रारेभिरे। तदानीं राजशुकोऽब्रवीत्–हेभ्रातरः ?यूयंमदावासे समागताः, मां मिलित्वा सद्योनिन्दितुं लग्नास्तथाऽपि मे नकाचित्क्षतिः, परं ममातिथ्यसत्कारं प्रथमं गृहीत्वा पश्चाद्यथारुचि मां स्तुवन्तु वा निन्दन्तु, युष्मान्न निवारयिष्यामि। इत्थं तदुक्तिं निशम्य शुकास्तं प्रोचुः–त्वं राजगृहे बन्धने पतितोऽसि, तस्मात्तव सत्कारं वयं नगृहीष्यामः, कारागृहसमानं पञ्जरमस्मभ्यं न रोचते, स्वर्गादप्यधिकं सुखं त्वं मन्यस्व, तत्सुखं त्वमेव भुङ्क्ष्व। तवाऽऽतिथ्यस्यापेक्षां सर्वथा वयं न कुर्महे, वनवासिनोवयं समयोचितानि फलानि जग्ध्वा स्वतन्त्रतया सकले वने

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





विविधां क्रीडां पश्यन्तः कालं नयामः, एतस्मिन्नेवानन्दमानिनो भवामः । परं त्वद्वत्पराधीनतया गहीतबन्धना वयं मिष्टपदार्थान् भोक्तुं नैवेच्छामः । पञ्जरस्थः शुको बभाषे–मदुक्तेः सारः प्रागल्भ्यख्यापनाय नैवाऽस्ति, हे वनचारिणः ! पञ्जरस्थं मां विलोक्य पराधीनोऽयमिति नाऽनुमन्यध्वम्, यतोऽहं भवादृशः स्वेच्छाचार्येवाऽस्मि । अथागन्तुकाः शुकाः प्रोचुः–यद्येवमस्ति तर्हि पञ्जरे त्वां संस्थाप्य तस्यद्वारं कथं पिहितमस्ति ! मुधा त्वं मिथ्याप्रशंसां कुतोऽस्मान् श्रावयसि ? यदि त्वमस्मादृशः स्वेच्छाचारीति सत्यवचनो भवसिचेद्वयमद्यत्रिदशेशस्य सदसि रम्भाद्यप्सरसां नृत्यं गीतञ्च विलोकितुं व्रजामोऽतस्त्वमप्यस्माभिः साकं समेहि । ततो नृपशुकेनाऽपि तेषां वचनं स्वीकृत्य भूपतिं समाहूय कथितम्–राजन् ! अद्य मम प्रियसुहृदोमीलनाय समागतास्तस्मात्तान्नानाविधानि सुस्वादूनिदाडिमादिफलानि समानाय्य यथोचितसत्कारेणसन्तोषय । अथनृपतिस्तथैवस्वादिमफलादिभिस्तान्प्रीणयामास, ततोनृपशुकोनृपतिमित्यभ्यर्थयामास, भूपते ! सर्वोऽयं मम मित्रवर्गोऽद्यस्वर्गलोके नृत्यं प्रेक्षितुं व्रजति, तस्मात्तैः सह गमनाय मह्यमाज्ञां देहि । इत्थंशुकोक्तिमाकर्ण्य नृपेणाऽवादि–शुकरत्न ! यद्यत्कार्यं त्वं कथयिष्यसि तत्सर्वं विधातुमहं तत्परोऽस्मि, परं तव वियोगं क्षणमपि सोढुमसमर्थोऽस्मि, मम प्राणतोऽप्यधिकं प्रियं त्वां गणयामि, इन्द्रलोके जिगमिषया गृहीताग्रहस्त्वं मां यमसदनातिथिंकर्त्तुंसमीहसे, अतः सावार्त्ता भवता मदग्रेपुनर्नवक्तव्या । सकृत्स्वजातीयानां सङ्गमेजाते त्वं पुनरत्रागमिष्यसीति नैव सम्भावयामि । एवं नृपगिरं निशम्य स शुकोभूपतिं दृढतरं विश्वास्य किञ्चित्सुभाषितवचनं श्रावयित्वा तस्य भूपस्य मनः समाधाय प्रयाणाज्ञां समादाय स्वमित्रैः साकं स्वर्गपुरीं जगाम। तत्रेन्द्रसदसिगत्वा नृत्यादिकं तैः शुकैर्व्यलोकि,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पश्चान्नृत्याऽवसाने सभास्थितेभ्यः सर्वेभ्योऽमृतफलानि तेन प्रदत्तानि । तत्रैवस्थिताः शुकास्तानिफलानि जक्षुः । नृपशुकस्तु मनस्येवं व्यचिन्तयदिदं फलं यदि भूपतये ददामि तर्हिंसदीर्घायुर्भूत्वा समुद्रमेखलां पृथ्वीं पालयिष्यति, प्रजानां रक्षणञ्चविधास्यति, एवं विचिन्त्य तदमृतफलं चञ्चुपुटेन गृहीत्वा नृपचरणारविन्दमभ्याययौ । भूपतिश्च स प्रोवाच–इदं फलमिन्द्रसभातो मया संप्राप्तमित्यादि सकलं तद्वृत्तान्तं निवेद्य स विरराम । ततोऽमृतफलं शुकागमनञ्च निरीक्ष्य भूपतिः महाप्रेमसागरे निमज्जतिस्म । अथ शुकोनृपस्याभ्युदयमिच्छन् देवेन्द्रवैभवमचीकथत्–हे नृपवर्य ? अस्यामृतफलस्य भक्षणेन जनाश्चिरायुषोभवन्ति, तस्मादनेकविधानि कष्टानि निषेव्य प्राणेभ्योऽप्यधिकवत्सलं भूमिरक्षकं त्वां मन्यमानोऽहं देवलोकादिदं फलमत्रानयम् । अतोभवानेवेदंफलं भक्षयित्वा मां कृतार्थं कुरुताम् । इतिशुकभाषितं श्रुत्वा नृपतिर्निजमानसे विचारयति स्म–इदं फलं यदि केवलोऽहं जग्ध्वा दीर्घायुःसन् परेषां दुःखानि मरणानि च विलोकयामि, तस्मात्तत्फलं विभिद्यतद्बीजानि चोद्याने वापयित्वा तज्जन्यवृक्षाणां फलानि सर्वेजना भक्षयन्तु, तदनन्तरं वयं स्वादयामस्तदा सुष्ठुतरमेवं चिन्तयित्वा वनपालं समाहूय तत्फलबीजानि तस्मैप्रदाय स स्ववाटिकायां वापयामास । कतिभिर्दिवसैः क्रमेण महान् वृक्षोऽजनि फलितश्चासीत् । फलितश्चतं निरीक्ष्य नृपतिर्जहर्ष । ततोमालाकारमाहूयैवमादिशत्–अस्यभूरुहस्य स्वयं पतितानि पक्वानि फलानि मदग्रे समानेतव्यानि । अथकतमेषु दिनेषु व्यतीतेषु सुपक्वमेकं फलं तद्वृक्षान्न्यपतत् । तत्फलं गृहीत्वा वनपाल आज्ञानुसारेण राजसभां प्रपद्यकृताञ्जलिर्नृपतेरग्रेमुमोच । राज्ञातत्फलं स्वकरे लात्वा वीक्षितम्, तस्मिन्नेकंछिद्रं दृष्ट्वा तेन वनपालोऽपृच्छि, कस्मादिदंसच्छिद्रं जातम् ? मालाकारेणप्रोक्तम्–वृक्षोपरिसंस्थितेऽस्मिन्पक्षिचञ्च्वादंशः प्रायेण सम्भाव्यते । इदं प्रथमं फलं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





विद्यते, अतो देव्यामन्दिरे प्राभृतीकर्त्तव्यमिदम् । अपराणि च फलानि प्रजानां निवेद्य पश्चादहं भोच्ये, इति चिन्तयित्वा भूपतिस्तत्फलं देव्यग्रे प्राहिणोत् । देवीपूजकेन तत्फलस्य देव्यानैवेद्यं विधाय स्वस्य पुत्रकलत्रादिभ्योविभज्य दत्त्वा स्वयमपि चखाद, परं सर्पेण दष्टत्वात्तत्फलमुग्रविषमयमासीदतस्तत्फलाशिनः पुत्रकलत्रादयः सर्वे तस्यामेव निशि-पञ्चत्वमवापुः । प्रभाते च सञ्जाते तेषां मरणवार्त्ता नगरान्तःसर्वत्र प्रसरतिस्म । यतः–वार्त्ता च कौतुकवती विशदा च विद्या, लोकोत्तरः परिमलश्चकुरङ्गनाभेः । तैलस्य विन्दुरिववारिणि वार्यमाण–मेतत्रयं प्रसरतीतिकिमत्र चित्रम् ॥ १ ॥ विज्ञाततद्वृत्तान्तो नृपतिरितिनिश्चयामास, यदयंसकुटुम्बोदेवीपूजकोऽज्ञातफलभक्षणेनाम्रियत । ततस्तत्कालसमुद्भूतक्रो-धानलेन तप्तगात्रोनृपतिश्चेतसि पश्चात्तापमकरोत्–अहो ! पक्षिजातिरपीदृशी कपटशीला ? विषफलमानीयाऽमृतफलमिदमिति ममवञ्चनाय तेनकीरेण समर्पितम् । यदि मया भक्षितश्चेन्ममाऽप्येतादृशीगतिरभविष्यत्, तस्मात्किमनेन दुष्टपक्षिसंरक्षणेन ? एवं मनसि विचार्य भूपतिस्तस्य निरागसः शुकस्य ग्रीवां मोटयित्वा मुधातममारयत् । ततो विषमयोऽयं वृक्ष इति विज्ञाय तस्यफलानि कोऽपिनाश्नातिस्म, अतस्तस्याधस्तात्फलानां महान् राशिरजायत । इतस्तन्नगरे धनपतिनामैकोवृद्धोवणि-गासीत्, तस्य च चत्वारो नन्दना आसन्, ते दुष्टबुद्धयः स्त्रीलम्पटाश्चस्वमातापितरौ भापयित्वाताडयित्वाचतत्साश्चितां सम्पत्तिं लुण्टयित्वा स्वाधीनामकुर्वन् । मातापितृभ्यां जठरपूर्त्तिमात्रमप्यन्नं तेनददुः । तद्दुःखेन दुःखितो धनपतिः सभार्य इत्यचिन्तयत्–वामनयने ? आवयोः प्रतिदिवसमाधिकाऽधिका दुःस्थितिः सम्पद्यते, पुत्राश्चदुर्बुद्धयो भूरित्रासमुत्पादयन्ति । अतोनृपतेर्वाटिकायां स्थितस्य विषवृक्षस्य फलानि भक्षयित्वा देहत्यागं यदि कुर्वस्तर्हिदुरन्तदुःखपारावारादस्मादावयो



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्मुक्तिःस्यात् । इत्थंनिश्चित्यतौदम्पती नृपोद्याने गत्वा तस्य वृक्षस्याधोभागे पतितानि मनोहराणि फलानि लात्वा चखदतुः । अतिस्वादूनिरुचिकराणि च विज्ञायाकण्ठं जग्ध्वा चिरकालीनां क्षुधां निवर्त्तयामासतुः । तत्फलभक्षणस्य प्रभावाद् वृद्धावस्थां परित्यज्य प्राप्तयौवनौ तौ परस्परयोर्भव्यकान्तिनिरीक्ष्य सविस्मयमूचतुः । मरणोद्यताभ्यामावाभ्यां फलान्य भक्ष्यन्त, तथाऽपि मरणमनासाद्य प्रत्युत युवावस्थाऽगम्यत । अतः साम्प्रतं गृहं गच्छावः । इत्थं कृतसङ्केतौ तौ दम्पती वर्त्मनि प्रयान्तौ मार्गगामिनोजनाः परावर्तितकान्तिवेषौ संवीक्ष्य तयोर्भूरिप्रशंसां चक्रुः । सा वार्त्ता जनानां कर्णोपकर्णतो नृपतेः कर्णगोचरीबभूव । नृपतिस्तौ स्त्रीपुरुषौ शीघ्रं समाहूय चमत्कृतः सन् तद्वृत्तान्तमपृच्छत्, श्रेष्ठिना प्रथमं निज-दुःखस्यवृत्तान्तं निवेदितम्, ततो वाटिकास्थितवृक्षस्य फलानांभक्षणतो रूपादिसंपत्तेः प्रभावो निवेदितः । अथ भूपतिः स्वशङ्कानिरासाय तद्वृक्षस्यपञ्चदशफलानि समानाय्यताभ्यामदात् । सभार्यःश्रेष्ठी प्रमुदितोनृपदत्तफलानि जघास । ततो धनपतिर्नृपतिमित्यभ्यर्थयत्-भो भूपते !ममाऽतीवदुर्बला स्थितिर्वर्त्ततेऽतोऽसौवृक्षोयदि मह्यं जीविकार्थं ददासिचेद्भवतां महान्त-मुपकारं मन्ये । एवं तद्वचनं निशम्य श्वस्त्वया समागन्तव्यमित्यादिश्य भूपतिस्तौ दम्पती विससर्ज । अथ नृपतिः स्वमनसि चिन्तयतिस्म-वृद्धावस्थयोस्तयोरेतद्वृक्षफलाशनेन तरुणाऽवस्था सञ्जाता तदाश्चर्यजनकं दृश्यते, नूनं तेन शुकेन मह्यम मृतफलं प्रदत्तं न तत्र सन्देहः, देवीमन्दिरे यत्फलंमयाप्रदत्तं तत्तु केनाऽपि विषजन्तुनाऽऽस्वादितमभविष्यत्, तज्जन्यविष-योगेनैव सपुत्रकलत्रोदेवीपूजकोमृतः । इति सञ्जातनिश्चयो नृपतिर्भृशं पश्चात्तापमकरोत्-रे प्राणवल्लभ ? निरपराधिन् ! हे शुकवर्य ! स्वार्थमन्तरेण विचारमूढेनमया त्वंहतोऽसि, धिगविमृश्यकारिणं मामेवं पश्चात्तापं कुर्वन् कियद्भिर्दिवसैः सनरेन्द्रो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मृत्युमवाप। इत्थं स्वस्वामिनेशुकवृत्तान्तं कथयित्वा धनपालोऽवदत्–हे प्रजापते! अस्याः वार्त्तायाः सारांशो भवता गृहीतो नवा? यदि तदीयो भावार्थः सम्यक् नावबुद्धस्तर्हि द्वितीयां वार्त्तांब्रवीमि, सावधानतया सात्वयाश्रूयताम्। नृपतिर्जगाद–रे भृत्याधम? त्वद्वचने किं ज्ञातव्यमस्ति! अनया वार्त्तया मम मनसिदृढीभूतस्तवापराधः किं वृथा भविष्यति? मुहूर्त्तमात्रं केवलजल्पनेन ते प्रमोदो जातः, इदानीं किं तव कथनीयमत्रशिष्यते? शीघ्रं वद, इमे वधकास्त्वां हन्तुं त्वरयन्ते। तादृशं नृपवचनं श्रुत्वा धनपालोऽवोचत्–धराधिपते! यः प्राणी प्रादुर्भवति स निश्चयेन मृत्युवशं प्रयाति। यतः–अद्यवाऽब्दशतान्ते वा, मृत्युर्वै प्राणिनां ध्रुवम्। गृहीत इव केशेषु, मृत्युनाधर्ममाचरेत् ॥ १ ॥ इत्थं दैवविनिर्मितं भावं जानन्नहं मरणभयान्न बिभेमि, किन्तु हे नराधिप? चन्द्रसेननृपवत्परिणामे तवाऽप्यनुशयो भविष्यति, अर्थाच्चन्द्रसेनः शुकं निरपराधं हत्वा पश्चात्तापपरायणो भूत्वाऽम्रियत तथैवतवाऽपिस्थितिर्भविष्यति। अतो हे राजन्? अद्याऽपि सम्बुद्धो भवसि चेद्वरम्। एतदर्थमेवापरमाख्यानं वदामि तत्सावधानमनास्त्वंशृणु–कस्मिंश्चित्समये चत्वारोदीनपुरुषा उद्योगार्थं देशान्तरं यियासवः प्रयाणं चक्रुः, वर्त्मनिभूरिग्रामनगराणि परिभ्रमन्तस्ते नानाकौतुकानि विलोकयन्तः कियद्भिर्वासरैःकौशाम्बीं नगरीं जग्मुः। क्षुधार्दितास्ते भोजनायकृतनिश्चया एकस्मिन्प्रदेशेचोत्तारकं कृत्वा त्रीन्पुरुषाँस्तत्रमुक्त्वा भोजनस्य व्यवस्थां कर्त्तुमेकोनरस्तन्नगरनिवासिनो नवीनचन्द्रस्यश्रेष्ठिनो गृहं ययौ। गृहाङ्गणे स्थित्वा क्षुधार्दितोऽस्मि मह्यं भोजनं देहीतिदीनवचः श्रुत्वा गृहान्तरान्निःसृत्य तस्य श्रेष्ठिनोऽतीववल्लभा रूपसुन्दर्याख्या कन्या बहिराययौ। द्वारिस्थितं देशान्तरादागतं नरं विलोक्य सा कथयामास–पान्थ? तुभ्यं भोजनं ददामि, मार्गव्ययकृते च पञ्चाशद्रूप्यकान्यच्छामि, परं कस्त्वमसि? सत्यं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्रूहि, इत्थं कन्यकोक्तं वचनं स्वीकृत्य पान्थः प्रोवाच–पूज्यतमे ? अहं दीनजनोऽस्मि। तादृशं नरवचनं निशम्य कन्या जगाद–रे पान्थ ? अस्मिँल्लोके रङ्कौतु द्वावेव स्तः। अतस्त्वंवृथालपसि, अस्मात्स्थानादपसर, तुभ्यं किञ्चिदपि न दास्यामि। इत्थं तदुक्तिश्रवणेन विषण्णोनरो मनसि विचिन्तयन्स्वस्थानं जग्मिवान्। स्वस्य सहचराँश्च सर्वं निजवृत्तान्तं न्यवेदयत्। ततो-द्वितीयः पान्थस्तस्मिन्नेव सद्मनि गत्वा भोजनान्नस्य प्रार्थनांचक्रे, तद्गिरमाकर्ण्य रूपवती कन्या गृहाद्बहिराययौ, तत्रस्थितं पथिकं दृष्ट्वा सा पप्रच्छ–कस्त्वमासि! कुतस्त्वं समायातः ? तेन कथितमहं पान्थोऽस्मि, तद्वचनं निशम्य साऽवदत्–भूमितले द्वावेव पान्थौ भवतो नान्योऽस्ति, त्वमसत्यं वदसि, तस्मात्तुभ्यमपि भोजनान्नं नदास्यामि, अस्मात्स्थानाद्दूरंव्रज। इत्थं श्रेष्ठि-सुताया वचनं समाकर्ण्य विलक्ष्यीभूतः सोऽपि स्वस्थानमियाय। स्वमित्रेभ्यः स्वकीयं यथाजातं सर्वं वृत्तान्तंनिवेदयामास। ततः क्षणं विलम्ब्यतृतीयस्तथैवतत्र गत्वा भोजनं ययाचे, तदा साकन्या पूर्ववत्तमपृच्छत्–अहंनरोऽस्मीति सोऽपि प्रत्यु-त्तरमदात्, रूपसुन्दरीप्रोवाच–त्वमपिमृषालापं करोषि, यत्पृथिव्यां द्वावेव नरौ विद्येते नान्यःश्रुतः, तस्मात्त्वमपि भोजनदा-नीयोनाऽसि। अनेन कन्योक्तवचनेन विषण्णमानसः क्षुधार्दितस्तृषाकुलितचित्तः स भृशं निःश्वस्य स्वस्थानं प्राप्य स्ववयस्यान्य-थोत्पन्नवार्त्तां समाख्यातवान्। तदुक्तोदन्तश्रवणेन जातकौतुकश्चतुर्थपुरुषस्तत्रगमनाय सज्जीबभूव, मनसिच विचारयतिस्म, अस्मिन्ग्रामेगर्द्दभा बहवः सन्ति, तस्मादहमेवं कथयिष्येऽहं गर्द्दभोऽस्मि पश्चात्सार्किं वदिष्यति, ? इत्थं कृतनिश्चयः स रूप-सुन्दर्याः समीपंगत्वा प्रोवाच–वैदेशिकोऽहं क्षुधाकुलितोऽस्मि, तस्माद्धेभगिनि ? मह्यं भोजनान्नंदेहि। तया स भणितः, त्वं कोऽसि ? खरोऽस्मीति सोऽवदत्–तच्छ्रुत्वा साप्रोवाच–रेमूर्ख ? अस्मिन्भूतलेद्वौगर्द्दभौस्तः, तृतीयस्त्वं कुतः समागतः ?



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सत्वरं दूरं प्रयाहि, मृषावादिने तुभ्यं भोजनान्नं न वितरिष्यामि । एतादृशं तदीयं वचनं श्रुत्वा तुर्योऽपि निराशः सन्स्वस्थानमवाप । ततः सर्वे वयस्याः सङ्गीभूय समुत्पन्नविषादास्ते परस्परं मन्त्रयन्तिस्म, अहो ! चतुर्भिरप्यस्माभिर्भोजनान्नं ना लभ्यत, सा श्रेष्ठिपुत्री प्रपञ्चं विधायमुधाऽस्मान्भोजनाद्विमुखीचकार । इदानीं वयं चत्वारोयुगपन्मीलित्वा तत्र व्रजामस्ताञ्च प्रार्थयामः, यतः सा रूपसुन्दरीस्वचेतसिदयां विधायाऽस्माकं क्षुन्निवृत्तिं करोतिचेद्वरमन्यथानोभाग्यम् ! यतः–भाग्यं फलति सर्वत्र, नोविद्यानचपौरुषम् । समुद्रमथनाल्लेभे, हरिर्लक्ष्मीं हरोविषम् ॥ १ ॥ एवं मन्त्रयित्वा चत्वारस्तेसुहृदोयुगपद्रूपसुन्दर्याः समीपं जग्मुः, सविनयमेतां भोजनाभिलाषिणस्ते प्रार्थयामासुः–हे स्वसः ! वृथाऽस्माकमियान्कालो गमनागमनेनव्यतीतः, भोजनमपित्वत्तोनामिलितम्, इदानीमन्यत्राऽपि तन्नलप्स्यतेऽनवसरत्वात् । तस्माद्दयार्द्रचेतसाऽस्मान्क्षुधाकुलान्विलोक्य कृपांविधेहि । इत्थंतेषांदीनवचांसि श्रुत्वाजातसद्भावा सा स्वगृहान्तरे तान्समाहूयप्रगुणेनभोजनान्नेन सन्तोषयामास । तथैव पूर्वमादिष्टः सेवकः कृतभोजनाँस्तान्निजास्थाननिकेतने प्रवेशयामास । रूपसुन्दरीतान्निरीक्ष्यसत्कारं विधाय पूगीफलताम्बूलादिमुखवासंदत्वारञ्जयामास । ततः सा स्वकीयं मुख्यं सेवकमित्यादिशत्, एभ्यश्चतुर्भ्यः पान्थेभ्यः प्रत्येकमेकमूर्णावसनं शतंरूपकाश्चप्रदातव्याः । इत्थंतद्वचनमाकर्ण्यमहासेवकस्तामवदत्–पूज्यभगिनि ? भवत्या आज्ञया भोजनं तु दत्तं परंत्वत्पितुरादेशमन्तरेण रूप्यकादिकं नदास्यामि, एवं सेवकोक्तवचनश्रवणेन सञ्जातक्रोधा सा कन्या तं सेवकं निर्भर्त्स्यासद्वचनैस्ताडयामास, यदित्वं मदोन्मत्तःसन्ममादेशं न गणयसि तर्हि स्वल्पकालेन तत्फलं किं न दर्शयिष्यामि ! एतादृशं विपरीतं कन्यागदितं समाकर्ण्यतस्योभयतो महाकष्टमापतितम्, यदि श्रेष्ठिनमपृष्ट्वाधनंददामि तर्हिमहोपालम्भभाजनंस्याम्, यदि च



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न ददामि तदा श्रेष्ठिपुत्र्या सह महावैरं प्रजायेत, किमत्र मयाविधेयम्, महान् दुःखसमयः सम्प्राप्तः । इत्थं विचारयतस्तस्य चेतसि कश्चिदुपायः प्रास्फुरत्, सयथा–श्रेष्ठिनोऽग्रेगत्वाऽस्याः कन्याया मृषापवादं कथयामि, तेन सश्रेष्ठी नमामुपालप्स्यते, रूपसुन्दर्यपिविलचाभविष्यति, एवंहृदि विचार्य स कार्यवाहकः सत्त्वरं श्रेष्ठिनः समीपं गत्वाकृताञ्जलिः प्रोवाच–स्वामिन् ? लौकिकाऽपवादेन भवदीयं कुलं सकलङ्कं भविष्यति। इति सेवकोदितवाक्यश्रवणेन भयभीतमानसःश्रेष्ठी तत्कारणं तमपृच्छत्–किमेतादृशमकृत्यं विहितमस्ति ? येनमे कलङ्कितं कुलं भविष्यति। तदाभृत्योवादीत्–भवतः पुत्री व्यभिचारिणी श्रूयते, तत्सत्यी-कर्त्तुंस्वयमेवेदानींतदास्थानमण्डपमध्ये प्रयातु। तस्याः पर्यङ्कसन्निधौचत्वारोजारपुरुषा वैदेशिकाः स्थिताः सन्ति। प्रत्येकं रत्नकम्बलं शतं रूपकाश्चत्वयादेया इत्याज्ञापितोऽहं भवत आज्ञां विनाऽनापृच्छ्यचकथमर्प्पयामि ? तस्मात्सा मयाऽभाणि–श्रेष्ठिनं पृष्ट्वा-त्वदुक्तं सर्वं करिष्ये। तदा सा कन्या ममोपरिप्रचण्डं कोपंविधायापशब्दानब्रवीत्, भवतः पुत्रीति विज्ञाय विषमामपि तदुक्तिमहं सोढवान्। त्वद्गृहनिवासेन मयोदरपिठरीपूर्यते, अतस्तवाज्ञां विना कथमसमञ्जसंकार्यं विदधामि ? एवं भृत्येन गदितांवज्रसमां वाचमवधार्यश्रेष्ठीपरं कोपमवाप। सत्त्वरश्चोत्थाय स्वात्मजाया आस्थानभूमौगत्वा ससंभ्रमं स व्यलोकयत्-तावत्कन्ययासाकं वार्त्तालापं कुर्वतश्चतुरोनरान्विलोक्यसहसास्वकुलाभिमानस्यमदेन वंशकलङ्कभयेनच प्रज्वलितगात्रोदिगन्तकीर्त्तिर्नृपमान्यः श्रेष्ठी पुत्रीवृत्तान्तं भूपतिसन्निधौ गत्वाऽब्रवीत्। ज्ञाततद्वार्त्ताप्रपञ्चोनृपतिर्महेभ्यस्य प्रामाण्यत्वात्तदुक्तं वचनं सत्यं मन्वानः सद्यः स्वदूतानादिशत्–नवीनचन्द्रस्य महेभ्यस्य गृहंगत्वा तद्दर्शिताँश्चतुरो नराँस्तत्पुत्रीं रूपसुन्दरीञ्च बद्ध्वाऽत्र समानयत। श्रेष्ठिसुतां कारागृहेक्षिपत, नरचतुष्टयञ्च शूलायामारोपयत। इत्थंनृपसमादिष्टा सेवका झटित्युद्यतायुधाः श्रेष्ठिगृहमभ्येत्य तत्रस्थितं नर-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





चतुष्टयं रूपसुन्दरीसमेतं बलात्कारेण गृहान्निष्कासयामासुः, तस्मिन्समये भीतचेतसः पान्था जगदुः–रूपसुन्दरि ! अकस्मादिदं कालचक्रं कस्मादापतितम् ? अस्माभिरेतादृशः कोऽपराधो विहितो येनेदानीं नृपतिरस्मानिमां दशां प्रापयति, तत्राऽपि शूलिकारोपणस्यशिक्षा विहिता। ततो महासत्त्वा निर्दोषभावा रूपसुन्दरी पान्थान्प्रत्यवदत्–भ्रातरः ? युष्माभिः किञ्चिदपि न भेतव्यम्, मयि विद्यमानायां युष्माकं रोममात्रमपि वक्रीकर्त्तुं कः समर्थः ? अधुना निर्भयतया राजमन्दिरं वयं व्रजाम। ततो वर्त्मनि गच्छन्तस्ते नृपदूतान्प्रोचुः–पूर्वमस्माकं राजसमागमो भवतीत्येवं प्रसादो भवद्भिर्विधातव्यः, यतोऽस्माभिर्नृपतेः किञ्चिद्विज्ञापनीयं विद्यते, पश्चाद्भवद्भिर्या शिक्षा विधातव्या सा सुखेन क्रियताम्। एतादृशीं तेषां प्रार्थनां स्वीकृत्य दूता भूपतेरग्रे रूपसुन्दरीसहितान्नराननयन्। तदानीं रूपसुन्दरी प्रोवाच–हे नरनाथ ! वयं तव प्रजाःस्मः, अपत्यभावश्च धारयामः, दुष्टेषुदण्डः सुजनेषु च रक्षणं विधेयमिति तवाऽवश्यं कर्त्तव्यमस्ति, तथाऽपि राज्ञो न्यायाधिकारिणश्चैतादृशोधर्मो नीतिशास्त्रे प्रकीर्त्तितः, प्रथममागस्कृतांजनानामपराधा वेदनीयास्ततस्तदनुसारेणनीत्युक्तप्रकारेण तेषां शिक्षा विधातव्या। एवं राजनीतौ सत्यां किञ्चिदप्यवेक्षणमकृत्वा निरपराधा जना शूलारोपणेन विहिंस्यास्तद्भवादृशानामुत्तमानां भूपतीनामनुचितमस्ति। इत्थं पञ्चदशवर्षीया महेभ्यपुत्र्या गम्भीरतरां वाक्यरचनां निशम्य राजा पूर्वं पान्थानपृच्छत्–नवीनचन्द्र महेभ्यगृहगमनेन भवतां किं प्रयोजनम् ? तद्ब्रूत, तदा प्रथमो नरो जगाद–भूपाल ! अहंदीनस्थितिरस्मि, इमे तव सम्मुख स्थिता मम जातिबान्धवाः सन्ति, निर्धनाश्च वयमुद्योगार्थं देशान्तरमागताः, बहूनि ग्रामनगराणि परिभ्रमन्तोऽत्र समागताः स्मः। अस्मिन्नगरेत्वत्समीपस्थाया रूपसुन्दर्याः पितुर्नवीनचन्द्रमहेभ्यस्यान्नशाला वर्त्तते, इति वृत्तान्तं जनमुखाद् विज्ञाय



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

केवलोऽहं भोजनलिप्सया श्रेष्ठिमन्दिरं जग्मिवान् । तस्मिन्क्षणेऽसौ कन्या मयाऽभ्यर्थिता, अहं दीनजनोऽस्मि, भोजनंवितीर्य-मदीयांक्षुधां निवर्त्तय । इत्थं मदीयं वचनं श्रुत्वा सा प्रोवाच–अस्मिञ्जगति रङ्कजनौद्वावेवस्तः, त्वंतृतीयः कुतोऽत्र समागतोऽसि ? मृषावादी त्वमसि, तस्मात्त्वमस्मात्स्थानादपसर, नात्रभोजनं ते मिलिष्यति, इति कन्यागिरं निशम्य सम्प्राप्तविषादोऽहं स्वस्थानमव्रजम्, एतावन्ममवृत्तान्तमस्ति । ततो नृपतिनाश्रेष्ठिपुत्री बभाषे–अस्मिन्नगरे दीनजनास्तुबहवः सन्ति, त्वयाद्वावेव स्त इति कथमुक्तम् ? तस्यस्पष्टार्थं कथय, नृपवचनं स्वीकृत्य कन्यका जगाद–राजन् ? परमार्थतस्तु दीनौद्वावेव-जगति विलोक्येते, एकागौर्द्वितीया च दुहिता, यतस्तेद्वयस्मैकस्मै नराय जनोददाति तदधीने भवतः । साचग्राहक पुरुषश्चाण्डलजातीयोनिर्धनो नपुंसकोऽनभिज्ञोदरिद्रश्च यदि भवेत्तथाऽपि तमेव भजति, तस्माज्जगति तद् द्वयंदीनंवर्त्तते नान्यः कश्चिदिति कन्योक्तं वचनं नृपेण स्वीकृत्य द्वितीयः पान्थः पृष्टः–सोऽप्यवदत्–शरणागतवत्सल ? अहमपि क्षुधार्दितो भोजनवाञ्छया श्रेष्ठिगृहं गतवान्, तदा कन्यया प्रोक्तम्–त्वं कोऽसि ? कस्मादायातः ! इत्थं तया पृष्टोहं प्रोचिवान्, वैदेशिकोऽहमस्मि, भोजनार्थमागतोऽस्मि, तदा साऽवोचत्–अस्मिन्भूतले पान्थौ द्वौ विद्येते, तृतीयस्त्वं कुतः समागतः ? अतस्त्वमसत्यभाषीदृश्यसे, अस्मात्स्थानादूरं याहि, अत्रस्थितस्यतेऽन्नलाभो न भविष्यति, इति मदीयं वृत्तान्तं जानीहि ॥ राजा कन्यामपृच्छत्–महेभ्यात्मजे ! जगति बहवः पान्था वर्त्तन्ते, कथं द्वावेव ? तदुत्तरं ब्रूहि, श्रुतभूपवचना साऽवोचत्–हे नृप ? जगदुद्योतकरः प्रथमः सूर्योद्वितीयश्चशशाङ्क इति द्वावेव वस्तुतः पान्थौ लक्ष्येते नान्यः। राज्ञातदपि वचनं स्वीचक्रे । राजाऽथतृतीयंनरमपृच्छत्–तदासोऽप्यवदत्–भूपाल ? अहमपि भोजनकाङ्क्षयाऽस्याः कन्याया गृहमव्रजम् । तदानीं सा माम-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पृच्छत्-त्वं कोऽसि ? मयाऽवादि, नरोऽहमस्मि, तद्वाक्यमसहमाना सा जगाद-असत्यवादिन् ? अस्मिञ्जगति द्वावेवनरौ नाऽन्योऽस्ति, मृषावादिनो मुखमपि न पश्यामि, तस्मात्सद्योदूरं याहि, भोजनस्यप्राप्तिस्तव न भविष्यति। इत्थं तद्वचनमाकर्ण्य विगताशोऽहं स्वस्थानमवापम्। तदानीं नृपतिना कन्या पृष्टा-अस्यां सभायामेव सहस्रशो नरा उपविष्टाः ? कथं द्वावेवेतिनृपकथनानन्तरं साऽवदत्-पृथ्वीपाल ? सत्यदृष्ट्यातु द्वावेवनरौस्तः, एकोऽर्जुनो द्वितीयश्चतुरगोनाऽपरो विद्यते, यतो यस्य वचसिस्तनौ न भवेतां स एवनर इति कन्योदितं वचोराज्ञाऽमानि। तथैव राज्ञा पृष्टश्चतुर्थोऽवदत्-भुवनपते ? इमे त्रयो ममसुहृदो निष्फलाशा निःश्वसन्तः पश्चादागतास्तदा मया किं कर्त्तव्यमिति मनसि चिन्तयन्नहं वर्त्मनि भ्रमतो बहून्खरान्विलोक्य कन्यासमीपं गतः। कन्ययाऽहं पृष्टः, भोस्त्वं कोऽसि ? कस्मादायातस्तदा मया प्रोक्तम्, भोजनार्थी गर्दभोऽस्मि। ततोऽनया कन्यया प्रोचे-भूमौद्वौगर्दभौविद्येते-त्वमसत्यभाषी लक्ष्यसे, वृथालापिनस्तव भोजनलाभो न भविष्यति। इत्थं तदुक्तिश्रवणेन शोकाकुलोऽहमपि मित्रमण्डलमासदम् ततो राजा कन्यां पप्रच्छ-कुमारिके ? अस्मादास्थानाद्बहिर्निः सृत्यदृष्टिप्रसारंकुरु, पञ्चविंशतिस्त्रिंशद्वाखरास्तुविलोक्यन्ते, तर्हि द्वावेवकथं त्वया गदितौ ? तद्वृत्तान्तस्य जिज्ञासाऽस्माकंभूरितरावर्त्तते, तस्मात्तदुत्तरं समाख्याहि। ततः कन्ययाऽभाणि-राजन् ? अस्य प्रश्नस्याऽपि सत्यमुत्तरं कथयामि, परंत्वत्सकाशादस्माकमभयवचनं यदि मिलति तर्हि स्पष्टतया सर्वं विवृणोमि। इत्थं कन्योदितं वाक्यं प्रमाणीकृत्य भूपतिरवोचत्-कुमारिके ? पञ्चानामपियुष्माकं जीवितदानं प्रयच्छामि, निर्भयचेतसा सुखेन तद्विवेचनं क्रियतामिति नृपादिष्टा कन्याऽवदत्-राजन् ? मम पितुरग्रे मुख्येन कार्यवाहकेन मद्विषया मुधा वार्त्ता कथिता, सेवकोदितंतद्वचनं सत्यमसत्यं वेत्यनिश्चित्यमत्पिता सहसा त्वामेतद्वृत्तान्तमज्ञापयत्। अतः प्रथमोगर्दभः स एव ममजनको-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ज्ञातव्यः । तथा भवानीश्वरसदृशो राज्यासनारूढः सकलप्रजारक्षको विराजते, भूपते! निर्बलानां बलंराजेतिनीत्यनुसारेण यदि दुर्बलानां रक्षणं भवान्करोतिचेदेतान्दीनान्निहन्तुं कः समर्थो भवेत् ? परमेवं तु भवान्नाकरोत् , प्रत्युतन्यायाऽन्यायवार्त्तां दूरंविहाय मज्जनकवचनेन सहसाऽमीषांदीनानांशूलारोपणस्यादेशो भवताविहितोऽत एव द्वितीयोगर्दभस्त्वमेव विभाव्यसे, इदानीं तृतीयः स्याच्चेत्त्वमेव दर्शय । राजन्! अधुना पश्चानामस्माकं या शिक्षा करणीया सा निःशङ्कतयात्वया विधीयताम् । एवं रूपसुन्दर्याः संभाषणं समाकर्ण्य सञ्जातविषादोनृपतिर्भृशंशुशोच, रेऽविचारितकारिणं मां धिगस्तु, अहो ! अहं मूर्खशिरोमणिः कीदृशोऽस्मि ? यतोऽपराधशून्यानाममीषां चतुर्णां विहिंसने समुद्यतोऽस्मि, परं हेजगदीश्वर ? सर्वोपकारिन् ? भवदीयनिःपारकृपया महापापवारिधिसकाशात्समुद्धृतोऽस्मि । प्रभो ! भवत उपकृतिर्निःसीमा विद्यते, मादृशा मूढजना यां वेदितुमप्यसमर्थाः, इति प्रजल्पन्नृपतिर्महेभ्यपुत्र्याश्चरणकमलं शिरसाऽभिवन्द्य तान् पान्थांश्चाविनयोद्भूतं स्वापराधं क्षमयामास । ततोऽमूल्यस्फार वस्त्राऽलङ्कारान्वितीर्य तान्प्रीणयतिस्म, पुनस्तान्वैदेशिकान्योग्याधिकारेषु नियोजयामास । इतो धनपालो नराधिपं कथयतिस्म–हे नरेन्द्र ! त्वमपि परीक्षामकृत्वा सहसा मां हन्तुं समुद्यतोऽसि, परंपूर्वोक्तनृपवत्त्वमपि पश्चात्तापमवाप्स्यसि, किमधिककथनेन ? हे भूपते ? यद्यपि त्वं सागरान्तां वसुधां पालयसि, अहन्तुदीनोऽस्मि तथाऽपिशूलाकोटीमारोप्य मां हनिष्यसि, तस्मादहं मनागपि न बिभेमि, दुःखस्यमर्यादापिमे नावशिष्यते, यामवस्थामहमनुभवामि सामेप्रियतराऽस्ति । त्वांपुनरेवं कथयामि, यदस्मिन्भूमितले भवादृक्षः कृतघ्नो नान्योविद्यते, रे ? त्वंभूपतिर्भूत्वा ममसाम्प्रतकालिकां वार्त्तामनादृत्ययथार्हमपरीक्ष्य विस्मृतराजनीतिर्निष्कारणं मां निहन्तुंतत्परो जातोऽसितर्हिंकिंत्वादृशमधर्मकारिणं नृपं यमोनदण्डयिष्यति ?

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हे नृपते ! तवैव गृहे स्थित्वा भुक्तभोगोऽहं कतमानिदिनानिसुखेन व्यनैषम्, तत्सर्वं मनसिनिधाय त्वयिचदयांविधायेदानी-मनापृष्टोऽप्यहं प्रथमतःप्रारभ्य सविस्तरांमदीयांवार्त्तां कथयामितन्मनोदत्त्वा त्वयाश्रूयताम्। इतोगतनवमदिनस्य मध्यरात्रि समये कश्चिदुच्चैःस्वरेणरुदन्तं निशम्यसहसाविनिद्रेण भवता कोऽसौरोदनं करोति ! तच्छुद्धिहेतवे भवताऽहमादिश्यत, तत्स्मरति भवान्नवा ? ततश्चतवकिंजातमिति विचारंदूरतो विहायभवान्सहसा ममवधायप्रावर्त्तत। परमधुनातवपर्य्यङ्कस्या-धस्तात्किं निपतितमितिदृष्टिगोचरं कुरु, पश्चान्ममशिरःछेदस्त्वया विधातव्यः। इत्थं तदीयानिनिर्ममत्ववाक्यानि श्रुत्वा सद्यो नरपतिस्ततः समुत्थायस्वप्रासादं गत्वापर्य्यङ्कस्याधोभागे रजतस्थाले सम्भृतान्सर्पखण्डान्रुधिरव्याप्तंतत्रपतितं खड्गञ्चविलो-क्यविस्मयंप्राप। अहो ? गुरुतरोपकारी ममजीवितव्यप्रदायकोऽयं पुरुषोविद्यते, परंसर्पमारणरोदनशुद्ध्योश्च सम्बन्धो न घटते, इतिस्वमनसिविचिन्तयन्नृपतिर्व्याघुट्यपुनः सभास्थानमागतः। धनपालं महोपकारिणं मन्यमानोनृपः सत्कारपुरः-सरंतंस्वान्तिके समुपवेश्यपृच्छतिस्म–कुमार ! रात्रौरोदनस्य भुजङ्गमारणस्यच कः सम्बन्धः ? असौ नागःकेनप्रकारेण प्रासा-दान्तरेसमागतः ? त्वयाकथं निहतः ? तत्सर्वं स्पष्टीकुरु। इत्थं राजप्रश्नान्समाकर्ण्यधनपालेन राज्यामन्दिरान्तर्यज्जातंवृत्तान्तं तत्सकलमनुक्रमेण साद्यन्तं निवेदितम्। राजाऽपितद्यथार्थं विज्ञायविनम्राननः स्तब्धमतिर्दिक्शून्यइवाजनि, तादृशंजातानु-शयंतंभूपतिं विलोक्यधनपालोऽवादीत्–नरेंद्ररत्न ! मया यदुदन्तंव्याख्यायि तत्सर्वं भवतश्चेतसिपरिणतं कच्चित् ? इतिदूतोक्तिं निशम्यविलज्जितोभूपोधनपालस्य कण्ठमालिङ्ग्य रुरोद, रे ? अद्य मत्प्राणरक्षकस्य कालभुजङ्गान्मोचयितुस्तव मारणाय समुद्यतोऽस्मि, अतोमादृशोऽधमोऽस्मिँल्लोकेनाऽन्योस्ति। इत्यादिविविधानि क्षमापनवचनान्यभिधाय तस्यमनःसमाधाय



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुनर्नृपतिरुवाच–जीवितदायक ? अहंतवापराधकारकोऽस्मि, तस्मान्ममयोग्यां शिक्षांकुरु, शिरसात्वदुक्तं दण्डंस्वीकरोमि। मित्र ! यदित्वमेवापराधिनोममाशिक्षां करिष्यसिचेदग्रे परमाधार्मिकभयंमे नभविष्यति। ईदृशं राजवचनं समाकर्ण्य धनपालोऽवदत्–भवान्ममपूजनीयः स्वामी, अहन्तुभवदीयःसेवकोऽस्मि, तदघटितमेतदकृत्यं कथमहंकरोमि ? राज्ञाभणितम्–अस्त्वेतस्मिन्विषयेकाऽपि चिन्तानास्ति, किन्तुवरं याचस्व, यत्त्वं प्रार्थयिष्यसितदहं दास्यामि, किंबहुजल्पनेन ? इदं राज्यं सर्वस्वञ्च यदि मार्गयिष्यसि तदपिवितरिष्यामिखलु, तस्माद्ब्रूहि। इत्थं तदीयमनवद्यं भावयुक्तं वचनंविज्ञाय धनपालोऽवदत्–राजन् ! निर्धनत्त्वाद्भवच्छरणमायातस्य ममसदैवरक्षणं भवताविधेयमित्येतावता सुप्रसन्नोऽस्मि। इत्थं तदीयवचनेनाप्लावितहृदयोनृपतिर्जगाद–कुमार ! एवंमा वद, त्वन्तुपितृवन्मम माननीयोऽसि। यतः—योनरो जन्मदाता स प्रथमः पिता ज्ञेयः, येनतत्त्वज्ञानप्रदानेन धर्मबोधोविहितः स द्वितीयः, यः सद्विद्याप्रदाता सतृतीयः, अन्नदायकश्चतुर्थः, सर्पाद्यनेकविधभयेभ्यो रक्षकः पञ्चमः पितेत्येवंपञ्चविधोजनकसम्बन्धो धर्मशास्त्रेप्रकाशितोऽस्ति, तन्मध्ये भवानागतोऽस्ति, ममनूतनजन्मप्रदातारं त्वांपितृसमानंमन्ये, अद्यप्रभृतिसराज्योऽहं त्वदायत्तोसि, मदीयराज्यव्यवस्थामपि तव करस्थितां विजानीहि, एतादृशं नृपभाषितं समाकर्ण्य धनपालोऽगदत्–पृथ्वीपाल ? त्वदीयमुदारमिदं वचः श्रुत्वा परमानन्दमहं प्राप्तोऽस्मि। परमात्मानञ्चैतावद्याचे, यदिदं तवराज्यं सम्पदश्चचिरकालमुत्तरोत्तराऽभिवृद्ध्या भवद्वंशजानामक्षया भवन्तु, दीर्घायुस्त्वंभव, सदाकालं राज्यञ्च सुखेनपालय। अनेन धनपालवचसा सम्भृतप्रमोदसन्ततिर्महीपालस्तंकुमारं स्वराज्ये प्रधानपदभाजंविधाय सर्वराज्यसत्तांतस्मै समर्पयामास। ततोमुख्यमन्त्रिपदमारूढस्य धनपालस्य वार्त्ता सर्वत्र नगरान्तरेषु प्रसरतिस्म। अथकियद्भिर्दिवसैः स्वनगरेऽपि प्रधानपदप्राप्तिवृत्तान्तस्यश्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वर्णं समभूत् । तदानीं धनपालपितुर्योमुख्यः कार्यकर्त्ताप्राचीनोऽभूत्सएवतस्य धनपालस्य भार्यां निजपितृगेहस्थितामाशु समादायात्रपत्तने समागत्य धनपालसमीपं जगाम । तेनकार्यवाहकेन तत्प्रतीत्यर्थं स्वानुभूतं सर्वं वृत्तान्तं निवेदितम् । ततोधनपालेनाऽपि निजसेवकवचनं सम्मान्य स्वकीया पत्नी स्वीकृता । तस्मिन्समये धनपालोऽवोचत्—मन्त्रिपुङ्गव ! ममस्त्री पञ्चत्वं प्रपन्ना, मत्पितुः सर्वसम्पत्तयो धर्मकार्येषु व्ययिताआसन्, गृहहट्टभाण्डादिकमवशिष्टं यत्किञ्चित्सर्वं भवतः प्राभृतीकृतमभूदेवं पूर्वं त्वमकथयस्तस्य किं कारणम् ? अधुना तत्सर्वं मांप्रदातुं कथं समायातोऽसि ? तत्कारणंवद । मन्त्रीबभाषे—कुमारेन्द्र ! तव पितुर्मरणसमये तवकीदृशीस्थितिरासीत्तत्स्वयंजानासि, तस्मिन्समये मयाशोभनस्थितिसम्पादका येप्रयोगा दर्शितास्तेषां समाचरणेनाधुनाफलं किं भवता न प्रत्यक्षीकृतम् ? तस्यविचारणा स्वयमेव क्रियताम् । भवदन्तिकस्थितं सकलं धनं यदाव्ययितमभूत्तदातस्या वाराङ्गनायाः कीदृक्षः प्रेमभावोऽभवत्तदनुभवार्थमेवपश्चाच्चभवतः सत्प्रवृत्तिकरणार्थमस्माभिरेष प्रपञ्चोऽक्रियत । इदानीं युष्मदीयं सत्प्रवर्त्तनमालोक्यातीवसन्तोषं व्रजामि, भवतः पितुर्याधनगृहोद्यानादिका अखिलर्द्धयस्ताः सर्वा भवतास्वीक्रियन्ताम् । अद्ययावद्युष्मत्पैतृकसम्पदादिभ्यो वराटिकामात्रमप्यसन्मार्गे मयानव्ययितम्, अधुना चर्म्मावस्थामहं प्रयातस्तस्माद्भवद्वंशपरम्पराप्राप्तां समृद्धिं स्वाधीनीकृत्य संरक्ष्य च प्राचीनवद्व्यवहाररचना भवताविधीयताम् । युष्माकं सद्मनि किं न्यूनमस्ति ? यतोऽस्य राज्यकार्यभारस्य प्राणापहारिण्यां व्यवस्थायां पतितोऽसि । एतावदुक्त्वा धनपालं तोषयित्वा स मन्त्रिपुङ्गवो विरराम । ततोधनपालोज्ञातनिजवृत्तान्तो भूपतेराज्ञामादाय नृपसकाशाल्लक्षप्रमाणं पारितोषिकं लब्ध्वा सभार्यः स्वगृहं प्रययौ । अहो ! अस्मिन्क्षणे दैवगतेः किंवर्णनंविधेयम् ? तथैवमानवानामुदयास्तयोर्वृत्तान्तं किं वर्णनीयम् ? यथा धनपालः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वकीयंपितृमरणसमये महादुर्व्यसनासक्तोद्यूतपरायणमित्रयूथेन सहाभ्रमत्, विषयेषुलम्पटत्वाच्च निर्लज्जोवेश्यास्त्रीमोहपाशनिबद्धस्तासामेवगृहवर्त्यभूत्, सएव धनपालोऽद्यच्छत्रधारिणस्तुलनां समाससाद। तस्माद्भोदैव ! तवसामर्थ्यन्त्वलौकिकमस्ति। इत्थं रत्नाकरमहेभ्यः सविस्तरं सर्ववृत्तान्तं निजपुत्रभार्यां शीलवतीं निगद्यपुनः प्रोवाच–हे शीलवति ! शुकमारणोद्यतचन्द्रसेननृपवद्वैदेशिकनरचतुष्टयस्य शूलिकारोपणसाहसकार्यरतमहीपालवत्कुजङ्गमसुखाद्रचकस्य धनपालस्य हननोद्यतमदनसेननरेन्द्रवच्च मयाऽप्यविचारितं कार्यं विहितम्, यत्तवयोग्याऽयोग्यस्य परीक्षामकृत्वा त्वां सहसाऽत्र समानयम्। पराङ्मुखे दैवे मनुजस्य कियत्सामर्थ्यम् ? एवंब्रुवाणो रत्नाकरः श्रेष्ठी शीघ्रं स्वरथं पश्चाद्वालयामास। तदानीं कानिचिच्छुभशकुनानि निरीक्ष्य शीलवती प्रमोदमेदुराऽजनि। ततो वर्त्मनिसानन्दं रथगतिं निरूपयन्रत्नाकरोऽवोचत्–हे वधूस्तवनिर्मलाऽऽदर्शइव मतिर्दृश्यते, प्राप्तविज्ञानप्रभावा त्वं विद्यसे, तथापि मार्गे कथं विपरीतवादिनी त्वं जाता ? तदुत्तरं ददानाशीलवत्युवाच–हे श्वशुर ! भवतायदुक्तं तत्सत्यमस्ति, परंमद्वचनं श्रुत्वा पश्चात्सत्यासत्यस्य निर्णयंस्वयमेवकुरु। पूर्वं तत्क्षेत्रपतिना द्विगुणकुसीदवृद्ध्यापरकीयं धनं गृहीत्वा महाप्रयासेनेदंक्षेत्रं सबीजाकृतम्। तस्मात्तत्रक्षेत्रे यद्धान्यं सम्पत्स्यते तत्सर्वंतद्धनपतिर्गृहीष्यति, क्षेत्रपतेस्तु किञ्चिदपिनावशिष्टं भविष्यति, अतोहमेवमवादिषमस्य क्षेत्रस्याधिपतिरिदमन्नं न भोक्ष्यते। अथाहमेवमादिष्टा भवता, यदुपानहौ करेण गृहीत्वा त्वयासरिदुत्तीर्यताम्, परंमया तथानाक्रियत, यतोजलप्रवाहेणादृष्टमार्गायां नद्यामनुपानच्चरणाभ्यां गमनेन कण्टकाद्याघातः स्याच्चेन्महापीडाभवेत्, कर्दमलेपेनविनष्टे चोपानहौ पुनरपि नवीने प्राप्येते, परं विनष्टौ चरणौ नूतनौ न जायेताम्। तस्मादेवमयोपानहौ चरणाभ्यां न निष्कासिते। तथैव पृष्ठभागे सञ्जातप्रहारं सुभटं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पलायमानं विलोक्यमयाज्ञातं यद्भीरुतयानश्यतोऽस्यपृष्ठेप्रहाराः सञ्जाताः, नायं सन्मुखंस्थित्वा युद्धविधायी, तस्मात्सुष्ठुकुट्टितोऽयमिति मयाभणितम्। अरण्यवर्तिनं देवालयं दृष्ट्वा भवता तस्य प्रशंसाऽक्रियत, परं तत्र शून्ये देवमन्दिरेस्तेना जारपुरुषाश्च निवसन्तीति विज्ञाय मयाऽशोभनं निष्प्रयोजनमिदमित्युक्तम्। पुनस्तस्मिन्विशाले नगरेऽस्माकं सम्बन्धिमित्राद्यभावान्नकोऽपि सत्कारसेवां विधास्यति. तस्मादहमत्रादिषमिदंनगरं शून्यं प्रतीयते। अथ तस्मिन् शून्यप्राये ग्रामे सत्कारादिविधायी ममममातुलोन्यवसत्तस्माच्छोभनोऽयं ग्रामइति मयाभणितम्। अथवटस्यच्छायायामुपवेशनार्थं भवता समादिष्टाऽहं तथानाकार्षम्, यतोयस्य पादपस्य शाखासु संस्थिता वायसादिविहगा विष्ठां कुर्वन्ति, तदधस्तान्निषण्णस्य शिरसि विष्ठापातः सञ्जायतेचेत्तर्हि तत्स्वामीस्वल्पकालेनविनश्यति, लक्ष्म्यादिविनाशश्च जायते। तस्मादेव यत्रविष्ठापतनभयं न भवति तादृश्यां रथस्यच्छायायामहमुपाविशम्। एवंविधानि सयुक्तिकानि शीलवतीवचांसिनिशम्य तानि च तत्त्वरूपाणि विज्ञाय सकौतुकः प्रमोदोल्लसितरोमाञ्चोरत्नाकरो मनसि व्यचिन्तयत्–यथा कस्यचिदगाधबुद्धिवैभवस्य जनस्य नैपुण्यमर्यादानविलोक्यते, यथा च निरवधिमतिशालिभिर्जनैः सदासेव्यमानस्य योगिजनस्य हृद्गुहाभिनिविष्टज्ञानसीमा दुर्विज्ञेया विद्यते, तथैवास्यावध्वा बुद्धिगाम्भीर्यमहिमा प्रतीयते। यथाभूमेः प्रमाणमस्ति, समुद्रोऽपि सप्रमाणो विज्ञायते, शास्त्रवेदिभिः सततं सूर्यगतिमानं कियद्भवतीति व्यलेखि, यद्यद्वस्तु जगति दृश्यते तस्य सकलस्य प्रमाणनियमो विहितोऽस्ति, परं सत्पुरुषविज्ञानविषयस्य मर्यादान्तो ज्ञातुमशक्योवर्त्तते। नूनमस्याः शीलवत्या अपि मतिः पयोनिधिवदतिगम्भीराऽनुमीयते। इत्थं विचारयन्प्रमुदितहृदयो रत्नाकरः श्रेष्ठी स्वनगरोपकण्ठमाजगाम। तस्मिन्कालेतत्रोच्चैःस्थलेनिषण्णस्तित्तिरिः स्वभाषया ननाद,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"तन्नादंश्रुत्वाशीलवती स्वचेतसि तदर्थंसकलंविभाव्य निश्चयामास–अनेन शकुनेन मम माहात्म्यंप्रतिदिनमधिकाऽधिकं भविष्यति, सर्वविपत्तयश्चविनाशमवाप्स्यन्ति, इति मनसिनिश्चित्य निजश्वशुरेणसाकं सा स्वगृहमियाय। तदानीं गृहस्थितोऽजितसेनकुमारोनिजपत्न्या शीलवत्यासमेतं समायान्तं पितरंविलोक्य भृशं चुक्रोध, जगादच–हे तात ! तावकीनं जीवितंधिगस्तु, महापापवेश्म दुश्चरित्रविधायिनी चेयमसती नारी कथमत्र पश्चात्त्वयाऽऽनीता ! अनया धूर्त्तया त्वमपिवञ्चित एवदृश्यसे। रे! महाबुद्धिनिधानोऽपि तद्वञ्चितोभवान्कथं विपरीतमिदं कृतवान् ! तथाविधं पुत्रवचनं निशम्य रत्नाकरोऽवोचत्-हीनमते ! तिरस्कारवचनानि मावद, त्वंमूढोऽसि किमपि नजानासि। असौवधूस्तु साक्षात्सरस्वतीजन्मधारिणी विद्यते, सर्वसम्पदां निधानश्चदृश्यते। प्रियपुत्र ? किञ्चिद्विचारंकुरु, गृहान्तर्गत्वा तवशय्यायां दृष्टिप्रसारंविधत्स्व, तत्र कोटीमूल्यानि पञ्चरत्नान्यनयावध्वा स्थापितानिसन्ति, तथैवाऽस्मिन्स्यन्दने दशकोटीमुद्राप्रमितंधनं समानीतमस्ति। तस्यपर्यालोचनंतु कुरु, तत्सर्वं मिलित्वा पञ्चदशकोटीमुद्रा अस्मद्गेहेऽनयैव सौभाग्यवत्या समानीता इतित्वंविद्धि। अतोऽसौवधूः साक्षात्कुलदेवीवास्मत्कुलभूषणस्य वृद्धिविधायिनी विराजते। इत्थं पितृवचनानि समाकर्ण्याऽजितसेनः सत्त्वरं समुत्थाय स्वकीयशय्यासनंगत्वा तत्रमुक्तानि पञ्चरत्नानि गृहीत्वा रथस्थितं दशकोटीधनंचसमादाय भृशं प्रमुदितस्तत्समग्रमेकीकृत्य पञ्चदशकोटीधनं स्वनिधानगृहे स्थापयामास। सम्पत्तिग्रहणे को विलम्बं कुर्यात् ? कोवा नप्रमोदते ! यतः–अर्थस्यपुरुषो दासो–दासस्त्वर्थो न कस्यचित्। इतिसत्यंमहाराज ! तेन बद्धोऽस्मिकौरवैः ॥ १ ॥ इतिभीष्मोक्तिः। यस्याऽस्तिवित्तं स नरः कुलीनः, स पण्डितः स श्रुतिमान्गुणज्ञः। स एव वक्ता सचदर्शनीयः, सर्वे गुणाः काञ्चनमाश्रयन्ति ॥ २ ॥ अहो ! कनकमाहात्म्यं, वक्तुं केनाऽपिशक्यते।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नामसाम्यादहोचित्रं, धत्तूरोऽपि मदप्रदः ॥ ३ ॥ तथाच–नवित्तंदर्शयेत्प्राज्ञः, कस्यचित्स्वल्पमप्यहो। मुनेरपियतस्तस्य, दर्शनाच्चलतेमनः ॥ ४ ॥ ब्रह्मघ्नोऽपि नरः पूज्यो–यस्याऽस्ति विपुलंधनम्। शशिना तुल्यवंशोऽपि, निर्द्धनः परिभूयते ॥ ५ ॥ स्त्रीरूपं मोहकं पुंसो–यून एव भवेत्क्षणम्। कनकं स्त्रीबालवृद्ध–षण्ढानामपि सर्वदा ॥ ६ ॥ न नरस्य नरो दासो–दासश्चार्थस्य भूपते !। गौरवं लाघवं वापि, धनाऽधननिबन्धनम् ॥ ७ ॥ विभवोहि यथालोके, न शरीराणि देहिनाम्। चाण्डालोऽपि नरः पूज्यो–यस्याऽस्ति विपुलं धनम् ॥ ८ ॥ त्यजन्ति मित्राणि धनैर्विहीनं, पुत्राश्चदाराश्चसुहृज्जनाश्च। तमर्थवन्तं पुनराश्रयन्ते, ह्यर्थोहिलोके पुरुषस्य बन्धुः ॥ ९ ॥ बुभुक्षितैर्व्याकरणं न भुज्यते, पिपासितैः काव्यरसो न पीयते। नच्छन्दसाकेनचिदुद्धृतं-कुलं, हिरण्यमेवार्जय निष्फला गुणाः ॥ १० ॥ धनैर्निष्कुलीनाः कुलीना भवन्ति, धनैरापदं मानवा निस्तरन्ति। धनेभ्यः परोबान्धवो नास्तिलोके, धनान्यर्ज्जयध्वं धनान्यर्जयध्वम् ॥ ११ ॥ दुन्दुभिस्तुसुतरामचेतन–स्तन्मुखादपिधनं धनं धनम्। इत्थमेवनिनदः प्रवर्त्तते, किंपुनर्यदिजनः सचेतनः ॥१२॥ त्यक्त्वा युवा स्वयुवतिं स्वविलासयोग्यां, दूरं विदेशवसतौ निवसन् धनार्थी। रात्र्यागमे स्मरति तां न समेति तस्मा–त्कान्ताभ्रमादपि वरः कनकभ्रमोऽयम् ॥ १३ ॥ जातिर्यातु रसातलं गुणगणस्तस्याप्यधोगच्छतु, शीलंशैलतटात्पतत्वभिजनः सन्दह्यतां वन्हिना। शौर्येवैरिणि वज्रमाशु निपतत्वर्थोऽस्तु नः केवलं, येनैकेनविना गुणा स्तृणलवप्रायाः समस्ता इमे ॥१४॥ माता निन्दति नाभिनन्दति पिता भ्राता न संभाषते, भृत्यः कुप्यति नानुगच्छतिसुतः कान्ताच नालिङ्गते। अर्थप्रार्थनशङ्कया न कुरुते संभाषणं वै सुहृ–त्तस्माद्द्रव्यमुपार्जयस्व सुमते ? द्रव्येण सर्वे वशाः ॥ १५ ॥ अतः समृद्धिचयंदृष्ट्वाऽजितसेनकुमारः परमानन्दितः स्वभार्यायाः कौतुकजनकंवृत्तान्तं निजजनकं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पप्रच्छ। हे पितः ! कुतोऽयंधनलाभोऽजायत ? केन प्रकारेण युवयोःपुनरागमनमभूदिति पुत्रोक्तिप्रेरितो रत्नाकरः प्रोवाच–हे सूनो ? अस्मान्मयि निर्गतेवर्त्मनि महामतिशालिन्याऽनयाशीलवत्या यान्याश्चर्यजनकानि बुद्धिसाध्यानि कार्याणि प्रकाशितानि तानि विलोक्याहन्तु साक्षाद्देवाङ्गनामिवैतां मन्ये। इत्यभिधाय तदीयं सर्ववृत्तान्तं साद्यन्तं तस्मैकथयामास। इत्थं स्वजनकोक्तं निजभार्याया बुद्धिनैपुण्यं निशम्य लज्जाक्रान्तमानसो जातानुशयः कौतुकितः प्रमोदमेदुरोऽजितसेनोऽजनिष्ट। ततश्चिरं भूतलं निरीक्षमाणः स विचारशून्य इवालक्ष्यत। येजनाःसत्याऽसत्यपरीक्षामकृत्वा सहसाऽविचारितकार्यं विदधति, तेऽजितसेनवत्पश्चात्तापमवाप्य निम्नवदना भवन्ति। तस्माद्भोः श्रोतृजनाः ? तत्त्वग्राहका भवथ, गुणानामगुणानाञ्च परीक्षायां सामर्थ्यं भजत, सत्पुरुषाणामिदमेवलक्षणं विनिर्दिष्टम्–यत्स्वकृतमपराधं विज्ञाय धृतलज्जोऽधोमुखः सज्जनस्तिष्ठति, यतो महतां नराणां हृदयमाश्रित्य लज्जादयो विशेषगुणा विश्राम्यन्ति। इतो भूतलबद्धदृष्टिरजितसेनः स्वचेतसिव्यचिन्तयत्–मम चातुर्यकलांजीवितश्चधिगस्तु। यथाऽसत्कविः स्वनैपुण्येन पण्डितायते तथैवाऽहंजातोस्मि, यतोनिष्कलङ्का भार्या मयामुधा कलङ्कीकृता। लोकोत्तरचारुचरित्रामेतां सतीमतह्निकांभृशमपीडयम्। तस्याः क्रोधशान्तिंकेनप्रकारेणाहं करिष्यामि ? एवं शोचमानमजितसेनं तत्पिता रहसि समाहूय बोधयामास। सूनो ? किमर्थंशोचसे ? शान्तोभव, यतो यत्कार्यमनभिज्ञतया-सम्पद्यते तस्मिन्मानवदोषो नैवगण्यते। तथैव तव भार्याऽपिसमस्तगुणमण्डिता शान्तरससुधासेविनी वर्त्ततेऽतः सर्वं त्वदपराधं सा सहिष्यते। इत्थं निगद्य न्यायनिपुणौ जनकात्मजौ स्वापराधान् शीलवतीसन्निधौगत्वा क्षमयामासतुः, ऊचतुश्च-अद्यप्रभृतिसाहसिकीं कामपिक्रियां नविधास्यावः, ईदृशानि निजश्वरश्रुस्वामिनोर्वात्सल्यभृतानि वाक्यानि श्रुत्वा शीलवती

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





विनयोल्लसितमानसाऽवादीत्–हे पूज्यपादौ ! अस्मिन्कार्यप्रस्तावे भवतोरेव केवलं दोषो नास्ति, यतो मयाऽपि पूर्वंपश्चरत्नानां प्राप्तिवृत्तान्तं भवतामग्रे नप्रकाशितमतोऽहमपिसदोषाऽस्मि, साच ममापराधस्यैवशिक्षा जातेतिमन्ये । अथ तौ जनकात्मजौ कार्यवाहकाविव शीलवत्याः सुविहितामाज्ञां पालयतः स्म । यथा पूज्योऽपि गुरुर्मेधाविनं सुविनीतं शिष्यं पृष्ट्वा कार्यं साधयति, तथा तावपि शीलवतीबुद्ध्यनुसारेणैवयत्किश्चिदपिकार्यंकुरुतः । गाढान्धकाराऽभिव्याप्ते प्रदेशे निपतितानां जनानांदीपिकेव शीलवती निजबुद्धिप्रभावतःसमजनि । सर्वासामापदांनिवारयित्रीचसा व्यजायत, पश्यत बुद्धेः साफल्यंकीदृग्विधमस्ति ? उक्तश्चाऽन्यत्र–यस्यबुद्धिर्बलंतस्य, निर्बुद्धेस्तुकुतोबलम् । पश्य सिंहोमदोन्मत्तः, शशकेन निपातितः ॥ १ ॥ अपूर्वः कोऽपि-कोशोऽयं, विद्यते तव शेमुषि ! । व्ययतो वृद्धिमायाति, क्षयमायाति सञ्चयात् ॥२॥ अनेकसंशयोच्छेदि, परोक्षार्थस्यदर्शकम् । सर्वस्यलोचनंज्ञानं, यस्यनास्त्यन्धएवसः ॥ ३ ॥ सर्वद्रव्येषुमेधैव, द्रव्यमाहुरनुत्तमम् । अहार्यत्वादनर्घ्यत्वा–दक्षयत्त्वाच्चसर्वदा ॥ ४ ॥ हर्त्तुर्नगोचरंयाति, दत्ताभवति विस्तृता । कल्पान्तेऽपिन या नश्ये–त्किमन्यन्मतिना समम् ॥५॥ ज्ञातिभिर्वण्ट्यतेनैव, चौरेणाऽपिननीयते । दाने नैवक्षयंयाति, बुद्धिरत्नं महाधनम् ॥ ६ ॥ मातेव रक्षति पितेव हितेनियुङ्क्ते, कान्तेव चाभिरमयत्यपनीयखेदम् । लक्ष्मींतनोति वितनोतिचदिक्षुकीर्त्तिं, किं किं न साधयति कल्पलतेवबुद्धिः ॥७॥ श्रियःप्रदुग्धेविपदोरुणद्धि, यशांसि सूते मलिनं प्रमार्ष्टि । संस्कारशौचेनपरंपुनीते, शुद्धाहिबुद्धिः किलकामधेनुः ॥ ८ ॥ वसुमतीपतिना न सदामति–र्बलवतारिपुणाऽपि न नीयते । समविभागहरैर्नविभज्यते, विबुधबोधबुधैरपिसेव्यते ॥ ९ ॥ सद्बुद्धिर्यदिका चिन्ता, वराकोदरपूरणे । शुकोऽप्यशनमाप्नोति, रामरामेतिचब्रुवन् ॥१०॥ ततोरत्नाकरश्रेष्ठिनोगृहे मुख्याधिकारिणी शीलवती जज्ञे । यतोवयसा



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लघुरापिगुणैर्ज्येष्ठालोकेजायते। उक्तञ्चान्यत्र-गुणाःकुर्वन्ति दूतत्वं, दूरेऽपिवसतांसताम्। केतकीगन्धमाघ्राय, स्वयमायान्तिषट्पदाः ॥ १ ॥ यदि सन्तिगुणाःपुसां, विकसन्त्येव तेस्वयम्। नहि कस्तूरिकामोदः, शपथेननिवार्यते ॥ २ ॥ गुणाः सर्वत्र पूज्यन्ते, पितृवंशो निरर्थकः। वासुदेवं नमस्यन्ति, वसुदेवं न मानवाः ॥३॥ शरीरस्य गुणानाञ्च, दूरमत्यन्तमन्तरम्। शरीरं क्षणविध्वंसि, कल्पान्तस्थायिनोगुणाः ॥४॥ गुणैः पूजा भवेत्पुंसां, नैकस्माज्जायतेकुलात्। चूडारत्नं शशी शम्भो-र्यानमुच्चैःश्रवा हरेः ॥ ५॥ सर्वत्र गुणवान्देशे, चकास्तिप्रथितो नरः। मणिर्मूर्ध्नि गले बाहौ, पादपीठेऽपि शोभते ॥६ ॥ गुणानर्चन्ति जन्तूनां, नजातिं केवलां क्वचित्। स्फाटिकंभाजनंभग्नं, काकिण्याऽपिनगृह्यते ॥ ७ ॥ नहि जन्मनि ज्येष्ठत्वं, ज्येष्ठत्वंगुणउच्यते। गुणाद्गुरुत्वमायाति, दधि दुग्धं घृतं यथा ॥ ८॥ गुणेषु यत्नःपुरुषेण कार्यो-न किञ्चिदप्राप्यतमंगुणानाम्। गुणप्रकर्षादुडुपेनशंभो-रलङ्घ्यमुल्लङ्घितमुत्तमाङ्गम् ॥ ९ ॥ वक्रोऽपि पङ्कजनितोऽपिदुरासदोऽपि, व्यालाश्रितोऽपि विफलोऽपि सकण्टकोऽपि। गन्धेनबन्धुरसिकेतक ! पुष्पजेन ह्येकोगुणः खलुनिहन्ति समस्तदोषान् ॥१०॥ सर्वत्रगुणाः श्लाघ्यन्ते, तस्माद् गुणेषुयत्नः सततंविधेयः, किमाटोपैः प्रयोजनम् ! क्षीरविवर्जितागावोघण्टाभिर्नविक्रीयन्ते। पूज्यता गुणेषुव्यवस्थिता नवयसि। अथरत्नाकरः श्रेष्ठी वृद्धावस्थामनुभवन्निवृत्ताऽन्यकारणः स्वधर्मैकनिष्ठः पूज्येषु गुरुजनेषु सेवाभक्तिं त्रिकरणशुद्ध्या प्रकुर्वन्विविधानिदानानिपात्रेभ्यः प्रकल्पयन्गृहावासेस्थितोदिनानिनिर्गमयामास। व्यावहारिके सकलगृहकर्मणिबुद्धिमन्तमजितसेनं स नियोजयामास। स्वयंनिवृत्तिपरायणस्तस्थौ। इतः कियद्भिर्दिवसैरत्नाकरः श्रेष्ठीदेवलोकंजगाम। ततोगृहकार्यधुरन्धरो भूत्वाऽजितसेनोमहतोव्यापारान्कर्त्तुंलग्नः। यस्याज्ञानुसारिणः सहस्रशोभृत्याः कार्यसम्पादका अभूवन्। देशान्तरेषुनानाविधा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





व्यापाराः सदोदिताः प्रावर्त्तन्त। स्वदेशजनितानि क्रयाणकानिविदेशेषुयःप्राहिणोत्, देशान्तरीयाणि वस्तूनिचस्वयमानाय-यतिस्मेत्थमनेकधाव्यवहारपटुतया तस्य कुमारस्य प्रसिद्धिः सर्वत्र विशेषतोजज्ञे। तथैव राजसभायामपिस लब्धप्रतिष्ठोऽभूत्। प्रतिदिनं स राजमन्दिरे च कार्यवशाद्गमनागमनमकार्षीत्। अथाऽन्यदा राजसभायामजितसेनकुमारः स्थितस्तावत्सिंहासनारूढो भूपतिश्चिन्तयामास–इदानींमत्कार्यचिन्तकाएकोनचतुःशतीप्रधानाः सन्ति, तेषु मुख्यामात्यपदवीधारकःकोऽपिनास्ति, तस्मात्तत्पदयोग्यः कोऽप्यस्तीतिजिज्ञासुर्नृपतिः सभासमक्षमिति प्रश्नंचकार–हे सभ्याः! यदि कश्चिन्नरःपादप्रहारेणमांताडये-त्तर्हितस्यकिं शिक्षणं विधेयम्? ततोऽज्ञातनृपाभिप्रायाःसर्वेजना अवदन्–कृतापराधः स महादण्डस्यपात्रंजायते। अथभूपतिःस्वसन्निधौसंनिविष्टमजितसेनमपृच्छत्–महेभ्य! बहून्देशान्भवानभ्रमदतस्त्वमस्य प्रश्नस्योत्तरं ब्रूहि, इत्थंनृपतेर्वचनं निशम्य श्रेष्ठी जगाद–भूपते! विचारसाध्योऽयंप्रश्नस्ततोगृहंगत्वा पर्यालोच्य तदुत्तरं भवन्तं कथयिष्यामि। इतिनृपतिमभिधाय स निजनिकेतनमाययौ। आगत्य च निजपत्नींशीलवतीं राजप्रश्नं निवेदयामास, तदा चतसृषु विद्यासु परिनिष्ठितबुद्धिः सा विचार्य तं कथयामास–स्वामिन्! यदि नरः पादप्रहारंकरोति तदा राज्यमर्हति, यदिचप्रमदा पादप्रहारं विदधाति तर्हि षोडशशृङ्गाराणां योग्या भवति, एवंनिजभार्यावचनं श्रुत्वाऽजितसेनोऽवदत्–वल्लभे? कथमेवमपराधिनः सत्कारोयुज्यते? शीलवत्यवोचत्–स्वामिन्? राज्ञीराजकुमारौ विनाऽन्यः कोऽपिजनो राजानं पादेन प्रहर्तुं न समर्थ इत्युक्तमात्रेण विगतशङ्कोऽजितसेनोबभूव। स्वचित्तेनिजस्त्रिया बुद्धिवैभवंमुहुः संस्मृत्य परंविस्मयमवाप। अथद्वितीयस्मिन्दिनेप्रातः समुत्थाय विहितनिजधर्मक्रियोऽजितसेनो राजसभंप्रपद्य राजानं प्रणम्य पूर्वोक्तप्रकारेण तत्प्रश्नोत्तरं निवेदयामास। भूपतिस्तथाविधमुत्तरं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निशम्य प्रमुदितहृदयः पुनर्द्वितीयं प्रश्नमजितसेनमपृच्छत्–बुद्धिनिधान ! अस्मदीयोऽयं करीन्द्रोवर्त्तते, तंतोलय कियन्मानोऽस्ति ? इत्थं नृपवचनमङ्गीकृत्य श्रेष्ठी निजगृहमागत्यशीलवतींपप्रच्छ–कान्ते ! हस्तितोलनस्योपायंदर्शय, शीलवत्या तदुपायः प्रदर्शितस्ततोऽजितसेनो नृपहस्तिनंसमादाय नृपादिषु पश्यत्सु तं नावि समारोप्य यावन्तीजलेनिमग्ना नौस्तत्र रेखाचिह्नं निर्माय तस्यानौतः करिणमुत्तार्य यावद्रेखं नौर्जले निममज्ज तावन्तः पाषाणखण्डास्तस्यां संभृताः पश्चात्तां नावंरिक्तीकृत्य सर्वानश्मखण्डाँस्तोलयित्वा स हस्तिमानमकथयत् । इत्थमजितसेनस्यबुद्धिवैभवंविलोक्यभूपतिस्तंभृशं प्रशशंस । अथान्यदा कस्मिंश्चित्समये राजसभायां कश्चिदेको वणिग् भूपतिं नमस्कृत्य व्यजिज्ञपत्–नरनायक ! किम्पाकफलोपमोमुखे मधुरोऽभ्यन्तरे विषमविषधारको वणिग्धूर्त्तः कश्चिदस्मिन्नेव पत्तनेनिवसति, तेनसाकमज्ञानधियाऽशुभकर्मणामुदयाद्वा ममैत्री समजनि, यथाकदल्या बदरीवृत्तेण सह कुतश्चिद्योगोभवति तद्वन्ममाऽपि सञ्जातः । अन्यदा धनार्जनेच्छुरहं तस्मै धूर्त्तमित्राय मम गृहव्यवस्थां निवेद्य देशान्तरमव्रजम् । तदनु फलितक्षेत्ररक्षकोयथाक्षेत्रजन्यवस्तूनिभुङ्क्ते तथाऽयंदुराचारी मदीयं सर्वस्वमपहृत्यात्मसात्कृतवान् । अवसरं प्राप्य मम भार्ययासह दुराचारतयाऽसौ प्रावर्त्तत । अहो ! दुष्टा जना निन्द्यकार्योद्यताः किंकिंन कुर्वन्ति ? दैवादपिते नबिभ्यति । इतः कालान्तरे लब्धधनोऽहं देशान्तराद्गृहमागतस्तदामदागमनवृत्तान्तं ज्ञात्वा सधूर्त्तोऽपि ममभीलनायसमागतः। धनप्राप्तिविषयकं सर्वं वृत्तान्तं मूलतः समारभ्य मयातस्मै निवेदितम् । तच्छ्रुत्वा कलुषितमानसः सधूर्त्तो मामवदत्–मित्र ! देशान्तरेचिरं परिभ्रमताभवता यत्किञ्चिदाश्चर्यं व्यलोकि तन्निवेद्य मां सन्तर्पय । तदाऽहं वर्त्मन्यागच्छन्यद्दृष्टवाँस्तदकथयम् । इतोनातिदूरे वृक्षघटामण्डितो रमणीयलक्ष्मीरेकोऽस्त्यु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





द्यानस्तत्र निर्मलोदकसंभृतः कूपोविद्यते, तस्मिंश्चकूपे जलोपरि संस्थितं फलकदम्बकं पुष्पैःपरिवेष्टितं मनोरञ्जकं मयाऽव्यलोकि। तच्छ्रुत्वा सधूर्त्तो मामवादीत्–मित्र ! त्वं मृषाकथनेन मां वञ्चयसि, यदि त्वदुक्तं वचनं सत्यं स्यात्तर्हि त्वयाकरद्वयग्राह्यं मदीयं धनंग्राह्यम्, यद्यसत्यं तद्भवेत्तदात्वदीयां सम्पत्तिंद्वाभ्यां हस्ताभ्याग्राह्यामहं गृह्णामि, इत्थं मां कथयित्वा सधूर्त्तो रात्रावेकाकी कूपोपकण्ठं गत्वा तानि फलानिकूपात्समुद्धृत्यगृहीत्वा च गुप्तसञ्चारो निजालयमागत्य सुष्वाप। प्रभाते स समागत्य मामवादीत्–मित्र ? कूपस्थानि फलानि दर्शय, त्वरांकुरु, तत्रव्रजाव। एवं तद्वाक्यं श्रुत्वातेन धूर्त्तेन साकमहं तत्र गत्वा व्यलोकयं परंफलानि नापश्यम्। इदानीं मदुक्तिमसत्यां मन्यमानः सधूर्त्तो धनसहितां मद्भार्यां गृहीष्यति, तच्चिन्तया पीडितोहमत्रागतोऽस्मि। अस्मिन्विषये कीदृगुपायो मयाविधातव्यः ? मयिकृपांविधाय सम्यक्तदुपायंब्रूहि, भूपते ! यथा कमलोपविष्टो भ्रमरः सूर्यास्तसमये संकुचत्पत्रेण कमलेन बद्ध्यते, पुनःसूर्योदयेजाते तद्बन्धनान्मुच्यते, तथैव मादृशे दीने जनेदयां विधायेदृश्यापत्पयोधौपतितं मां केनाऽप्युपायेन समुद्धर। प्रभो ! विषमसमये दीनानां भूपतिरेव शरणं प्रकीर्त्तितम्,–यतश्चोक्तम्–दुर्बलानामनाथानां, बालवृद्धतपस्विनाम्। अनार्यैः परिभूतानां, सर्वेषां पार्थिवोगतिः ॥ १ ॥ इत्थं तस्य वणिजो वचनं श्रुत्वा नरपतिस्तत्कार्यं कर्त्तुमजितसेनं समादिशत्। अजितसेनोनृपतिवचनंप्रमाणीकृत्य सद्यस्ततःसमुत्थाय स्वगृहंसमेत्य देवीतुलामावहन्तीं शीलवतीं तद्वृत्तान्तमाचचक्षे। ततः शीलवतीकथितांयुक्तिंस्वयंगृहीत्वाद्वितीयस्मिन्वासरे प्रभाते राजसभां समागत्य तं वणिजमजितसेनोऽब्रवीत्–वणिग्वर्य ! त्वं गृहंयाहि निजकान्तां सर्वधनञ्च हर्म्यस्थद्वितीयस्यां भूमौ स्थापयित्वा तदीयंद्वारं त्वया पिहितव्यम्। तत्र चारोहणस्थले महती निःश्रेणिः स्थापयितव्या। ततः सधूर्त्तस्तव



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सम्पत्तिंगृहीतुं समागमिष्यति, परं किमपिवस्तु स्वग्रहणाहर्मधःस्थितं न विलोकयिष्यति तदा द्वितीयभूमिं समारोढुमुभाभ्यां हस्ताभ्यां निःश्रेणिमालिङ्गिष्यति, तस्मिन्क्षणे त्वयैवं स वाच्यः, भोमित्र ? त्वया यत्प्रतिज्ञातंतत्तथैव सम्पूर्णं जातम् । अत स्त्वंनिःश्रेणिं गृहीत्वागृहं याहि । इत्थमाजितसेनप्रबोधितः स वणिक्तथैव व्यवस्थामकरोत् । अथ सङ्केतितेसमये स धूर्त्तो धनलिप्सुस्तत्रसमागत्य वणिजं कथयामास– करग्राह्यं धनंमेदेहि, वणिजा कथितम्–इदं सदनं भवदधीनं कृतमस्ति, यद्भवते रोचते तद्गृह्यताम् । विलम्बंमाकुरु । ततः सधूर्त्तइतस्ततोविलोकमानः स्वोचितंवस्तु किमप्यपश्यन्गृहान्तःस्थितं द्वितीयां भूमिं समारोढुं यावन्निःश्रेणिमाश्लिष्यति तावत्सवणिक्तमुवाच–मित्र ? धीरोभव या तव प्रतिज्ञाऽभूत्सा परिपूर्णा जाता, आवयोर्नियमः कीदृशोऽस्ति ? तत्स्वयं विचारय, तन्नियमानुसारेणेमां करगृहीतांनिःश्रेणीं लात्वा गृहंव्रज । इत्थं वणिग्वचनं समाकर्ण्यविलक्षीभूतोनिःश्रेणिं परित्यज्य शोकाग्निना दह्यमानो धूर्त्तो निजगृहं प्रययौ । अथ भूपतिः प्रधानादिसभ्यजनैः सहाजितसेनस्य बुद्धिप्रभावं प्रशंसतिस्म । भृशं तुष्टोनरेन्द्रश्च सर्वेषु प्रधानवर्गेषु मुख्यपदभाजमजितसेनमनीप्सन्तमपि चकार । अहो ? एतादृशीगुणशालिनी कान्ता कस्य नररत्नस्य भवेत् ? प्राक्तनपुण्यशालिन एवस्यान्नाऽन्यस्य, अजितसेनकुमारो मुख्यप्रधानपदं समारुह्य राजवल्लभोऽभूत् । इतो महासमृद्धिविभूषितं काञ्चनपुराभिधं काञ्चनमयं पत्तनमस्ति, तत्र प्रौढविक्रमो विश्वविश्वप्रकाशकः सदा सद्व्रतशाली प्रजापालनतत्परोविद्वज्जनसंमतो विश्वचन्द्राभिधो नृपती राज्यं करोति । तस्मिन्नेवनगरे श्रीमतामग्रणीः सत्यशाली परमधार्मिकः सुतरां दयालुः परोपकारैकबद्धसख्यो रत्नविक्रेता पूर्णचन्द्रनामा श्रेष्ठी वसतिस्म । तस्य पराक्रमशालिनो धर्मवासितचेतसो दयाविभूषितमानसाः सुमतिचन्द्रनवीनचन्द्रविनयचन्द्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





बालचन्द्रेत्यभिधानाश्चत्वारः पुत्रा आसन्। निर्मानमानसास्ते धर्मबुद्धयो मातापित्रोः शुश्रूषां सद्भावतो नित्यं चक्रुः। यतः–पितैव दैवतं पुंसां, माता तीर्थमुदाहृतम्। येन नाराधितं तद्धि, तस्य जन्म निरर्थकम्॥ १॥ सुशीलयोस्तयो राशीर्वादेन तेषां चतुर्णां बन्धूनां कीर्त्तिर्देशान्तरव्यापिनी बभूव, राज्येऽपि तेषां प्रतिष्ठा सुस्थिराऽजायत। ततः कियता कालेन वृद्धावस्थामनुभवन्पूर्णचन्द्रश्रेष्ठी निजानात्मजान्निजान्तिके समाहूय सद्बोधं प्रदाय स्वोपार्जितां सम्पत्तिं च समपक्षपातेन विभज्य तेभ्योऽदात्। अथैकं महामूल्यं रत्नं श्रेष्ठिना निजान्तिकेरक्षित्वा निजनन्दना इत्यभाष्यन्त–ममरणक्रियाकरणानन्तरमिदंरत्नं युष्माभिर्विभज्य निःपक्षपातेन गृहीतव्यम्। इत्थं निगद्यतद्रत्नं सर्वेषुभ्रातृषु निरीक्षमाणेषु निजमञ्जूषायां श्रेष्ठिना गुप्तीकृतम्, उक्तश्चतेन हे नन्दनाः ! यावदहंजीवामि तावदस्मिन्रत्नविषये भवतां किञ्चिदपि स्वामित्वं नास्त्येव, युष्माकं विभज्य या सम्पत्तयः स्वाधीनीकृतास्ताभिरेव यूयं सद्व्यवहारेणव्ययंकुर्वाणाः सुखशान्तिं भजत, इत्थंतान् विबोध्य श्रेष्ठी स्थावरजङ्गमात्मकं सर्वं वस्तु पुत्राधीनं विधाय निजधर्माराधनपरायणोबभूव। ततः कियता कालेन कालेन कवलितः स कालगतिं कलयामास। तस्मिन्समये चतुर्णांमध्येकोऽप्येको मञ्जूषास्थितं तद्रत्नमपहृत्यनिजेस्थाने प्रच्छन्नतयागुप्तीचकार। ततोनिजपितुर्मरणोत्तरक्रियांसंसाध्यकस्मिंश्चिद्दिनेतन्महारत्नविभागाय चत्वारोभ्रातरोमिलित्वातांमञ्जूषामुद्घाटयामासुः, तत्रतद्रत्नमपश्यन्तश्चत्वारस्तेरहसिविचारयामासुः–जनकेनास्यामेवमञ्जूषायांतद्रत्नममोचि, केनतदपहृतम् ! सत्यं कथ्यताम्। रत्नमोचनावसरेवयंचत्वारएवाभवाम, नाऽपरोऽभूत्। अतोऽस्मास्वेवैतद्रत्नापहारकोऽस्ति, परन्तस्यनिर्णयोऽत्रनभविष्यति। अतोनृपतयेविज्ञापनीयमिदंवृत्तान्तमितिमिथोमन्त्रयित्वा चत्वारो भ्रातरो विश्वचन्द्रनृपसन्निधौजग्मुः, ऊचुश्च–हेनृपते ! अस्माकंचतुर्णां भ्रातॄणामेकंरत्नंपित्राऽर्पितमासीत्, तच्चास्मासु केनाऽप्येकेनाचोर्यत,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नास्त्यत्रसन्देहः, यतोऽस्मद्व्यतिरिक्तः कोऽपितद्रत्नस्य वृत्तान्तं नवेत्ति। अतःस्तेनैरपितन्नापहृतम्। तस्माद्यथाऽन्येजना रत्नापहारकस्याभिधानंनजानन्ति तथा चातुर्यबलेनपरीक्षां विधाय यद्यस्यांसभायामस्मदीयंरत्नंसमानाय्यदर्शयिष्यसितदाभवतो महान्तं प्रसादं वयं मन्स्यामहे। इत्थं तदीयंचौर्यवृत्तान्तंनिशम्य नीतिशास्त्रनिपुणोऽपि विश्वचन्द्रभूपस्तेषांन्यायकरणे विश्रान्तमतिरासीत्, कश्चिदप्युपायस्तस्यनास्फुरत्। तदातेनकथितम्–हेवणिगात्मजाः! युष्माकंन्यायावलोकनं यथार्थमत्रन भविष्यति। तस्माद्यूयंनन्दनपुरंव्रजत, तत्रारिमर्दनभूपती राज्यंपालयति, सएवास्यन्यायस्यस्वरूपंनिर्णयिष्यति। एवमभिधाय विश्वचन्द्रःस्वयंसम्भावनापत्रमेकंसंलेख्य तेभ्यस्तत्पत्रंप्रदायतान्नन्दनपुरमभियातुंसमादिशत्। ततश्चत्वारस्तेस्वगृहं समागत्यवायुजवाँस्तुरङ्गमान्सज्जीचक्रुः, मार्गव्ययार्थं धनञ्चगृहीत्वा प्रयाणाऽभिमुखास्तेऽभूवन्। तदानीं रत्नाऽपहारकेण बन्धुना निजचेतसिचिन्तितंयदेषांत्रयाणांबन्धूनामप्येकोऽपिभ्रातासोपहासंमांकदर्थयित्वानपीडयेत्तस्मादिदं रत्नं स्वान्तिके गुप्ततयामयारक्षणीयम्। तदत्रगृहे मोचनात्स्वान्तिकस्थंवरमितिध्यात्वातद्रत्नं स्वसक्थिविदार्यतन्मध्येतेनगोपितम्। अथ चत्वारोभ्रातरः स्वस्ववाजिरत्नंसमारुह्याविलम्बितप्रयाणेनव्रजन्तोविपुलानि गिरिदुर्गवनानि समुल्लङ्घ्य कतिभिर्दिवसैर्नन्दनपुरंप्रापुः। तत्र कस्यांश्चिद्वाटिकायांविश्रम्य स्वस्थीभूतास्ते राजमन्दिरं गत्वा निजनरेन्द्रेण दत्तंसंभावनापत्रं नन्दनपुरस्वामिने समर्प्य कृताञ्जलयस्तंप्रणेमुः। ततोऽरिमर्दनभूपतिस्तत्पत्रमुन्मुद्र्यप्रावाचयत्, तदानींस कञ्चनपुरनगरनिवासिनः पूर्णचन्द्र श्रेष्ठिनः सूनवः प्रतापशालिनोबुद्धिमन्तोधृतधैर्यकञ्चुकाः स्वधर्मपरायणा भवन्तीत्यज्ञासीत्। यतो लोकमुखेभ्यः परम्परया तेषां महेभ्यसुतानां या कीर्त्तिस्तेनश्रुतासाऽधुना प्रत्यक्षतयास्वेनैवाऽनुभूयत। ततस्तान्सन्मान्य भूपतिःश्रेष्ठमेकंनिवास-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स्थानंप्रदाययथार्हभोजनादिव्यवस्थां प्रकल्पयामास। मार्गजन्यश्रमेणव्याकुलिताः श्रेष्ठिसुतास्तद्दिनं निर्गमयामासुः, द्वितीयस्मिन्दिने प्रभाते समुत्थाय निजकार्यं व्याधन्तस्ते विहितनित्यविधयो राजसभाया अवसरे जाते सभास्थानं प्रपद्य सिंहासनोपविष्टं भूपतिं प्रणम्य शिरसिनिहिताञ्जलिपुटास्तस्थुः। तेषां ज्येष्ठः प्रवीणबुद्धिः सुमतिचन्द्रः प्रोवाच—भूपाल ! पालयास्मान्न्यायदानेन, वयं नन्दनपुरवास्तव्याः, पूर्णचन्द्रश्रेष्ठिनः सुताः स्मः । वयं मौक्तिकरत्नादीनां व्यापारं कुर्मः। इतो मासत्रयादर्वागस्मदीयस्तीर्थकल्पः पिता स्वकीयां वृद्धावस्थां निरीक्ष्यास्माँश्चतुरोभ्रातॄन्निजान्तिके समाहूयास्माकमभिप्रायं गृहीत्वाच स्वोपार्जितां स्थावरजङ्गमात्मकां सकलां सम्पत्तिं समविभागेन विभज्य प्रदत्तवान्। एकञ्चानर्घ्यं महारत्नं बभूव, येन रत्नेन सप्तराज्यानि प्राप्यन्ते, तद्रत्नमविभज्याऽस्मज्जनकेनाऽस्माकं समक्षं स्वमञ्जूषायाममोचि, अवादिच—हे पुत्राः ! भवन्तः शान्तगुणाः सुशीला लोके कीर्तिमन्तो निगद्यन्ते, तस्मान्ममभरणानन्तरमुत्तरक्रियां निर्वृत्य निःपक्षपातेनेयमवशिष्टा रत्नादिसम्पत्तिर्विभज्य युष्माभिः स्वीकर्त्तव्या। इत्थमभिधाय सकला व्यवस्था स्वेनैव प्रत्यपादि । ततोऽतिस्वल्पेन कालेनाऽस्माकं पिता दिवं जग्मिवान्। तस्योत्तरक्रियादिकं सर्वं व्यवहारकार्यं संसाध्य वयञ्चत्वारो बान्धवा मिलित्वा पितृमञ्जूषां व्यलोकयाम, परं तस्यां तद्रत्नं नास्ति, बहुधातच्छुद्धिरस्माभिर्विहिता, तथाऽपि तत्प्राप्तिर्नजाता। नरेन्द्र ! रत्नमोचनावसरे वयं चत्वारोऽस्मदीयः पिता पञ्चमश्चासीदतोऽन्यभेदोऽपिन सम्भाव्यते; अस्माकमेकतमेन तद्रत्नमपहृत्य गुप्तीकृतमस्तीतिनिश्चीयते । तस्मादस्य रत्नस्यापहारकोस्मासुकोस्तीति निर्णीयाऽस्माकं यशःशरीरस्य हानिर्नस्याल्लोकाश्चापहर्त्तुर्वार्त्तां न जानन्ति तथाकृत्वा सभासमक्षं सर्वेषु सभ्यजनेषु पश्यत्स्वस्मदीयं रत्नमस्माकं हस्तगतं भवेत्तथैव



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वतः परीक्ष्य न्यायं भवान्विदधातु, इति विज्ञापनीयं स्वमतं राज्ञेनिवेद्य सुमतिचन्द्रः स्वोचितस्थाने निषसाद। ततो महासदसि संस्थिता विद्वांसः प्रजापतिरमात्यादयः सर्वे सभ्यास्तादृशं सुमतिचन्द्रवचनसन्दर्भेनिशम्य चित्रार्पिता इव तस्थुः। अथारिमर्दनभूपतिरजितसेनकुमारेण सार्द्धरहसि मन्त्रयित्वा तान् कथयामास-हेश्रेष्ठिसूनवः ? भवतां न्यायं मासैकेन विधास्यामः। इत्थं तांस्तोषयित्वा स सभ्यजनान्विसृज्य तत्कार्यं विधातुमजितसेनकुमाराय समर्पयतिस्म। अथाजितसेनः स्वगृहं समेत्य मनसि व्यचिन्तयत्, अहो ? अमीषां न्यायः केन प्रकारेण मया विधातव्यः ? रत्नापहारकः कथं परीक्षणीयः? इत्थमहर्निशं विचारयन्कामपि युक्तिं नालभत, भोजनादिकार्याण्यपितस्मैनारोचन्त, ततःस हास्यादिवार्त्तालापात्पराङ्मुखो बभूव, एवं कार्यचिन्तानिमग्नस्य तस्य विंशतिर्दिनानि व्यतीयुः। ततोऽन्यदागम्भीरमीमांसायां निमग्नमानसोऽजितसेनः स्वास्थान्यामुपविष्टस्तस्मिन्समये शीलवती तत्रागत्य निजभर्तुः क्रमयुगमभिवन्द्य जगाद-स्वामिन् ? अहमत्र भवतोऽग्रे मुहूर्त्तार्द्धमभिव्याप्य संस्थिताऽस्मि, तथापि मां दृष्टिमात्रेणाऽपि न निरीक्षसे, तस्मात्कीदृग्विधं कार्यमायातमस्ति ? यस्मिन्निपतितो भवान् व्याकुलितमानसोऽजनि। पुरा यदा मां व्यलोकयस्तदा सुप्रसन्नवदनारविन्देन सुधासमानदृष्ट्या च समभाषयः, परमद्य भवदीया प्रवृत्तिर्विचित्रा लक्ष्यते। अतो यन्मनोगतं शल्यंस्यात्तत्सत्यतया मदग्रे प्रकाश्यताम्। भवतो मुखाकृतिरस्मिन्दिने भृशमौदासीन्यं द्योतयति। तस्माद्धृदयशल्यं दूरीकुरु। हे वल्लभ ? भोजनावसरोऽपि सञ्जातोऽस्ति, भोजनं कर्त्तुं सत्वरमुत्तिष्ठ। इति करुणोत्पादकानि पीयूषसोदराणि स्वकान्ताया वचांसि समाकर्ण्य धृतधैर्यकवचोऽजितसेनोऽवदत्-धर्मपत्नि ? राज्यकार्यस्य प्रसङ्गा अनेकविधाः सन्ति, अधुना राजकीयकार्यभारव्यवस्था त्वदीय-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रसादेन मदधीना वर्त्तते । यतः सा व्यवस्था साम्प्रतं मयैव वहनीयाऽस्ति । ईदृशं निजस्वामिवाक्यं निशम्य-शीलवती प्रोवाच-स्वामिन् ? भवदीयमिदं वचनं महाभेदग्रस्तं विद्यतेऽतोऽस्य वाक्यस्य यदि स्पष्टीकरणं भविष्यति तदैवाऽहं भोजनं करिष्यामीतिमे सत्यसङ्गरंजानीहि । इयं मद्भार्या महाचतुरा कार्यदक्षा विद्यते, पुराप्यनयाकान्तया निजबुद्धिप्रभावेण मदीया विपत्तयो दूरीकृताः सन्ति, इत्थं तद्गुणानां स्मरणं विदधानोऽजितसेनो मनोधृतां वार्त्तां कथयितुं प्रारभत-मृगलोचने ! देशान्तराच्चत्वारः कस्यचिन्महेभ्यस्य पुत्रा अत्रसमागतास्तैर्नृपाग्रे गत्वेति विज्ञापित-मस्ति, भूपते ! अस्मास्वेकतमेन रत्नापहरणमक्रियत नूनम् । अतोऽन्ये जना रत्नापहारकाऽभिधानं नविजानन्ति तथा कृत्वा सम्यजनसमक्षं तद्रत्नमस्मास्वधीनं कुरु । एवं तेषां वणिजां न्यायस्वरूपं विचित्रं विद्यते, तस्मिन्विषये कोऽपि साक्षी ना-स्ति, अन्यत्किमपि साधनान्तरं नास्ति, पुनस्ते चत्वारो देशाटनविधायिनः पण्डितसंसर्गिणश्चातुर्यकलासमन्विता विलो-क्यन्ते । प्रथमं निजदेशाधिपतेः सन्निधौ तैर्निजरत्नापहारवृत्तान्तं विज्ञापितम्, परंतत्र तन्निराकरणं नाऽभूत् । ततस्ते स्वनगराधिपतेः सम्भावनापत्रिकां समादायात्र समागताः । अनयैवचिन्तया समाग्रस्तोऽस्मीति निजपतेर्निरुक्तिं समाकर्ण्य शीलवती प्रोवाच-हे भर्त्तः ! अस्मिन्न्यायविधाने काऽपि चिन्ता भवता नविधेया, भोजनस्याऽवसरो जातस्तस्मात्सत्त्वर-मुत्तिष्ठ, चतुर्भिरेव वासरैरहमेतेषां वैदेशिकानां विवादं निश्चित्य यथार्थं न्यायनिर्णयं करिष्यामि, परन्त्वितःप्रभृत्यवशिष्टे-षु दशसु वासरेषु ते चत्वारो वणिक्सुता मिथोमिलित्वा यथा न मन्त्रयन्ति तथा व्यवस्था त्वया विधातव्या । एतदर्थंचैते चत्वारश्चतुर्णां गोपुराणां समीपवर्त्तिषु राजगृहेषु पृथक् पृथक् स्थापनीयाः । इत्थं तौ दम्पती मिथः संमन्त्र्य भोजनशा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लायामगच्छताम् । विहितभोजनोऽजितसेनो राजमन्दिरमभ्येत्य तान्महेभ्यपुत्रान्समाहूय गोपुरचतुष्टयान्तिके पृथक् पृथक् स्थानेषु स्थापयामास । अथ व्यतीते सन्ध्यासमये तस्यामेव रात्रौ शीलवती स्ववेषं परित्यज्य क्षत्रियोचितं पुरुषवेषं परिधाय वायुवेगमेकं वरमश्वमारुह्य नगराद्बहिर्निर्गता । यामप्रमितायां निशायां व्यतीतायां कियद्दूरंगत्वापुनः पश्चाद्वलित्वा वैदेशिकोऽश्ववारइव कृत्रिमवेषा सा शीलवती यत्र श्रेष्ठिपुत्रोज्येष्ठः सुमतिचन्द्रोनिवासमङ्गीकृत्य संस्थितस्तत्र पूर्वदिग्गोपुरान्तिकस्थाने समागत्य चोत्तारकं कर्त्तुं तत्रैवाश्वात्समुत्तीर्य तमश्वं बबन्ध । ततस्तस्मात्पर्याणमुत्तार्य तदन्तिकालिन्दे मुमोच । तदनु धान्यतृणादिकं तमश्वमशयित्वा स्वयं स्वस्थीभूयनिजास्तुरणं चैकस्मिन्स्थाने प्रस्तार्य क्षत्रियवेषा सा पान्थस्य सदाचारं यथार्थमेव व्यञ्जयन्ती सुमतिचन्द्रं पप्रच्छ–प्रियबन्धो ? भवान्कोऽस्ति ? कुतस्त्वं समागतः ? कुत्र गन्तुं तवाऽभिलाषा वर्त्तते ? एवमजानानेव सा तमप्रश्नयत् । ततः सुमतिचन्द्रेण पान्थप्रश्नानामुत्तरः संक्षेपेण विहितः । ततस्तेन पान्थः पृष्टः–हे भ्रातः ? त्वं कस्मादिहायातः ? कुत्र जिगमिषा तव वर्त्तते ? त्वदभिधानं किम् ! कतमं वंशादिकं च विभूषयसि ? इत्थं सुमतिचन्द्रस्य वचांसि समाकर्ण्य कृत्रिमः पान्थो जगाद–मोहनपुराभिधं मदीयं नगरं विजानीहि, आनन्दपुरे पत्तने मम जिगमिषा वर्त्तते, मणिसेननामाहं क्षत्रकुले प्रसूतोऽस्मि । वर्त्मनिगच्छतो मम सूर्योऽस्तमितोऽतएवाऽत्रोषितुमिच्छा जाता, अधुनैव मार्गे भोजनं विधाय समागतोऽस्मि, ततो भोजनेच्छाऽपिनास्ति, तस्मान्नगरान्तर्गमनेनाऽपि नास्ति मे प्रयोजनम् । अस्यां रात्रावत्रोषित्वा प्रभाते समुत्थाय निजमार्गगामी भविष्यामि, इत्यभिधाय पुनस्तेन सुमतिचन्द्रः पृष्टः–श्रेष्ठिसूनो ? भवतो भोजनाभिलाषा वर्त्तते ? सोऽप्यवादीत्–मयाप्यधुनैव भानौ विद्यमाने भोजनं विहितं तस्मान्मे बुभुक्षा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नास्ति। एवं वार्त्तां प्रकुर्वतोस्तयोर्मणिसेनो जगाद–सुमतिचन्द्र ! शीतकालस्येयंरात्रिःप्रौढतरा विद्यते, शीतबाहुल्येन निद्राऽपि नागमिष्यति, तस्मात्कामप्यानन्दजनकां वार्त्तां कथय, यस्याःश्रवणमात्रेण निशाऽपि स्वल्पतरा भेवद् । ईदृशं मणिसेनवचनं निशम्य सुमतिचन्द्रोऽभ्यधात्–बन्धो ! अहन्तु वार्त्ताप्रसङ्गं न जानामि, परन्त्वमेव ब्रूहि, एकाग्रचित्तेनाहं शृणोमि, इतिसुमतिचन्द्रोक्तिंप्रमाणीकृत्य मणिसेनो वार्त्तां प्रारेभे–भव्यजनसेवितं भव्यलक्ष्मीनिकेतनं वसन्तपुराभिधं पत्तनमस्ति, तत्र निर्जितवैरिवारोनयशाली वसन्तसेननामा भूपो राज्यमकार्षीत्। तदाज्ञानुसारी जातप्रत्ययो विमलबुद्धि-र्विमलश्रेष्ठी मन्त्रीश्वरोऽभूत्। स च दैवयोगेनानपत्योऽभवद् । ततस्तद्भार्या सन्ततिसुखहीना दूयमाना बहुदेवदेवीनां याचितकेन नानाविधैर्व्रताचरणैश्च सन्तानप्राप्त्युपायानकरोत् । तेन योगेन तदन्तरायकर्मक्षयेणच विमलश्रेष्ठिनो वृद्धावस्थायां तद्भार्या पुत्रींप्रासूत । प्रमुदिताभ्यां मातापितृभ्यां चम्पकवतीत्यभिधानं तस्याः प्रदत्तम् । सा कन्या महारूपवती सल्लक्षणसंपन्ना सर्वाङ्गसुन्दरा गुणशालिनी मातापित्रोरतीवल्लभा ह्यासीत् । यदा साऽष्टहायना जाता तदा तां पाठशालायामध्यापयितुं तत्पिता मुमोच । तस्यामेवपाठशालायामभ्यासंकुर्वता जयचन्द्र-महेभ्यसूनुना विजयसेनेनसार्द्धंतस्या मैत्री जज्ञे। ततोऽन्यस्मिन्दिवसेतच्छालापाठकेन गुरुणा चम्पकवतीं गणितविषयः प्रश्नोऽपृच्छ्यत, पुनस्तेनोक्तम्–फलकोपरिसंलेख्य शीघ्रं गणयित्वा समानय, यद्यशुद्धो भविष्यति चेच्छिक्षां करिष्यामि। इत्थं गुरुणा समादिष्टा सा तद्गणितस्यभूरिविचारमकरोत्तथाऽपि तस्या दृष्टिप्रसारस्तस्मिन्विषयेनाजायत। शिक्षाभयेनत्रस्ता सा निजमित्रविजयसेनस्यान्तिकमभ्यगात्। प्रणिपातंचकृत्वातत्पार्श्वे सा गणितपद्धतिंविचारयामास, तदानीं पापबुद्धिप्रेरितो



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मनसि कपटभावं विचिन्तयन्विजयसेनस्तामुवाच–चम्पकवति ! ममुमार्गितं यदि त्वंददासितर्हिगुरुणा पृष्टं गणितंत्वां शिक्षयामि । तच्छ्रुत्वा सरलभावा चम्पकवती चेतासि व्यचिन्तयत्–अहो ? किमयं मार्गयिष्यति ? कदाचिन्मिष्टान्नादिभक्ष्यपदार्थान्याचिष्यति तर्हि तत्सर्वं प्रदातुमहंसमर्थाऽस्मि । इति संप्रधार्य तया कथितम्–विजयसेन ! तववाञ्छितमहंपूरयिष्ये, तदाकपटनिधानःस पुनरवदत्–सत्यङ्कारेण यदिमह्यंवचनंददासि तर्हिसत्यं मन्येऽन्यथात्वदीयंविश्वासं कथं करोमि ? यतः स्त्रीणां सप्तदोषाः स्वभावसिद्धा भवन्ति । उक्तञ्च–असत्यं साहसं माया, मूर्खत्वमतिलोभता । निर्दयत्वमशौचत्वं, स्त्रीणां दोषाः स्वभावजाः ॥ १ ॥ अतो वचनदानमन्तरा विश्वासो नैवजायते । अथैवं दुराग्रहग्रस्तंतंनिश्चित्य तद्धृदयगतंमायाप्रबन्धश्चाजानन्ती बाल्यावस्थामनुभवन्ती वचनप्रदानेन परिणामे किं भविष्यतीति विचारशून्या सा तस्मै वचनं प्रादात् । ततोनिष्पन्नमनोरथोविजयसेनोऽवादीत्–चम्पकवति ? यदातवपाणिपीडनं स्यात्तदात्वयापूर्ववयसः प्राथमिकं सुखंमह्यंप्रदेयंपश्चात्स्वभर्त्तुः समागमोविधातव्यः । इति तद्वचनंश्रुत्वावज्राहतेव महापत्तौनिमग्ना सा स्वमनसिव्यचिन्तयत्–रे ? इदानींकगन्तव्यम् ? किं विधेयम् ? कश्चोपायो मयाविधातव्यः ? एवं बहुधाशोचन्ती वचनपाशनिबद्धाऽन्योपायमजानन्ती सा दुराधेयमपितद्वचनमङ्गीचकार । ततो गुरुणापृष्टं गणितं तत्सन्निधौशिक्षयित्वासा गुरुं निवेदयामास । अथ कियताकालेन यौवनारूढां चम्पकवतीं निरीक्ष्य विमलश्रेष्ठी स्वनगरात्क्रोशद्वयंचन्द्रपुरनगरवासिनो धनाढ्यस्य कल्याणचन्द्रश्रेष्ठिनः सूनुनाऽमीचन्द्रेणसार्द्धं चम्पकवत्याः पाणिग्रहं कारयामास । ततःकियद्भिर्दिवसैः सा रजस्वला बभूव, समयवेदी तत्पिता चम्पकवतीं श्वशुरगृहं प्रेषयामास । तत्रनैशिके समये सञ्जाते निखिलालङ्कारैर्विभूषितावयवाचम्पकवती निजस्वामिनः शयनगृहं प्रविवेश । भर्त्तुर्दर्शनमात्रेण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तस्याश्चेतसिपूर्वकृता प्रतिज्ञास्फुरिता। यन्मया विद्याभ्याससमये पाठशालायां मदीयमित्रविजयसेनस्य हस्ते वचनं प्रदत्तम्। यथानिजभर्तृसमागमात्प्राग्भवता सार्कं क्रीडिष्यामि। तस्मादिदानींमयार्किं कर्त्तव्यम्? अस्मिन्क्षणे स्वामिनोवशंवदाऽस्मि, संसारसुखस्योत्तमलाभस्य भाजनमद्यैवसम्पन्नाऽस्मि? ततःपूज्यतमं शिरश्छत्रं स्वपतिं परित्यज्यान्यत्रमयाकथं गम्यते? इतश्चाहं प्रदत्तवचना मित्रेण प्रतिबद्धाऽस्मि। यदि तत्समीपमधुना नव्रजामि तदा विश्वासघातजन्यो महान्दोषोभवेत्। सर्वदोषेभ्योऽयंदोषोमहान्गण्यते, उक्तश्च–ब्रह्मघ्नेच सुरापेच, चौरे भग्नव्रते तथा। निष्कृति र्विहिता सद्भिः, विश्वासघ्ने ननिष्कृतिः ॥ १ ॥ उपकारिणि विश्वस्ते, शुद्धमतौयः समाचरतिपापम्। तंजनमसत्यसन्धं, भगवति? वसुधे? कथं वहसि ॥ २ ॥ शोकंमाकुरुकुक्कुर? सत्त्वेष्वहमेव अधम इति साधो?। कष्टादपि कष्टतरं, दृष्ट्वाश्वानंकृतघ्ननामानम् ॥ ३ ॥ अहो? खलानां सत्कृतिरनर्थजननी,–यतः—व्योम्निशम्बाकुरुते, चित्रं निर्माति यत्नतः सलिले। स्नपयति पवनं सलिलै-र्यस्तु खलेचरति सत्कारम् ॥ १ ॥ तस्मादधुनाऽन्योनास्त्युपायः। इतोव्याघ्र इतस्तटिनीतिन्यायोममाऽपिसंप्राप्तः। इत्थंवितर्कयन्त्यास्तस्यास्तत्र कियान्समयोव्यतीतः परंकोऽपिविचारस्तया न लब्धः। स्तब्धमतिः सा किंकर्त्तव्यतायांविमूढाजज्ञे। तदानीं तादृगवस्थां विचारनिमग्नामन्तरालस्थितांतांविलोक्यामीचन्द्रोऽवादीत्–हेसुभ्रु? अयं दिवसोलोकेश्लाघ्यतमोगण्यते, यतः संसारसुखप्राप्तेर्हेतुभूतोऽयमेवरजोदर्शनकालोविद्यते, तस्मादद्यत्वयामहोत्साहोविधातव्यः। युवजनलोभनीययौवनस्यसाफल्यमप्यस्मिन्नेवदिनेरत्याप्तक्रीडाभिः संपादनीयमस्ति। एवं विजानन्त्यपित्वं कथं शोकार्त्ता लक्ष्यसे? तत्कारणंवद। इत्थं निजभर्तृगदितं निशम्य भयभीतमानसा लज्जयाविनम्राननपङ्कजा भूरिविनयेननियोजितकरयुगला चम्पकवतीबभाषे–स्वामिन्? मदीयवृत्ता-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्तस्य वर्णनमप्यतीवनिन्द्यंहानिकारकञ्चविद्यते । तथाऽप्यहंनिरुपायाऽस्मि। ततो ममापराधंक्षान्त्वा यद्याज्ञां देहि तदा यथार्थं मद्वृत्तान्तं निवेदयामि । एतादृशंनिजकान्तायावचनं श्रुतिगोचरीकृत्यामीचन्द्रोऽवोचत्–कान्ते ! यत्तवचेतसि वेदनाशल्यं भवेत् तत्सुखेनत्वयाप्रकाश्यताम् , तदहंक्षणेनोद्धरिष्ये, तस्मिन्विषयेतवकाऽपि चिन्तानविधेया । एवंनिजभर्तृवचनं निशम्य चम्पकवती धृतधैर्या निजवृत्तान्तमचीकथत्–प्रियकान्त ! बाल्यावस्थायां पाठशालायामभ्यासंकुर्वन्त्या मया विजयसेननाम्ने मन्मित्रायेतिवचनंप्रदत्तम् , प्रौढयौवनस्यापूर्वलाभं प्रथमं तुभ्यंदास्यामि तदनन्तरंपाणिगृहीतुः समागमं करिष्यामीतिसहेतुकं साद्यन्तं वृत्तान्तं तस्मै निवेद्यपुनः साऽवोचत्–स्वामिन् ! मत्प्रतिज्ञा यथामृषानभवेत्तथाभवता कोप्युपायोनिर्देष्टव्यः । एतादृशं-कान्तावचनं निशम्यधैर्येणाविराजमानः शीलसम्पदाढ्योऽमीचन्द्रः सत्यसन्धोऽवितथवादी मनसि मनागपि क्रोधाऽनलम्प्रकाशयन्वैषयिकं सुखं तृणवन्मन्यमानः सम्प्राप्तमपि संभोगसमयं परित्यज्य तामिति समादिशत्–कमलनयने ! यस्मै नराय त्वया वचनमदीयत तस्य समीपं सत्वरंव्रज, विलम्बं मा कुरु । यतो विश्वासघाते महादोषः प्रादुर्भवति, विश्वासघातश्च दुर्गतेरेवहेतुः–विश्वासघातजं पापं, निरये पातयत्यरम् । दुर्गतिद्वारभूतं तं, वर्जयेद्यत्नतः सुधीः ॥ १ ॥ अतएवेदं कार्यं त्वया प्रथमं साधनीयमितिमदभिप्रायोऽस्ति । येन केनाप्युपायेन स्वप्रतिज्ञातं वचनं त्वं सत्यापय । इति निजभर्त्तुर्वचनमङ्गीकृत्य सद्यः पादाग्रमारभ्य सर्वाङ्गेषु विविधानलङ्कारान्धारयन्ती चारुनेत्री स्फारशृङ्गारशोभिता चम्पकवती स्वजनकनगरनिवासिनो बालमित्रस्य विजयसेनस्य मीलनाय पत्तनाद्बहिर्निरीयाय । तदानीं महान्धकारव्याप्तायां निशीथिन्यां स्वयमेकाकिनी सा क्रोशमात्रमध्वानमुल्लङ्घ्य प्रयाति तावत्तस्मिन्वर्त्मनि महानेकोन्यग्रोधः स्वल्पतोया सरिच्चागमत् । तस्य तरो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





रधस्तान्निषण्णाः कियन्तः शस्त्रपाणयः स्तेना यमदूता इव भयावहा मिथो मन्त्रयन्ति स्म । अद्यवयं कुत्र गमिष्यामः ? कस्य धनिनोगृहेलोप्त्रं दास्यामः ? इत्यादि वितर्कान्प्रकुर्वन्तस्तेमलिम्लुचा ग्राममभियातुमुद्यतिष्ठँस्तावदस्याः कन्याया नूपुरयोर्ध्वनिं श्रुत्वा यावदृदृष्टिप्रसारं कुर्वन्ति तावदागच्छन्तीं चम्पकवतीं ददृशुः । मिथस्ते वदन्तिस्म—बान्धवाः ? अस्मिन्वासरे प्रयत्नेन विनाऽस्माकं प्रारब्धबलाद्दैवयोजितो महालाभो जातः, पश्यत सालङ्कारेयं भार्या कस्यचिद्धनपतेर्विद्यते । यतोऽस्याः शरीरावयवेषु प्रायशो दशसहस्रमुद्राप्रमिता अलङ्कारा दृश्यन्ते, असौ कामिनी स्वयमेवास्माकं समीपमागच्छति, इदानीं शकुनावेक्षणे को हेतुः ? एवं मन्त्रयित्वा ते चम्पकवतीं परितो वेष्टयामासुः । खड्गं च नग्नं विधाय तां भापयित्वा कथयामासुः—प्रमदे ? इमानित्वदङ्गभूषणानिसत्वरं समुत्तार्याऽस्मास्वधीनानि विधेहि, नो चेत्त्वां हनिष्यामः । ईदृशं महारौद्रं तेषां वाक्यं श्रुत्वा चम्पकवती भयाक्रान्तमानसा जज्ञे । तथाऽपि धृतधैर्यकञ्चुका सा चौरान्प्रत्यवादीत्—हे भ्रातरः ? इमे सर्वे मदङ्गलग्ना अलङ्कारा भवदीया एव सन्तीति निश्चयतया जानीथ, परंयत्कार्यं विधातुमहंत्रजामितद्विधायपुनरत्रागमिष्यामि, तावत्पर्यन्तं यूयं संप्रधार्य सालङ्कारां मां तत्र गमनायसमादिशत, भवतामहंपुत्र्यस्मीति मत्वा मयिदयोपकारं विधायैतत्कार्यकरणाय कृपालवो भवत, पुनश्चात्र समागम्य सर्वानलङ्कारान्दास्यामीति सत्यप्रतिज्ञां करोमि । इत्थं कन्यकायाः प्रलापंनिशम्य चौराः कथयन्तिस्म—वनिते ? अत्र सत्यधर्मस्य प्रयोजनं नास्त्यस्माकम् । त्वं किं न जानासि ? अपराधमन्तरेणाऽपि मार्गयायिनोजनान् त्रासयन्तो महाघातकारिणो वयं चौराःस्मस्तर्ह्यस्माकं वज्रसारहृदयेषु दयादाक्षिण्यसत्यतादयोगुणाः कथं भवन्ति ? तस्मात्त्वमस्माभिः साकमालापादिकं करिष्यसितत्सर्वं निष्फलं भविष्यति । ततश्चम्पकवती वि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लक्षीभूताऽपि पुनस्तान्प्रार्थयितुं लग्ना, हे बान्धवाः ! सहसाऽत्र मदीयागमनाद्भवतामचिन्तितो लाभः सञ्जातस्तथाऽपि मयीतो गतायां युष्माभिर्विषादोनविधातव्यः । यतोऽस्यां रात्रौ यत्र यूयं गमिष्यथ तस्मात्स्थानाद्युष्माकं भूरिधनलाभो भविष्यति । पुनरत्र भवद्भिरागन्तव्यम् । तावदहमपि मदीयं कार्यं निर्वृत्य सत्त्वरमत्रैवागमिष्यामि, मदङ्गलग्नानि भूषणानि युष्मभ्यमेवदास्यामि । किञ्च मध्यरात्रिसमये सार्थमन्तरा स्वयमेकाकिन्येवात्र समागताऽस्मि तर्हि, कीदृश्यावश्यकतामदीय-कार्यस्य भविष्यतीति यूयमेव विचारयत । इत्युदित्वा कन्यायां विरतायां चौरा अपि विश्वासभाजोबभूवुः । ततः सा वीत-भया तस्मात्स्थानादग्रेचचाल, तावत्तद्वर्त्मनि घोररूप एकः पिशाचः समागत्यव्रजन्तीं तामुवाच–प्रमदे ? दिनत्रयात्कृशंक्षुधि-तोऽस्मि, अद्यतृप्तिजनकं भक्ष्यं मिलितम्, तवदेहेन शरीरवृत्तिं संपादयामि, अतस्त्वं स्वेष्टदेवस्य स्मरणं कुरु, तवचर्वणेन तीव्रदशनान्सोद्यमान्करोमि, क्षुधाञ्चशमयामि । इति पिशाचवाक्येनकम्पमानाऽपि हृदिधैर्यं समाधाय प्रगल्भा सा बाला युक्तिवचनैस्तंतोषयित्वा स्वकीयं वृत्तान्तं सर्वं व्यजिज्ञपत् । विशेषतश्चैवं साऽवादीत्–निशाचर ? त्रीणि दिनानिक्षुधाकुलि-तस्त्वं व्यत्यगास्तथा घटिकात्रयमपिनिर्वहनीयम् । तावदहमावश्यकं कार्यं सम्पाद्य वलमानांमांप्रतीक्षमाणेभ्यश्चौरेभ्योऽङ्गलग्ना-नीमान्याभरणानिवितीर्य समागच्छामि । पश्चान्ममभक्षणं सुखेनत्वयाकर्त्तव्यम् । यतोऽस्मिञ्जगतिजीवितादहं निर्विण्णाऽस्मि निन्द्यकार्याचरणेनसहैव जीवितान्तमपिवरं मन्ये । इत्थं कन्यावचनं समाकर्ण्य निशाचरस्य स्वान्ते विश्वासोऽजनि । तेन सोऽपि तां कन्यां स्वाभिलषितप्रदेशमभियातुं निर्विघ्नतया विससर्ज । अथ चम्पकवती स्वपितुर्नगरं गत्वा विजयसेनस्य गृहं प्राप । मध्यरात्रिसमयत्वात्पिहितद्वारमुद्घाट्यापवर्के सुखशयने शयानस्य निजमित्रस्यान्तिके गत्वा सा तस्थौ । तस्मि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





न्दणे विजयसेनो नवयौवनां हंसगामिनीं शशिवदनां चम्पकवतीमकाले स्वसम्मुखास्थितां विलोक्य परमं विस्मयं प्राप। तदानीं तस्या रूपसौन्दर्यमहिमानं कियन्तं वर्णयामि ? यस्य विलोकनेनसुरेन्द्राणां मनांस्यपि चलन्ति, पामराणान्तु का कथा ? अथ तेजःपुञ्जं प्रसारयन्तीसाबाला प्रोवाच–मित्र ? पुरा विद्याभ्यासकाले पाठशालायां तवाग्रे मयैवं प्रतिज्ञातम्, विवाहकालादूर्द्ध्वमृतुसमये प्राप्ते पतिसंयोगात्प्राक्त्वया सह रतिविलासं समाचरिष्ये। अतोहमिदानीं तद्वचनप्रतिबद्धा मद्भर्त्तुराज्ञां समादायात्र समागताऽस्मि। रजोदर्शनस्यायं पञ्चमो वासरो विद्यते। तस्मादिच्छानुसारेण यथासुखं स्वकार्यं विधायशीघ्रं मामितो विसर्जय, मदुक्तवचनाच्च मां निर्मुक्तां कुरु। इत्थं चम्पकवतीवाक्यानि निशम्य विजयसेनोऽवादीत्–सत्यवादिनि ! त्वं धन्याऽसि, धन्यानामपि धन्यतमाऽसि। इति मुहुर्मुहुस्तां प्रशंसन् पुनःप्राह–भागिनि ! इदानीमधर्मबुद्ध्या कामातुरो भूत्वाऽहं सत्यशालिन्या सुसत्या त्वयासह भोगं भुक्त्वा दुर्गतिं प्रयातुंनेच्छामि। एवं सुविचारप्रेरितो विजयसेनः परमलावण्यनिधिं प्राप्तयौवनां स्वयमेवसंभोगायरहासि समायातां तांबालां कृताञ्जलिः सन्प्रोवाच–कुमारिके ! सत्यसङ्कल्पे ! धर्मचारिणि ! हे सुभगे ? ममवचनंशृणु, धन्यात्वमासि, सत्यसीमानंनजहासि, यतोबाल्येवयसिस्वप्रतिज्ञातंवचनंसत्यापयितुमत्रसमागतासि, अतः-स्ववचनमवितथंमत्वाऽहंत्वामस्माद्वचनान्मुक्तांकरोमि, त्वंनिजभर्त्तुः समीपंसुखेनयाहि, तञ्चसेवस्व, भगवान्विश्वपालकोभर्त्रासह तवरक्षणंसदाविदधातु। आवामेकगुरोःसमीपेविद्याभ्यासंसहैवाकार्ष्व, तस्मादावांविद्यासंबन्धात्सहोदरौस्वः। एवमद्यप्रभृतित्वं विजानीहि। इत्थमभिधायविजयसेनोभागिनीवत्तस्यैवस्त्रालङ्कारान्दत्वातस्मिन्नेवक्षणे तांव्यसृजत्। अथेतोनिर्गत्याध्वानि प्रचलन्तीचम्पकवतीतस्ययक्षस्यस्थानंसमासाद्यतमुच्चैःस्वरेणसमाजुहाव–तस्या ध्वनिंश्रुत्वापिशाचस्तत्रागत्यतामवोचत्–भ-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गिनि ! त्वमितोयाहिसुखेन, मत्तस्त्वयानभेतव्यम्, यतोहं सत्यशीलायास्तवदर्शनेनप्रसन्नोजातः। एतादृशोनिरवधिर्भोजनप्रमोदोजन्मतआरभ्याद्यावधिकदापिमयानाऽनुभूतस्तस्मात्तववचनात्त्वांनिर्मुक्तांकरोमि। यथेष्टसुखेनस्वस्थानंव्रज। अथन्यग्रोधतरोस्तलेस्थितायेनिषादास्ते चम्पकवतीं विसृज्यसत्वरगामिनः समीपस्थेनगरेजग्मुः। तत्र सर्वत्र परिभ्रमन्तस्तेराजसद्मनिखात्रं दत्वानिधानसञ्चिताभूरिसम्पदः समानीयतस्मिन्नेवस्थले धनविभागान्कुर्वन्ति तावच्चम्पकवती तत्रागत्य चौरान्प्रत्यवदत्-परस्वहारिणः ? मदीयंकार्यं निर्वृत्याहं मद्वचनंसत्यापयितुमिदानीं समागताऽस्मि। युष्माकं मदाभूषणग्रहणेवाञ्छाभवतिचेदलङ्कारानिमान्ददामि, तान् गृहीत्वामांशीघ्रंनिर्बन्धनांकुरुत। तथाविधंवचनंप्रवदन्तीं सत्यप्रतिज्ञांतांकन्यांवीक्षमाणाः स्तेनाः परमंविस्मयंप्रापुः, ऊचुश्च-हेमातः ? सत्यगिरं त्वां धन्यतमां मन्यामहे, तव सत्यवचनप्रभावाच्छुभाशीर्वादेनास्माकं प्रभूतधनलाभोऽद्यसञ्जातः। शुभदर्शनांभवतीं देवीमिववयंजानीमहे। इत्थं निगद्यतस्या अलङ्कारानस्पृशन्तस्तेस्वान्तिकाद्दश सहस्रप्रमितान्सुवर्णटङ्कानदुः। ततोहृष्टमानसा चम्पकवती त्वरितगतिं निरूपयन्ती स्वभर्त्तुः समीपंगत्वाप्रणनाम। अध्वनियज्ञातं वृत्तान्तं तत्सर्वं साद्यन्तं स्वस्वामिनेसानिवेदयामास। ततश्चम्पकवत्याश्चमत्कारकमुदन्तं निशम्यामीचन्द्रस्तस्याः शीलप्रभावेणभृशंतुतोष। शीलव्रतमेवप्रधानं मन्यमानः स महासत्या तयासह यथाभिलाषं विषयभोगान्बुभुजे। इत्थं चमत्कारजनकं वृत्तान्तं निवेद्यमणिसेनः सुमतिचन्द्रं पप्रच्छ। हेमहेभ्यसूनो ! चम्पकवती, तत्पतिरमीचन्द्रः, विजयसेनः, स्तेनाः पिशाचश्चतेषांपञ्चानां मध्ये सत्यशीलो धैर्यवांश्चकोज्ञातव्य इति सत्यंकथय। सुमतिचन्द्रः प्रोवाच-वैदेशिकमित्र ? अमीषु पञ्चसु चम्पकवत्याः सत्यधैर्येऽधिकतमेविद्येते। यतः सा बाल्यावस्थायां स्वकीयमित्रार्पितं वचनं पालयितुं स्वकीयां सत्यवाचं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





च रक्षितुं निजभर्त्तुराज्ञांगृहीत्वा मध्यरात्रौ भयप्रदमध्वानमुल्लङ्घ्य निजप्रतिज्ञां स्वपतेरप्यधिकतमां मन्यमाना स्वयमेकाकिनी वसन्तपुरमभ्येत्यनिजमित्रं विजयसेनं सम्मील्य निजसद्गुणैस्तं प्रीणायित्वाऽखण्डशीला निर्विघ्नतयापुनः स्वपतेः समीपं जगाम। तस्मादहन्तुतां चम्पकवतीं धन्यांमन्ये । ईदृशंसुमतिचन्द्रोक्तं वचनं समाकर्ण्य मणिसेनः सन्तुष्टमानसस्तांनिशांतत्र निर्गम्य प्रभाते स्वस्थानमियाय । अथ द्वितीयस्मिन्दिनेनिशामुखे तथैव तुरङ्गमं सज्जीकृत्य क्षत्रियवेषधारको मणिसेनः पश्चिमगोपुरान्तिकस्थेचत्वरे स्थितस्य नवीनचन्द्रस्य समीपप्रदेशे स्वनिवासं कल्पयामास, अश्वश्चैकान्तप्रदेशे निबद्धय तृणादिकं प्रक्षिप्य स्वासनं परिकल्प्य स्वस्थीभूय स नवीनचन्द्रेणसाकं स्नेहपूर्वकं कुशलवार्त्तां विधायपूर्वेद्युः सुमतिचन्द्रं यां वार्त्तामकथयत्, तामेव समग्रांन्यवेदयत् । ततोमणिसेनेनपृष्टम्–नवीनचन्द्र ? पञ्चानाममीषां कः श्लाघ्यतमोज्ञेयः ? तदासजगाद–पथिक ? सर्वेषां विजयसेनोऽधिकसत्यधैर्यशाली प्रतिभासते । यतो निजदेहकान्त्या देवाङ्गनामधरयन्तीं शारदेन्दुवदनां नूतनारूढयौवनां सुशोभितानर्घ्यवस्त्रालङ्कारमण्डितां गजगामिनीं स्वयमागतां संभोगार्थिनीं तां तन्वङ्गींरहसि निरीक्ष्य तत्कटाक्षबाणैरविद्धः प्राप्ततारुण्यः स विजयसेनो निजशीलव्रतंररक्ष । तस्मादहंविजयसेनं धन्यतमंगणयामि । एवं द्वितीयस्यश्रेष्ठिसूनोर्नवीनचन्द्रस्योत्तरंनिशम्य मणिसेनस्तां रजनींतत्रनीत्वा प्रातरुत्थायतुरङ्गममारुह्य स्वस्थानंययौ। तृतीयस्मिन्वासरे क्षत्रियवेषवान्मणिसेनः सज्जिताश्वंसमारुह्य सायं दक्षिणगोपुरान्तिके यत्र विनयचन्द्रोऽस्थात् ।, तत्स्थानमवाप्यतुरगं निबद्धय तस्याश्वासनं सर्वविधाय श्रेष्ठिकुमारस्य सन्निधौ निजशय्यां विरचय्यशान्तचेतसामणिसेनोवार्ताविनोदंकुर्वन् तस्थौ । ततोऽसौ चम्पकवतीकथां पूर्ववद्विनयचन्द्रं समाचख्यौ । ततः स विनयचन्द्रंपप्रच्छ–धीमन् ? एषुपञ्चस्वपि विशेषतो धैर्यसत्यप्रियः को विराजते ? विनयच-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्द्रेण स जगदे-मणिसेन ! तेषां चम्पकवतीभर्त्तुरमीचन्द्रस्य सत्यं धैर्यञ्च विशेषतो ज्ञायते। यतोऽप्सरसामपिध्येयमूर्त्तिं सकलगुणसम्पन्नां मृगनयनांशशाङ्कवदनां प्रौढयौवनां प्रमदां यो निजाभीष्टां परित्यज्य तद्वचनरिरक्षया परमार्थवृत्तिमात्रेण विजयसेनस्य समीपे प्रैषीत्तत्कार्यमत्यन्ताश्चर्यजनकं दुरनुष्ठेयं तेनविहितमस्ति। तस्मात्स एव प्रशंसनीयः। इत्थं तृतीयस्य श्रेष्ठिसूनोर्विनयचन्द्रस्याभिमतं प्रश्नोत्तरं विज्ञाय प्रमोदतस्तांनिशां तत्र निर्गम्य प्रातस्तुरङ्गारूढः स निजावासमियाय। ततश्चतुर्थे वासरे रजन्यां क्षत्रियवेषं परिकल्प्य मणिसेनस्तुरङ्गममारुह्योत्तरगोपुरस्य समीपे यत्र बालचन्द्रो निवासं कृतवांस्तत्रस्थाने गत्वा निजाश्वमेकस्मिन्भागे बध्वा तस्य तृणादिना परिचर्यां विधाय पश्चात्स्वासनं प्रस्तार्य तत्रोपविष्टः, क्षणात्स्वस्थीभूतः स बालचन्द्रं पूर्ववच्चम्पकवतीवार्त्तामब्रवीत्। पुनस्तेनपृष्टम्-बालचन्द्र ? एषु पञ्चसु सत्यधैर्यधनः को विद्यते ? तत्समाचक्ष्व। इत्थं मणिसेनगदितं निशम्य बालचन्द्रोबभाषे-मित्र ! सर्वेषां मध्ये चौराणां सत्यशीलत्वं धैर्यञ्च विशेषतरं ज्ञातव्यम्। यतोऽचिन्तितागमनां बहुलङ्कारमाण्डितावयवां कामवनितारूपविजेत्रीं नवयौवनां स्वसमीपे समागतां प्रमदां स्ववंशपरम्परया चौर्यकर्मविधायिनश्चौरा निर्विघ्नतया तत्यजुः। अतस्त एव लोके धन्याः। इति चतुर्थस्य श्रेष्ठिसुतस्य बालचन्द्रस्य भाषितं निशम्य तत्कालमेव मणिसेनेन विज्ञातमयमेव रत्नापहारक इति परीक्ष्य निश्चयोविहितः। यतोऽयं तस्करविद्यायां निपुणोऽभिमानधारकश्चास्तीति दृढनिश्चयतोऽनुमानं विधाय तस्मिन्नेव समये मणिसेनः स्वकटिप्रदेशाद् खङ्गमाकृष्य बालचन्द्रं निहन्तुमुद्यम्य साक्षेपमुवाच-तव पितापूर्णचन्द्रो युष्मदर्थमनर्घ्यमेकं रत्नं स्वान्तिके रक्षितवान्, तस्यापहारकस्त्वमेवासि। तस्मात्तद्रत्नंझटितिमह्यमधुनादेहि, नो चेदनेनासिपत्रेण तवशिरश्छेदं करोमि। इति मणिसेनस्य साहसिकं वचनं समाकर्ण्य



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वेपमानशरीरोभयसंत्रस्तस्वान्तो बालचन्द्रः सद्यो विलक्ष्यीभूय श्याममुखोजज्ञे । पुनर्मणिसेनस्तमवोचत्–यदित्वमत्रैवाधुना तद्रत्नं गुप्तं दास्यसितदा तवकीर्त्तिध्वंसोनभविष्यति, तृतीयः कोऽपिजनोनेदं चौर्यवृत्तान्तं ज्ञास्यति, तद्रत्नविभागस्तवाऽपिमिलिष्यति । अतोऽञ्जसा चौर्याऽपराधमिमं स्वीकृत्यतद्रत्नं ममकरतले निधेहि । एवं कृते तव चौर्यापवादो लोके नप्रसरिष्यति, युष्माकं राजसभायां विज्ञप्तिरप्येतादृशी विद्यते, यत्प्रच्छन्नतया रत्नमोषकाद्रत्नं गृहीत्वा सभासमक्षमन्येजना यथा तद्वृत्तान्तं न जानन्ति तथा न्यायं विधायास्माकं रत्नं देयमतोऽत्र यदि रत्नं दास्यसि तर्हि तव सर्वाऽभीष्टसिद्धिर्भविष्यति । इत्थंमणिसेनस्य निःशङ्कं वचनं निशम्य बालचन्द्रो हस्तौ नियोज्य दीनवदनः प्रोवाच–हेबन्धो ! क्षमस्व मदीयमपराधम् ! यदित्वं मम शिरश्छेदं कर्त्तुं समुद्यतोऽसि तर्ह्यनेन रत्नेन किंमेप्रयोजनम् ? यतो मरणानन्तरं सर्वं राज्यादिकमपि न कस्यचित्पृष्ठगतं विभाव्यते । तस्मात्तद्रत्नं प्रयच्छामि सुखेन गृहाण, माञ्चनिर्दोषं कुरु । इति कथयित्वा तेन निजसक्थि विदार्य तन्मध्यस्थितं रत्नं निष्कास्य मणिसेनरूपधारिण्यै शीलवत्यै प्रदत्तम् । ततो लब्धरत्ना शीलवती सत्वरं निजगृहं समेत्य स्वस्वामिनेऽजितसेनाय तद्रत्नं समर्पयामास । तदानीमजितसेनः प्रमोदं बिभ्राणः शीलवतीं प्रत्यभाषत–मृगलोचने ! अद्यममहृदयकुहरे प्रज्वलन् चिन्तामयचिताग्निस्त्वया निर्वापितः । अतो महोपकारिणीं त्वां मन्ये, यतश्चिन्ताग्निश्चिताग्नेरधिकतरोवर्णितः शास्त्रे, तद्यथा–चिन्ता चितासमाप्रोक्ता, बिन्दुमात्रविशेषतः । सजीवंदहतेचिन्ता, निर्जीवंदहतेचिता ॥ १ ॥ तस्माद्धेभामिनि ! लब्धनिधानस्य निर्धनस्येव ममाद्य भूरिप्रमोदो जातोऽस्ति । इत्थं स्वकान्तां संभाव्याजितसेनस्तद्रत्नं समादाय शीघ्रमरिमर्दनभूपतेः समीपंगत्वा रत्नप्राप्तिवृत्तान्तमचीकथत् । भूपतिस्तदुदन्तं निशम्य परमानन्दं जगाम ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततस्तमजितसेनं बहुधनप्रदानेन सत्कृत्य सन्तोष्य च सभायां सर्वान्जनान्मेलयित्वा नरपतिः श्रेष्ठिपुत्रानाजुहाव । स्वयंभूपतिः सिंहासनमारुह्य सर्वान् श्रेष्ठिसूनून्योग्यासनेषूपवेशयामास । शीलवती तु राजसभायां नागमत् । यतः संमुखागमनेन तामुपलक्ष्यरत्नापहारको बालचन्द्रोलज्जयाऽधोमुखीभूयसशङ्कः स्यात्तेन च सभ्यजना जानन्त्ययं चौरइति । अहो ! सज्जनानां कियदौदार्यम् ! । इतोऽजितसेनस्तद्रत्नं नृपतेराज्ञयाचतुरस्तान् श्रेष्ठिसुतान्दर्शयित्वा पृच्छतिस्म–हेमहेभ्याः ? इदमेवरत्नं भवतां किम् ! तेऽपिनिजंरत्नं सम्यगुपलक्ष्यास्माकीनमेवेदमित्यूचुः । हेभूपते ! अस्माकं न्यायो यथार्थो विहितः, परन्त्वेतावदस्माकं विज्ञापनीयमवशिष्यते, यद्भविष्यत्कालेऽस्माकं हृदयचेत्रेक्लेशाङ्कुरोनप्रादुर्भवति, तस्मादिदं रत्नं भवता गृह्यताम्, तद्रत्नप्रमितं धनं समभागेन विभज्य स्वयमेव भवानस्मभ्यं ददातु, भवत्सेवकैःसंरक्ष्यमाणानस्मानस्मद्गृहं प्रापयेति प्रसादो विधीयताम् । इत्थं तेषां प्रार्थनां श्रुत्वा नृपतिस्तथाकृत्वा तान्सन्तोष्य परमप्रमोदेन निजनगरं प्रेषयामास । महेभ्यसूनवोऽपि संपन्नमनोरथाः स्वगृहं समासाद्य निजसम्पत्त्यनुसारेण सुखवैभवान्बुभुजिरे ॥

इतिश्रीजगद्विभूषणशासनमहोदधिशीतरश्मिस्वपरसमयपारदर्शितपोगच्छदिवाकरभव्यजनतारकप्रातःस्मरणीययोगनिष्ठाध्यात्मज्ञानविभाकरश्रीमद्बुद्धिसागरसूरीश्वरशिष्यरत्नश्रीमद्अजितसागरसूरिविरचितेऽजितसेनशीलवतीचरितेशीलगुणोपाख्याने श्रीरत्नाकरमहेभ्यवर्णितमदनसेननृपदृष्टान्तर्गतसाहसिककार्यविधायकशुकविहिंसकचन्द्रभूपाल–पान्थचतुष्टयमारणोद्यतभूमिपाल–भुजगकालाननविमोचकधनपालवधोद्यतमदनसेनवृत्तान्तकथनानन्तरस्वगृहागच्छद्रत्नाकरपरिपृष्टशीलवती निजपूर्वोक्तवचनसमाधाननिजालयप्राप्त्यजितसेनदिगन्तकीर्तिवर्णनाधिकारे द्वितीयः प्रस्तावः समाप्तिमभजत् ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





# अथतृतीयःप्रस्तावः

दुर्वारकर्माणि विभिद्य यः स्राग्, मुक्तिस्त्रियंप्रापपरैरगम्याम्। केवल्यभाजंजिनपुङ्गवंतं, श्रीशान्तिनाथं सततंस्तवीमि ॥१॥
अथैतस्मिन्न्यायकर्मणि विहितेऽजितसेनकुमारस्य कीर्त्तिर्दिगन्तगामिनी बभूव। अहो ? अस्मिन्संसारे भूरिपुण्यानामेवैतादृशी शील-संपन्ना बुद्धिनिधानकान्ता संभाव्यते। या हि प्रभूते दुःखोदधौनिमग्नं निजस्वामिनं समुद्धरति, स्वकीयंशीलव्रतञ्च पालयति। यज्ज्ञानिगुरवोऽवोचँस्तत्सत्यमेव, येजनाः समभावतया स्वव्रतंपालयन्ति तेषां महान्त्यप्यनेकविधानि कष्टानिस्वयमेव विलयं यान्ति। अत्रैवे परिपूर्णशीलव्रतपालनी निजभर्त्तृशुश्रूषायांसदोद्यता शीलवतीविद्यते, शीलव्रतमाहात्म्येन दशसुदिक्षु तस्याः कीर्त्तिः प्रसरतिस्म। सत्यपतिभक्त्याऽस्मिल्लोके किंकिन लभ्यते। तद्दृष्टान्तं यथा—भूभामिन्याविभूषणं भूरिपुण्यजनसेवितं सौर्यपुराभिधं पत्तनमस्ति, तत्रेन्दुवदनेन्दुमती नामैका शीलव्रतशालिनी सती निजपतिसेवापरायणा स्वधर्ममाराधयतिस्म। साचैकदा निजोत्सङ्गे निजस्वामिनोमस्तकं निधायोपविष्टाऽभूत्तदानीं शीतमन्दसुगन्धिना वायुना सेव्यमानस्तत्पतिर्भृशंनिद्रितोऽभूत्। तस्मिन्समये तस्याः पतिदेवताया एकोलघुर्बालोजागरितः। सचेतस्ततोविलोकयन्विभ्रान्तमनाः प्रज्वलन्तमग्निमभिलक्ष्यजगाम, तथाऽपि पतिभक्तिमेव मुख्यां गणयन्ती सा वह्नौपतन्तं निजबालं पतिनिद्राभङ्गभयेन नाग्रहीत्। यदि भर्त्तुर्मस्तकमधः क्षिपामि तर्हि निद्रायावियोगोभवति, एवं पतिसेवाऽभिलाषिणी सा विज्ञायस्वसमीपस्थे वह्नौ पतितं बालंदृष्ट्वाऽपि स्वमनसिचिन्तयामास—अहो ? इदानीं किंकर्त्तव्यम् ? इति विचारमग्नायास्तस्याहृदि निजशीलप्रभावेण पतिभक्तिबलेन च सदुपायः प्रस्फुरितः—यथेष्टदेवप्रार्थनया



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वशुभं भविष्यति । ततः सा स्वेष्टदेवंस्तोतुं लग्ना–हेवीतराग ? प्रभो ! सर्वकार्येषुत्वमेव मे साक्षीभूतोऽसि, मदीयं कृत्यं सकलं त्वं जानासि, भवान्सर्वज्ञोऽस्ति–शरणागतवत्सलो भवान्, त्रिषु लोकेषु समर्च्यमूर्त्तिकः । त्वयिनम्रमुखाः सदा जनाः, सुखिनो यान्ति महोन्नतं पदम् ॥१॥ जिनदेव ! कृता स्तुति स्तव, मम दुःखौघनिवर्त्तकाऽस्तु वै । किमनेनविकल्पनेन वा, शरणं नो विफलं भवेत्तव ॥ २ ॥ हे परमेष्टदेव ! अधुना पतिसेवायां तत्परास्मि । अतो वह्निज्वालायां पतितं बालं गृहीतुं न शक्नोमि, तत्सर्वं भवान् जानाति, इमं बालं त्वं रक्ष, इति स्तुतिपरायणायां तस्यां स बालोवह्नौ घटिकार्द्धं स्थित्वा क्रीडितुं लग्नः, मनागपि रोदनं न चकार, मुखमुद्राऽपि तस्य निस्तेजा नाभूत् । अथपतिव्रता सेन्दुमती स्वपतिं ध्यायन्ती तथैव तस्थौ । कियत्क्षणानन्तरं तत्पतिर्विनिद्रोऽभूत् । तदा सा समुत्थाय वह्निस्थितं तं बालं शीतिमानमनुभवन्तमिव प्रज्वलदग्नेः समुद्धृत्य निष्कासितवती । यथाऽनयास्त्रिया शुद्धपातिव्रत्यबलेन निजस्वामिनः सेवाभक्तिरक्षताविहिता, बालोऽपि निर्विघ्नतया समासादितः । तथैव शीलवत्याऽपि स्वपतिभक्तिप्रसादेन प्रभूतानि कार्याणि साधितानि, स्वपतिश्च सन्तुष्टोऽक्रियत । अथाऽन्यदा महासती शीलवती स्वमनसि किञ्चिद्विचार्य निजस्वामिनं प्रोवाच–हे प्राणेश ! मदीयं शीलं त्रिदिवाद्यदित्रिदिवेशः स्वयमायाति परं खण्डयितुं न समर्थोऽस्ति, तथाप्यार्यपुत्र ! राजकार्यव्यग्रत्वाद्भवतः स्थितिर्निजसद्मनि स्वल्पैवजायते, किञ्चाऽन्येजनाः स्वस्वकार्यमुद्दिश्य बहवोऽत्र समायान्ति । तस्मादशुभकर्मणामुदयेन कदाचित्पूर्ववद्भवान्कुविकल्पं कुर्यादथवाऽन्ये जना अपि भूरिजनानां गमनागमनेन कुविकल्पिनो भवेयुस्तन्निवृत्यर्थमहं मदीयशीलस्य परीक्षार्थं तुभ्यमेकं कमलं ददामि, तत्त्वयानिजान्तिके रक्षणीयम् । यदा मम चित्तं परपुरुषेण सह मलिन्यभविष्यत् तदा तत्कमलं कान्तिहीनमभविष्यत्,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





यावच्च मदीयं स्वान्तं निर्मलंस्थास्यति तावदिदं सरोजं तत्कालोत्पन्नमिव विकस्वरं द्रक्ष्यसि, इत्थं निगद्य भर्तृसमेताशीलवती नगराद्बहिरुद्यानेऽजितनाथजिनेशितुर्मन्दिरं जगाम । गत्वा च भगवतोऽजितनाथस्य पूजां भावतो विधाय नानाविधैः स्तोत्र-कलापैश्च संस्तुत्य तत्रस्थिता प्रभोः सन्निधौ निजस्वामिनेऽजितसेनाय तत्कमलं प्रददौ। तेनाऽपि प्रीतिपूर्वकं तदुत्पलं स्वीचक्रे, ततस्तत्कमलस्य परिमलो भृशं सर्वस्मिन्स्थलेऽक्षीणभावेनप्रसरतिस्म, नागरिकाश्च सततं विकासितं तत्सरोजं विलोक्य भृशंवि-स्मिताः परस्परमूचुः–अहो ? अन्यानिकमलानिश्वासोच्छ्वासमात्रेण विलीनानिभवन्ति, इदन्तु सततमविनश्वरश्रिया समालि-ङ्गितं विकसितमेवतिष्ठति, तत्सर्वं शीलवतीशीलमाहात्म्यं विजृम्भते। अथैकदाऽरिमर्दनभूपतिर्निजारीन्विजेतुं सकलं सैन्यं सज्जं विधाय मुख्यं मन्त्रीश्वरमजितसेनमवादीत्–बुद्धिमन् ? त्वयाऽप्यस्मिन्कार्येऽस्माभिः सार्द्धं प्रयातव्यम् । इत्थं नृपनिदेश-मङ्गीकृत्यसोऽपि निजनिकेतनं समागत्य तद्वार्त्तां निवेद्य निजकान्तां प्रति प्रयाणाज्ञां ययाचे । तदाशीलवती प्रोवाच–स्वा-मिन् ? सुखेन प्रयाहि, शिवाःपन्थानस्तव भवन्तु, सर्वं कार्यं सपदि संसाध्य विजयश्रलब्ध्वा पुनरत्रभवान्मां समभ्येतु। कदा-चिदहं कार्यवशाद्भवता नविस्मर्त्तव्या। इति कान्तावचनं समाकर्ण्याऽजितसेनोऽब्रवीत्–प्रिये ! इदृशगुणशालिन्यास्तव वि-स्मरणं कथं भवेत् ? शीलवती जगाद–प्राणपते ! स्वार्थैकपरायणोऽस्मिन्संसारे जनाः सुखप्राप्तिसमये परेतरानात्मीयान्सुहृ-दोऽपि विस्मरन्ति,/ सहोदराश्चकार्यवशात्परस्परं विस्मृतिभाजो भवन्ति, तर्हिपरेषां का कथा ! तद्विषयेऽहमेकं दृष्टान्तं कथ-यामि तच्छ्रूयतांभवता । अस्तिशशिकरकान्तसौधराजिविराजितं विशालोदग्रवप्रवलयपरिवेष्टितं शिवपुराभिख्यंनगरम् । तत्र च भूरिप्रतापशाली दिगन्तकीर्त्तिमण्डलः समस्तानवद्यगुणसेवधिर्नीतिशास्त्रमहोदधेः पारगामी निरागसां पालयिता



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विनम्राणां लालयिता वैरिवाराणां मदापहारको निजोरुकान्तिनिचयेन विनिर्जितमन्मथकान्तिर्नितान्तनित्यदानेन कल्पतरुं विस्मारयन्विद्याविलासेनवाचस्पत्यं विस्तारयन्सुतरां दयावासितमानसश्चन्द्रसेननामा नृपती राज्यं करोतिस्म । परं तस्य मनीषिणः संसृतितरुफलं सन्ततिसुखंनाभूत् । तस्मान्निर्वेदमापन्नः स भूपतिर्दानादिना दीनादीन्समुद्धरन्सन्मार्गेषुधनव्ययं विशेषतश्चकार । तथाऽपि प्रजादर्शनस्याभाजनं स बभूव । ततः स प्रजादुःखेन दुःखितोऽहोरात्रंशोकनिमग्नश्चिन्तयामास–अरे ! सन्ततिहीनस्य मे किमनेन राज्यवैभवेन ? अपुत्रस्य गृहं शून्यं, स्मशानमिव भासते । तदन्नं तन्मुखश्चाऽपि, नैवपश्यन्ति देहिनः ॥ १ ॥ श्लाघ्यन्तेपुत्रिणोलोके, ह्युपकुर्वन्ति पुत्रिणः । तस्मात्पुत्रमुखंदृष्ट्वा, निर्वृत्तिं भजतेबुधः ॥ २ ॥ एवं ध्यायन्प्रतीतिभाजने निजसचिवेराज्यभारंनिक्षिप्यसभार्यः स्वयंचन्द्रसेनोनिजपत्तनं परित्यज्य तीर्थयात्रायै प्रयाणमकरोत् । शुभशकुनप्रेरितो नृपतिरविलम्बितप्रयाणेन सिद्धाचलरैवतकार्बुदाचलसम्मेताशिखरादिमहापवित्रतीर्थेषु यात्रां विधाय सप्तक्षेत्र्यां निजविभवाऽनुसारेण द्रव्यव्ययंकुर्वन् पूजाभक्तिश्च विरचय्य स्वजन्मनः साफल्यं वितन्वन्वलमानः पुनरर्बुदगिरिमभीयाय । तस्मिन्नद्रौ तौ दम्पती प्रभूतभावेन प्रेरितौ नानाविधपूजाद्रव्यैर्वीतरागस्य तीर्थाधिपतेरादिनाथस्य भगवतः पूजां विधाय शुचिभावेन भावनां भावयतः,–संसारतारक ! विभो ! जगदेकनाथ !, आदीश्वर ! त्वमसिदृष्टिगतोहिताय । त्वत्पादपङ्कजमिहास्तिनृणां सुखाय, प्रेत्याऽपि शाश्वतसुखं सुखिनांतनोति ॥ १ ॥ इति भावनां भावयतोस्तयोस्तदधिष्ठायकः कश्चिद्देवस्तत्र प्रादुर्बभूव । भावनान्ते सभार्यं नृपतिं प्रभुमन्दिराद्बहिर्नीत्वा तस्मै फलद्वयं प्रदाय स देवस्तं प्रोवाच–राजन् ? अमोघशक्तिकमिदं फलद्वयं भक्षितं तेजस्विपुत्रप्रदमस्ति, अतोगृहं गत्वात्वयेदं निजभार्यायै प्रदेयम् । तद्भक्षणेन सा पुत्रयुगलंप्रसविष्यति,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





किञ्च तव मनसि या काचिच्चिन्ता वर्त्तते सा समूलं विनङ्क्ष्यति। इत्थं तदधिष्ठायकदेवस्य गिरं समाकर्ण्य तौ दम्पती प्राप्तप्रमोदौ स्वनगरमागत्य महतोत्सवेन स्वावासमण्डपमलञ्चक्रतुः। ततोऽमोघतत्फलभक्षणेन चन्द्रावती राज्ञी गर्भंदधार। परिपूर्णे समये सा पुत्रयुगलंजनयामास। दिव्यरूपधरौ प्रभाविनौ पुत्रौ जाताविति शुद्धान्तचारिमुखान्निशम्यनृपतिर्निरवधिप्रमोदंवहमानस्त्रुटयद्गात्रविभूषणः कुमारजन्मनिवेदिनेऽङ्गलग्नान्सर्वालङ्कारान्वितीर्य प्रौढं जन्ममहोत्सवं कारयामास। दीनादियाचकेभ्यः प्रभूतं धनंप्रददौ। कारागृहेभ्यस्तेनबन्दिजना निरमुच्यन्त। आर्थिसात्कृता अर्थास्तस्य वदान्यत्वंदिगन्तेषुख्यापयन्तिस्म। ततोद्वादशेह्नि समागते शुभेमुहूर्त्ते भूपतिस्तयोर्नामनिर्देशंव्यधत्त। ज्येष्ठस्य लग्नानुसारेण कञ्चनसिंह इति कनीयसः सुगुणसिंह इति स्वकुटुम्बसमक्षं संज्ञांविधायविविधैर्भोजनैः सर्वान्भोजयामास। ततः शुक्लपक्षीयशशधरकलाविभागाविवतौ सुतौ प्रतिदिनं वृद्धिमीयतुः। तावुभौबन्धूमिथो वियोगमसहमानावतीवस्नेहलौ जातौ। अथ कौमारावस्थामनुभवन्तौतौसुतौ विलोक्य तत्पिता कलाचार्यसन्निधौ विद्याग्रहणहेतवेमुमोच। ततः कियता कालेन मेधाविनौ तौ निजबुद्धिप्रभावेण विद्याप्रबन्धान्कलयामासतुः। अथ प्राप्तयौवनौ तौ कुमारौ यथाभिलाषं विचेरतुः। इतः सिन्धुदेशाधिपतिः सज्जनसिंहभूपतिराकस्मिकमृत्युना त्रिदिवंजगाम, पुत्राभावात्तदीयं राज्यं निःस्वामिकंबभूव, गुणसुन्दरीत्यभिधानाचैका तस्य सुताऽऽसीत्। तदुभयं गुणशालिने योग्यपुरुषाय प्रदातव्यमितिपञ्चकुलेन प्रतिपादितमस्ति, परन्तु गुणसुन्दरी यंपुरुषं परीक्ष्य स्वयोग्यश्च विज्ञाययत्कण्ठे वरमालां समारोपयेत्सैवपुरुषो राज्यं गृह्णीयात्। इत्येतदर्थसूचकमेकं पत्रं चन्द्रसेननरेश्वरस्योपरिसमागतम्। भूपतिश्च तत्पत्रं स्वयंवाचयित्वा तदर्थं मनसिविचार्य तत्कार्यनिष्पत्तये सकलराज्ये तद्वृत्तान्तं ज्ञापयामास, यः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कोऽपिसिन्धुदेशाधिपतेः सज्जनसिंहनृपतेर्गुणसुन्दरीं कन्यांपरिणीयात्रसमानयति स नरोनिश्चयेन तद्देशस्यराज्यं लभते, ततोऽप्यधिकं मदीयराज्यार्द्धमपि तस्मै प्रयच्छामि । यदि तत्कार्यमकृत्वा निष्फलीभूय पश्चादागच्छति तर्हितस्यनरस्याशिरश्छेदं करोमि । इति नृपनिदेशं निशम्य राजदण्डभयादस्मिन्कार्येकोऽपि नरस्तत्परोनाऽभूत् । ततो विज्ञातैतद्वृत्तान्तौ नृपाङ्गजौ झटिति राजसभायां समागत्य निजजनकं नमस्कृत्य विज्ञपयामासतुः । तात ! सिन्धुदेशराज्यं सज्जनसिंहपुत्रीञ्च समानेतुमावां बन्धूगच्छावः, कृपां कृत्वानौप्रयाणाज्ञां देहि । इत्थं कुमारयोर्वचनं श्रुत्वा भूपतिर्गमनानर्हौ तौ विचिन्त्य कथयामास-हे कुमारौ ! अधुना युवयोः सुकोमला बाल्यावस्था वर्त्तते, कदाचिदपि गृहाङ्गणं मुक्त्वा भवन्तौ नान्यत्र गतौस्तः, सत्यप्येवं युवां महाविषमप्रदेशमभिगन्तुं धृताऽभिलाषौ सञ्जातौ. तत्सोढुमस्मद्धृदयं भृशमधृतिं भजते, अतोऽहं प्रयाणाज्ञां दातुमक्षमः । ईदृशं पितुर्वाक्यं निशम्य प्रशान्तचेतसौ कुमारौ प्रोचतुः—जनक ! वयं सूर्यवंशीयाः स्मः, लोकेऽपि सूर्यवंशजामहापराक्रमशालिनः श्रूयन्ते । एवमपि यदि विषमकार्येभ्यः पराङ्मुखीभूय गृहकोणकेस्थित्वा दीनवदनाः सन्तः पराक्रमाभिलाषिणः परान्नराननिवारयामस्तर्हि किमस्मद्भुजबलेन ! यतश्चोक्तम्-किमपेक्ष्य फलं पयोधरान् , ध्वनतः प्रार्थयते मृगाधिपः । प्रकृतिः खलु सा महीयसः, सहते नान्यसमुन्नतिं यया ॥ १ ॥ अप्रदर्शितविक्रमस्य नरस्य कुलमपिकलङ्कितं भवति, क्षत्रियकुमाराणां कीदृशो धर्मः ! कथञ्चतैर्वर्त्तितव्यमिति सर्वं स्वयमेव जानासि, तत्र गमनेचास्माकं का क्षतिः ! ईदृग्विधानि गम्भीरतराणि कुमारवचांसि समाकर्ण्य भूपतिः स्वविचारं शिथिलीकृत्य शुभे मुहूर्त्ते कुमारद्वयं सिन्धुदेशं प्राहिणोत् । अथ नृपादेशं स्वीकृत्यवर्त्मनि प्रयान्तौ तौ कुमारौ सततप्रयाणेन कतिभिर्दिवसैः सिन्धुदेशवर्त्तिनं सिन्धु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ग्राममीयतुः। यावच्चतौ गोपुरान्तिकमागतौ तावत्सायंकालोऽभूत्। इतस्तत्रत्यराजशासनमेतादृशमस्ति, यद्घटिकाद्वयावशिष्टे दिनकरे प्रतोल्या द्वारं पिहितव्तम्, यतस्तन्नगरसमीपवर्तिन्येकस्मिन्प्रदेशेकाऽप्येका राक्षसी जनान्भापयन्ती निवसतिस्म, तस्या भयेन नागरिका निशायां गृहाद्बहिरपिननिर्गच्छन्ति। अस्मिन्प्रस्तावे राजकुमाराभ्यां गोपुरद्वाररक्षका बहुधाऽऽक्रोशैर्बोधितास्तथाऽपितैर्द्वाराणिनोद्घाटितानि। ततस्तौ व्यर्थप्रयत्नौ चिन्तयामासतुः। इदानीमावयोः प्रवेशोनगरमध्ये न भविष्यति, अत्रस्थितयोरावयोः सकला निशा न निर्गमिष्यति, तस्मादन्यत्र सन्निधिस्थिते क्काऽपिस्थाने गच्छावश्चेद्वरमिति विचार्य तस्मात्प्रचलन्तौ तौ निकटस्थसरस्तीरे पुष्पपादपैरमणीयतरमेकमुद्यानं दृष्ट्वा तत्र गत्वा चैकस्य मनोहरच्छायस्य पादपस्याधस्तान्निवासं चक्रतुः। ततस्तुरङ्गमौतरुतले निबद्ध्यघासादिकं निक्षिप्य निर्वृत्तसमुचितक्रियौ तौ तुरगश्रमं व्यपनीय स्वयमपि शयनाभिमुखौ भूत्वाऽऽस्तरणं प्रसार्यतस्थतुः। तदानीं लघुभ्राता सुगुणसिंहः समुत्पन्नबुद्धिः प्रोवाच—ज्येष्ठबन्धो! इदानीमेव कस्यचिन्नागरिकस्य शब्द आवाभ्यां श्रवणगोचरीकृतः, यदत्र महाभयविधायिनी राक्षसी वसति। तस्मादावाभ्यां सावधानतया स्थातव्यम्। आवयोरेकतमेन प्राहरिकंकर्म विधातव्यम्, अन्येन च निद्रासुखं सेवितव्यम्। यतो भयस्थाने निद्रालुना सवर्था न भवितव्यम्, युद्धस्थाने सदोद्योगिना भवितव्यम्, स्वसम्बन्धिजनेभ्यो यथोचितविभागः प्रदेयः, प्रभूतश्रमोपार्जितं धान्यमन्यजनैः सहभोक्तव्यमिति चत्वारोगुणाः कुक्कुटाद्गृहीतव्याः। एवं ध्यात्वा तयोर्ज्येष्ठः कञ्चनसिंहः प्रथमं सुष्वाप। सुगुणसिंहश्चधनुष्पाणिः सज्जीभूय तस्थौ। तस्मिन्क्षणे किमप्येकमाश्चर्यं समजनि। तद्यथा—यस्मिन्नुद्याने यस्य पादपस्यच्छायामाश्रित्य स तस्थिवाँस्तस्यैव सन्निधौ भूरिशाखाप्रशाखाभिर्विस्तृतोन्यग्रोधोऽभूत्, तस्यो-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परिकृतनीडः सपरिवारः कश्चिच्छुकोन्यवसत् । अथैतस्मिन्सरसि प्रगल्भध्वनिरेको दर्दुरोऽवसत् । स च भेकोनिशायां जला-द्वहिर्निर्गत्य स्वजातिभावं व्यञ्जयंस्तीरस्थो ड्रां ड्रां ड्रांमितिध्वनिभिः सममरण्यप्रदेशं गर्जयंस्तस्थौ । तथैवास्मिन्वासरेऽपि प्राग्वच्छब्दान्कर्त्तुंस लग्नः, तत्कर्णकटुकं भेकोदितं निशम्य तस्मिन्न्यग्रोधेस्थितः स कीरोभृशं व्याकुलीभूय क्रुद्धस्तंभेकं प्रत्य-ब्रवीत्–रे दर्दुराधम ? उदरनिर्वाहार्थं समग्रंवनं भ्रान्त्वादिनान्ते भूरिश्रमातुरोऽहं विश्रामार्थमत्रागच्छामि, तदागगनाङ्गणव्या-पिना ध्वनिना त्वं रटसि, येनाऽहंस्वल्पमपि निद्रासुखं न लभे । तस्मात्त्वंरोदनव्यापारं संहरसिचेद्वरमिति शुकोदितं वचनं समाकर्ण्य दर्दुरोऽवदत्–भ्रातः ? यदि मदीयं जल्पनं तुभ्यंनरोचते तर्हि स्थानान्तराणि बहूनि सन्ति, तत्र यथासुखं निवस, कस्त्वां रुणद्धि ? इदं सर्वं वनं भवदीयमेव विद्यते । ईदृशं सगर्वं दर्दुरोदितं वचनं निशम्य सञ्जातक्रोधभरः शुकःप्रोवाच–रे दुर्बुद्धे ? ईदृशानिसगर्वाणि वचनानि त्वं नवदसि, किन्तु त्वदुदरस्थितानि रत्नानि त्वामेवं वक्तुं प्रेरयन्ति, इदानीमहं किं करोमि ? पक्षिजातिजातत्वात्साधनविहीनोऽस्मि, परमधुना कोऽपिपान्थो वीरपुरुषस्त्वामत्रहन्याच्चेत्तवजठरंविभिद्य तस्मा-दुदरादसंख्यमूल्यानि त्रीणिरत्नानि लभेत, किञ्चाहमपि तथाकृते सुखेन निद्रामनुभवेयम् । इति शुकगदितां स्वप्राणापहारिणीं वाचं समाकर्ण्य क्रोधाग्निना ज्वलन्मानसो दर्दुरोऽवोचत्–रे पापाधम ? मच्छिद्राणि समीक्ष्य प्रकाशयित्वाच त्वं सुखेनाऽत्र स्थातुंसमीहसे, परंकालत्रयेऽपि नैवंभविष्यति । योह्यन्यस्यामङ्गलमिच्छति स एव दुःखोपहतः पीड्यते । तस्मात्त्वमपि मद्वाक्यं शृणु–रे शुक ? त्वां निहत्य तवशरीरस्थमांसं यो भक्षयेत् सनरोऽचिराद्विपुललक्ष्म्यासमेतं महद्राज्यं पालयेत् । यश्चत्वदीयमस्तक स्थमांसंस्वादयेत्सतुद्वादशवर्षाणि विविधानि कष्टानि प्राप्नुयात् । परं यस्तवनिहन्ता स एव तवमस्तकपलालं भक्षयेदन्यथा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





शरीरभक्षकस्य समृद्धिमद्राज्यप्राप्तिर्नभवेत् । एवं परस्परमुक्त्वा यावदुभौविरेमतुस्तावत्सुगुणसिंहस्तुणीराच्छरौ निष्कास्य- धनुषिसमारोप्य तावभिलक्ष्यप्राक्षिपत्, तस्मिन्नेव चणेशुकदर्दुरौ पञ्चत्वं प्रापतुः । ततः स तत्र गत्वा प्रथमं तं दर्दुरंविदार्यान- र्घ्याणित्रीणिरत्नानि तदुदराद् गृहीत्वा स्वच्छेनवारिणा प्रक्षाल्य शोधयित्वा च वस्त्राञ्चले तानि सुदृढंनिबद्ध्य तं मृतंशुकं गृहीत्वा तस्यमांसं पक्तुंवन्हिंप्रज्वाल्य तत्र चतत्परिपक्वंविधाय स्वमानसेव्यचिन्तयद्–अहो ! उभौ भ्रातरावावां सिन्धुदेशाधि- पतेर्गुणसुन्दरीं कन्यांपरिणेतुं तद्राज्यञ्चगृहीतुकामावत्र समागतौ स्वः । तस्मादस्यविहगस्य मांसन्त्ववश्यं भक्षणीयंविद्यते, परमस्यजठरस्य मांसमहं भक्षयामितदा सकलदेशाधिपतिरहं भवामि, ज्येष्ठभ्रातुः सर्वथा राज्यलाभोनभवेत्तथाचात्रतस्य वनगि- रिभ्रमणादि भूरिकष्टप्रदायकोऽहमेव भवेयम् । ज्येष्ठबन्धुर्हि पितृवन्माननीयः, इति ज्ञानिनां भणतिरस्ति, तस्माज्ज्येष्ठबन्धुं विमुच्य सकलराज्याधिपतिरहं भवामितदनुचितं लोकेनिन्द्यतमंप्रवर्त्तनं गण्यते । "संभावितस्यचाकीर्त्तिर्मरणादतिरिच्यते ।" अतएव सज्जनानां यानि वाक्यानि तानि मयाऽवश्यतया पालनीयानिवर्त्तन्ते । तथैवनीतिशास्त्रानुसारिभिः पण्डितैरप्युक्तमस्ति– राज्याधिकारः प्रधानराजपुत्रस्यैवाऽस्ति नकनीयसः, तथाविधे नियमे सत्यपि यद्यज्ञानवशादहं शास्त्रमर्यादामुल्लङ्घ्य तत्कार्यं साधयामि तदपि मदीयंकेवलमज्ञानविजृम्भितमेवज्ञायते, इति स्वमनसि बहुधाविचार्यतच्छिरोमांसं स्वयंजघास, अन्यच्चावशिष्टं मांसं स्वज्येष्ठभ्रातुः कञ्चनसिंहस्य भक्षणार्थं रक्षितवान् । अथकञ्चित्कालंविलम्ब्य तं ज्येष्ठबन्धुमुत्थाप्य तेन कथितम्–हे बन्धो ? एकःशुकोमयाव्यापादितस्तस्यसंस्कृतमिदंमांसंवर्त्तते, तज्जग्ध्वा त्वंजलंपिब, येनजाठराग्निस्तव शान्तोभवेद् । यतो- ऽस्मिन्वासरे नगराद्बहिःस्थितयोरावयोर्भृशंक्षुधा लग्नाऽस्ति । एतादृशंसुगुणसिंहोदितं वचनं श्रुत्वा कञ्चनसिंहेन तच्छुकमां-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समभक्ष्यत, जलश्चापीयत। ततः स स्वस्थीभूय सुगुणसिंहमवोचत्–बन्धो ! अधुनाऽहंप्राहरिको भवामि, त्वञ्चसुखेन निद्रां भजस्व, इति भ्रातृवचनं प्रमाणीकृत्याञ्जसा सुगुणसिंहो वसनशय्यायामस्वाप्सीत्। कनकसिंहोऽपि धृतशस्त्रः प्राहरिककर्मणि सज्जीभूतोऽस्थात्। अथैतस्मिन्समये तत्रैव प्रदेशे कश्चिदाश्चर्यजनको योगोऽजनिष्ट, तद्यथा–तस्मिन्नेवारण्ये तस्थिवानेको मणिधरोमहानागः प्रत्यहं तस्यसरोवरस्यतटप्रदेशे स्वभक्ष्यंगवेषयितुं समागच्छति, सुगुणसिंहेन रत्नलोभेन यो दर्दुरोनिहतस्तत्कुक्षिस्थितरत्नानांतेजसा तत्सर्वं वनं प्रकाशितश्चासीत्। तेन योगेन स नागः स्वकार्यं साधयन्स्वैरं परिभ्रमतिस्म। तथैव तस्मिन्नपिसमये समागतोनागः सर्वत्रसरःप्रदेशे तमोव्याप्तिंविलोक्य तस्यभेकस्य शब्दांश्चानाकर्ण्य स्वचेतसि चिन्तयतिस्म, अहो ! किमद्यदर्दुरध्वनिर्नश्रूयते ? केनाऽपिदुष्टेन स व्यापादितःकिम् ! इति विचिन्तयन्स नागोयावत्परितो विलोकयति तावत्तत्र निपतितान्दर्दुरखण्डान्ददर्श। तद्दर्शनेन तत्कालोत्पन्नप्रचण्डक्रोधेनाध्मातहृदयःसभोगी व्यचिन्तयत्–येनपापाधमेन ममाऽयंप्रियसुहृन्निहतस्तस्य दुष्टस्यप्राणानपहृत्य स्वल्पेन कालेन वैरशुद्धिंकरोमि, इतिप्रतिज्ञांविधाय परितोभ्रममाणो व्याकुलितचित्तः स यावद्विलोकयति तावत्तत्र सुप्तंनिद्रासुखमनुभवन्तं सुगुणसिंहंदृष्ट्वा स्वचित्ते विचारयतिस्म, अस्मिन्प्रदेशेखल्विमंनरंविना नाऽन्योदृश्यते, तस्मान्ममभित्रस्य निहन्ताऽयमेवेतिनिश्चित्य स तद्राजकुमारस्य समीपंगत्वा तस्यदक्षिणचरणाङ्गुष्ठं दष्ट्वा स्वस्थानमयासीत्। ततोऽचिरात्सुगुणसिंहस्तस्य भोगिनः प्रचण्डविषविसर्पणेन मृतकवदचेष्टितोऽजनि। अथविभावर्यां विभातायां कनकसिंहेन कनीयांसंभ्रातरमुद्बोधयितुं बहवः शब्दा विहितास्तथाऽपि सुगुणसिंहोनोदतिष्ठत्। तदा कनकसिंहस्तदन्तिके समेत्य तंकराभ्यां स्पृष्ट्वा व्यलोकयत्। परं विचेतनं तं विज्ञाय कर्हिचिदपि तेनेदृशं कार्यं नानु-

११

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





भूतमत एव मृतोऽयमितिनिश्चित्यहृदयभेदनं रोदनमारभ्यत । असिमिर्जनेस्थानेऽसकृद्रुदन्तंतमाश्वास्य को निवारयेत् ? पश्चात्स्वयमेवरोदनं परित्यज्य व्यचिन्तयत्–इदानीं विषादकरणेन किं फलम् ? अस्मिन्समये परमोपास्यं त्रिलोकनाथं परमेश्वरमन्तरेण सहायको मेऽङ्गीभूतो नापरो विद्यते, यतः–यत्तेजसेदं प्रविभातिविश्वं, यदर्चनेनैवतरन्ति लोकाः । यद्भावनातः सुखिनो भवन्ति, स एव सेव्यो जगदेकपूज्यः ॥ १ ॥ स्वकर्मणा दुःखमियर्त्तिजीव–स्तेनैव सौख्यानि समुद्भवन्ति । अतस्तदेकं विभुमन्यमानो–निजेष्टदेवाभिमुखो भवेद्द्राक् ॥ २ ॥ इति ध्यात्वा कनकसिंहोज्ञानेन धृतधैर्यस्तन्मृतकं संस्कर्त्तुं काष्ठादिवस्तुसारजिघृक्षया समीपस्थं तत्पत्तनमभ्यगात् । तदानीं तस्मिन्नगरे तन्नगराधिपतेः स्वयंवरायाः कन्यायाः पाणिग्रहणमहोत्सवः समारब्धः, तद्दिदृक्षया देशान्तरेभ्योऽनेके जनसमूहा मिलिताः सन्ति । तस्मात्तत्पत्तनवासिनो व्यवहारिणो देयाऽऽदेयविवेकविकलाः समजायन्त । अतः कनकसिंहेनाऽपि स्वोचितं किञ्चिद्वस्तुनालम्भि । ततः स राजसूनुर्मनसिचिन्तयातिस्म–भूरिप्रयासेन पितुराज्ञामादाय राजकन्यामुद्वोढुं राज्यश्च गृहीतुं सबन्धुरत्र समायातोऽस्मि, तत्राऽपि कनिष्ठबन्धुरम्रियत । तस्मात्सा वाञ्छातु विनष्टैव, यतोऽस्मिन्विपत्तिसमये राजकन्या कुतः प्राप्यते ! यां प्रतिज्ञां विधायाहमत्र समागतस्तत्सकलं कार्यं हृद्येवावस्थितम् । अस्त्विदानीं यत्स्यात्तद्विलोकयामि । इत्थं विचार्य यत्र प्रभूता जनाःसंभूय संस्थितास्तत्र गत्वा कनकसिंहस्तस्थौ । प्रथमन्त्वज्ञातपरिचयत्वाद्दूरदेशप्रयाणेन शीतातपपीडया च शरीरकान्त्यादेर्विपर्ययत्वात्स्वभ्रातुर्मरणात्तज्जन्यशोकसंचयेनाभिभूतत्वाच्चायं राजकुमार इति केनाऽपि जनेन नाज्ञायि । अत एवोपवेशनार्थं योग्यं स्थानमपितेन कुतो लभ्यते ? अथास्मिन्प्रस्तावे स्वयंवरणमुहूर्त्तस्य समयोऽजनि, तदानीं भूपकन्यागुणसुन्दर्यपि स्फारतरशृङ्गारैः सुशोभितावयवा महाकुथाद्यनेक-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूषाभिर्मण्डितायां हस्तिन्यामुपविश्यकियन्तीभिर्दासीभिः परिवारिता देशान्तरेभ्यः समागतानां राजन्यानां निरीक्षणकृते तेषां मध्येमार्गे प्राचलत् । तस्मिन्नवसरे सर्वेषां राजकुमाराणां दृष्टयस्तस्यां राजकन्यायां युगपन्निपेतुः । सुरभिकुसुम-ग्रथितां प्रवरां वरमालां शुण्डादण्डेन गृहीत्वा करिणी वरकण्ठमलंकर्त्तुं परितोबभ्राम । तस्मिन्नवसरेऽनर्घ्यनेपथ्यालङ्कारैर्वि-राजमानान्वैदेशिकान्राजन्यान्परित्यज्य यत्र विषण्णचेतस्को मलीनवसनो विवर्णमुखद्युतिः कनकसिंहःस्थितस्तत्र सा करिणी स्वकीयकरेण जनान्दूरीकृत्य तस्यकुमारस्य समीपं गत्वा गतिभङ्गमाततान । तस्मिन्क्षणे गुणसुन्दरी सौवर्णरजतपुष्पैः कनक-सिंहं वर्द्धापयामास, तदानीं सा करिण्यपि स्वकरगृहीतां वरमालां तस्य कण्ठमारोपयतिस्म । ईदृशं मङ्गलसमयं वीक्ष्य प्रधान-वर्गाः समस्ता नागरिकाश्च जयजयारावैर्नभस्तलमुद्घोषयामासुः, तन्मूर्ध्नि च कुसुमवृष्टिं व्यधुः । ततस्तस्य कुमारस्य सन्निधौ समागत्य राजपुरुषा महान्तं सत्कारं विधाय तं गजेन्द्रारूढं कृत्वा महताडम्बरेण राजभवनमानिन्युः । शुभेमुहूर्त्ते च तं कनक-सिंहं सर्वेमन्त्रिणः सम्मिल्य राज्यासने निवेशयामासुः, ततो गुणसुन्दरीं समहोत्सवं परिणीय कनकसिंहो राज्यकार्यनिमग्नो गुणसुन्दर्या समं क्रीडमानो महोपकारिणं स्वकीयं लघुबन्धुं सर्वथा व्यस्मार्षीत् । इत्थंसा शीलवती निजभर्त्तारमजितसेनं कथयति–प्राणेश्वर ? अनेन दृष्टान्तेन भवानेव स्वयं विचारयतु, मनुष्यो यदा सुखसम्पत्तिभिः प्रमत्तो भवति तदा दुःखस्य समयं सर्वथा नैवस्मरति, तथैवान्येषां कृतोपकारान्नजानाति । यथावह्निना भृशं तापितेऽयोगोलके निक्षिप्तो वारिबिन्दुर्नाम-मात्रमपि न धारयति, तथैव कृतघ्नस्य हृदयस्थलात्कृतोपकाराः क्षणमात्रेण विनश्यन्ति । तथाविधंशीलवतीवचनं निशम्या-जितसेनोऽप्योचत्–कान्ते ? यद्यपि त्वदीयं वचनं सत्यमस्ति तथाऽपि नैतादृशी शङ्का कदापि त्वया विधातव्या । यतोऽहमा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





जीवितान्तं त्वयि सदैकभावेन स्थास्यामीत्यसंशयं विद्धि । इत्थं तामभिधाय पुनः स पप्रच्छ–प्रिये ? उभयोर्भ्रात्रोर्ज्येष्ठः कनकसिंहस्तु कन्यारत्नं गृहीत्वा राज्याधिपतिर्बभूव । द्वितीयस्य सुगुणसिंहस्य नागदष्टस्य किं जातमितितद्वृत्तान्तं सत्वरंत्वया निवेद्यताम् । यतो राजशासनंत्वं जानासि, अद्य खलुराज्ञासहग्रामान्तरं गन्तुं मम प्रयाणावसरो विद्यते । तस्माद्बहुविलम्बो यथा नस्यात्तथा तत्कथय । तदा शीलवती सुगुणसिंहस्य वार्त्तां कथयितुं प्रारेभे, हे स्वामिन् ? सुगुणसिंहस्तत्रैवोद्याने तरुच्छायायां निपतितोऽभवत्, तदन्तिकेतुरङ्गमौद्वौप्रतिबद्धौस्तः, तस्मिन्समये तद्भाग्यप्रेरित इव व्योम्निस्वपत्नीसमेतः कश्चिद्विद्याधरो विमानमारुह्य कुत्रचित्स्वाभीष्टप्रदेशेऽगमत्, तद्वर्त्मनिपतितं विचेतनीभूतं सुगुणसिंहं विलोक्य विद्याधरपत्नी सञ्जातकरुणा निजपतिं कथयामास–प्राणवल्लभ?अस्मिन्निर्जनस्थाने कोऽयं मृतकवन्निश्चेष्टो निपतितः?इति विद्याधरीवचनं श्रुत्वा स विद्याधरो विमानादवतीर्य तस्य कुमारस्य समीपमागत्यतंव्यलोकयत्, तदीयचिह्नैश्चायं राजकुमार इत्यवेदि तेन । केनाऽपि विषजन्तुनादष्टोऽयं विषमूर्च्छितः सञ्जात इति विज्ञाय दयार्द्रमानसःस खेचरः स्वविद्याबलेन तं कुमारं सचेतनं विधाय पुनर्विमानमारुह्य निजभार्यासमेतो निजमार्गमचलत्। ततोनिद्राभङ्गादुत्थित इवस सुगुणसिंहः समुत्थायपरितश्चक्षुर्व्यापारयामास । तदातत्रनिबद्धौ निजतुरङ्गमौ स निरीक्ष्य सर्वदिक्षुपरिभ्रमन्निजभ्रातरं कनकसिंहमनवेक्ष्य भृशं विषण्णस्तस्य गवेषणार्थं दिवानिशं पर्यटत्। तथापि क्वाऽपि तच्छुद्धिमलभमानः स शोकनिमग्नमानसस्तुरगद्वयं समादाय नगराभिमुखं जगाम । तस्मिन्नपिवासरे पूर्ववत्पिहितं गोपुरद्वारं विलोक्य तस्मान्निवर्त्तमानः स तस्य गोपुरस्यान्तिकेऽवस्थितमेकं यक्षालयं गत्वा तत्रैव निवासमकरोत् । अश्वयुगश्च तत्र निबद्ध्य तृणजलादिकं सर्वं तदुचितं संपाद्य धृतसज्यकार्मुकोऽवतस्थे । दिनत्रयमारभ्यक्षुत्क्षामोऽनिद्रितश्च स कुमारो मध्यरात्रिसमये कि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्चिन्निद्रितोऽभूत् । तस्मिन्नवसरेच्छलं गवेषमाणा तदरण्यवासिनी काचिद्यक्षिणी तत्र समागत्य सहसा तौ तुरङ्गमौ जघास ? ततः सा सुगुणसिंहमत्तुं यावदागच्छति तावद्विनिद्रः स कुमारः सत्वरं धनुषिशरंसन्धाय तस्या यक्षिण्या मस्तकंविव्याध । तेन सा सद्यो मरणमयासीत्, कुमारोऽपि विगतचिन्तः पुनस्तत्रैव सुष्वाप । इतो निशाप्रान्ते तन्नगराधिपतेरश्वपालास्तृणजिघृक्षवो गोपुरद्वारं समुद्घाट्य बहिरागमन्, तत्रवर्त्मनिनिपतितां पञ्चत्वमुपागतां राक्षसीं विलोक्य जीवन्तीं जानानास्ते भयाक्रान्ताश्चरणैः पश्चाच्चलन्तो गोपुरान्तरे समाजग्मुः । पुनः सूक्ष्मसमीक्षिकया विलोकमानास्तां मृतां विज्ञाय समस्तास्ते राजभृत्याः परिभ्रमन्तो यक्षसदने सुप्तं तं कुमारमद्राक्षुः । मन्त्रितश्चतैः सर्वजनभयविधायिनीयं राक्षसीह्यनेन पुरुषेण निहतेति संभाव्यते, अत इमं नरंहत्वानृपतेः पुरोगत्वावयं कथयिष्यामः, इयं राक्षसी निहताऽस्माभिरित्यभिधाय नृपतेः सकाशात्पारितोषिकं लप्स्यते । एवं तृणहारिणो नृपसेवका मिथोमन्त्रयित्वा सर्वैकमत्या यक्षालयं प्रविश्य निद्रितं सुगुणसिंहं विविधप्रहरणै र्भृशं ताडयित्वा भग्नगात्रमकार्षुः, ततस्ते निगडितहस्तचरणं तमेकस्मिन्गर्त्तेनिचिक्षिपुः, अथाऽयं मृत इति विज्ञाय प्रमुदितचेतसस्तेराजभृत्याः स्वकार्यान्निवृत्ताः पश्चाद्वलित्वा कनकसिंहभूपतये निवेदयामासुः । स्वामिन् ! भवत्प्रसादेनास्माभिरद्य प्रचण्डोपद्रवकारिणी राक्षसी निहताऽस्ति । इत्थं दूतोक्तिं निशम्य प्रसन्नवदनो नृपतिः स्वयंतद्विलोकनार्थं गोपुराद्बहिरागत्य पञ्चत्वमापन्नां निशाचरीमपश्यत्, एभिस्तृणहारकैरेवेयं राक्षसी निहतेति निश्चित्य नृपतिस्तेभ्यो विपुलंद्रव्यमदात् । मासिकंद्रव्यमप्यधिकं वर्द्धयित्वोत्तमाधिकारेषुतान्नियोजयामास । इतः सुगुणसिंहस्तु शस्त्रप्रहारजन्यवेदनाभिः पीड्यमानो गर्त्ते निपतितो मन्दं मन्दं श्वसन्नासीत्, तस्मिन्समये तत्र यक्षपूजकः फलपुष्पादिपूजोपकरणानि समादाय यक्षं पूजयितु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





माजगाम । वेदनामनुभवन्सुगुणसिंहस्तेनपूजकेन व्यलोकि, सदयः स पूजकः सत्वरं तत्समीपं गत्वा पप्रच्छ—हे भ्रातः ! कस्त्वमसि ! कस्मिन्नगरे निवससि ! इमां दुर्दशांकथं प्रयातोऽसि ? तदानीं कुमारोऽवदत्—प्रियबन्धो ! ममहस्तपादाद्यङ्गानि शत्रुभिर्बद्धानि, तस्मादहंभृशं दुःखमनुभवामि, अतस्त्वं पूर्वं बन्धनान्मां निर्मुक्तंकुरु, पश्चादहं मदीयं सर्वं वृत्तान्तं त्वां निवेदयामि, दयार्द्रमानसः सपूजकस्तस्मिन्दयां विधाय तं निर्बन्धनीकृत्य व्रणबहुलं तच्छरीरञ्चनिरीक्ष्यशुशोच—हे पथिक ? केनाऽधमेनत्वमीदृशीमवस्थां प्रापितः ? ततस्तेन सुगुणसिंहेन निजवृत्तान्तं श्रावयित्वा निजवस्त्राञ्चलादेकं रत्नं गृहीत्वा देवपूजकाय प्रदत्तं, पुनस्तेन कथितञ्च—हे बन्धो ! इदं रत्नममूल्यं विद्यते, अतः कस्यचिद्व्यवहारिणः सद्मनि तदुद्धारके मुक्त्वाधनं गृहीत्वाऽस्मात्स्थानान्मां त्वदीयमावासंनय, तद्धनव्ययेन ममाश्वासनंविधेहि, अहंतवोपकारं नविस्मरिष्यामि, यावदहं तवगृहे निवसामि तावद्भवद्गृहसम्बन्धिव्ययोऽपि तद्रत्नद्रव्येणैवविधातव्यः, इतिमद्विज्ञप्तिर्भवतास्वीक्रियताम् । इत्थं कुमारोक्तंवचनं निशम्य देवपूजकः प्रसन्नीभूयस्वगृहंतंनीत्वासदौषधादिभिस्तस्यविविधां परिचर्यांव्यधात् । पृथग्गृहे च तं कुमारंन्यवासयत् । ततो यत्पूजकस्तद्रत्नंगृहीत्वाविपण्यां प्रसिद्धिभाजस्तेजपालाख्यस्यव्यवहारिणोहट्टं गत्वा तद्रत्नं मुक्त्वा सहस्रनिष्कान्कुसीदार्पणेनाग्रहीत् । ततोधनग्रन्थिं समादायपूजको निजगृहमाजगाम । तेनधनव्ययेन तत्कृतैर्नानाविधोपचारैः कतिभिर्दिवसैः स्वस्थदेहोराजसूनुः समभूत् । ततः स कुमारोनिजाङ्गुलीयकं निष्कास्य तस्मैपूजकाय दत्त्वोवाच—इमांरत्नोर्मिकां विक्रीय तल्लब्धधनेन तेजपालमहेभ्यस्यगृहे ग्रहणकेमुक्तं यदस्माकं रत्नं तदानीयताम् । एवं सुगुणसिंहस्य वचनं स्वीकृत्य विपण्यां तां रत्नमुद्रिकां विक्रीय तद्धनंलात्वा तेजपालस्य समीपंगत्वातमुवाच—महेभ्य ? भवतोवृद्ध्यासहितं यद्द्रव्यं भवति तत्सर्वं गृहीत्वाऽस्म-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दीयं रत्नं प्रत्यर्प्यताम् । ईदृशं पूजकोक्तं वचनं समाकर्ण्य रत्नलुब्धमानसस्तेजपालोरक्ताङ्गः सन्नुवाच–देवपूजक ! त्वमपिविपुलमतिर्विभाव्यसे ! रत्नप्रमितं द्रव्यं समादाय तद्रत्नंमह्यं दत्तमस्ति, पुनस्तद्गृहीतुमागतोऽसि, परं सावार्त्ताऽत्रत्वयानवाच्या। एवं महेभ्यस्यमृषोक्तिं श्रुत्वा स पूजकः स्वमनासिविस्मितः प्रोवाच–श्रेष्ठिन् ! मौनमाधायशीघ्रं तद्रत्नं मह्यंसमर्पय, यस्मादिदंरत्नं तवस्वाधीनमधुनानस्थास्यति । ईदृशीं विषमांपूजकोक्तिं निशम्यसमहेभ्यः स्वभृत्यैस्तमर्धचन्द्रं प्रदाप्यततोनिष्कासयामास । अथ विलक्षीभूतः स निजगृहमागत्यसुगुणसिंहं तद्रत्नवृत्तान्तमचीकथत् । ज्ञातसारः सुगुणसिंहः स्वयमेवतत्रगत्वा श्रेष्ठिनमित्यवोचत्–महेभ्यवर्य ! वणिक्कुलतिलकायमानोभवाँल्लोकेख्यातिमानुश्रूयते, अस्मिन्पत्तने सर्वेषां व्यवहारिणां मध्येत्वमेवप्रथमोनिगद्यसे, सत्यप्येवं रत्नलोभेनस्ववंशपरम्परार्जितां यशोवल्लींसमुच्छेत्तुं कथमुद्यतोऽसि ? नाऽयं मृषावादो भवतावक्तुं युज्यते, साम्प्रतमेव तद्रत्नं निष्कास्यप्रत्यर्प्यताम्, वृद्धिसहितं सर्वधनंभवदीयं परिगृह्यताम् । इतिकुमारोक्तंवचनंनिशम्य स व्यवहारीजातचमत्कारोमनसि व्यचिन्तयत्–तद्रत्नमस्य पूजकस्य नास्ति, परन्त्वेतत्कस्यचिद्राजकुमारस्य विद्यते, तस्मादस्याग्रे यदि धूर्त्तभावं करिष्यामि, तर्ह्यपि तद्रत्नं मदन्तिके न स्थास्यति, प्रत्युत प्रतिष्ठाहानिर्मे भविष्यति। अतः कोऽप्येतादृशोऽन्यो युक्तिप्रकारो विधातव्य इति निश्चित्य कुमारं प्रत्यवदत्–महापुरुष ! नाहं धनलिप्सया वितथवादिनां पन्थानमनुसरामि, मयातु पूजकस्य किञ्चिदुपहास्यतया तथैवोदाहृतमस्ति, एतावता भवदन्तिकमागत्यतेन यन्निवेदितं तत्सर्वं त्वया सत्यतयामानितमित्यभिधाय कुमारस्य सन्निधौ स व्यवहारी निजोक्तं वचनमपन्हुतवान् । पुनस्तेन कुमारः पृष्टः किमेतद्रत्नं भवदीयमस्ति ? कुमारोवदत्–मदीयमेवतद्रत्नं विजानीहि, यदाऽहं व्याधिग्रस्तकलेवरोऽभूवं तदानीं तेन पूजकेन भवतः पार्श्वाद्रत्नविनिमयेनाहं निष्कानानाययम्,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





इत्युक्त्वा तस्मिन्कुमारे विरते सति तेजपालः प्रोवाच–महद्भाग्यमद्यास्माकमनेन निमित्तेन भवतोदर्शनं जातम्। अद्य भवता मदीयं गृहं पवित्रीक्रियताम्। आतिथ्यसत्क्रियां गृहीत्वा मां कृतार्थीकुरु, पश्चान्निजं रत्नं समादाय यथेच्छं त्वया स्वस्थानं प्रतिगन्तव्यम्। एवं महेभ्योक्तं वचनं सुगुणसिंहो नामन्यत, पुनः श्रेष्ठिना बह्वाग्रहेण प्रार्थितोऽपि सुगुणसिंहस्तदुक्तं वचनं नाङ्गीकृतवान्, तदा लोभाभिभूतमानसस्तेजपालस्ताम्बूलक्रमुकमिषेण सुगुणसिंहं निजालयस्य तृतीयभूम्यां नीत्वा पूर्वशिक्षितैः स्वकीयसेवकैः कारागृहे प्रक्षेपयामास, अधःस्थितं पूजकञ्च प्रोचिवान्–कुमारस्तुरत्नं गृहीत्वा पृष्ठद्वारेण विनिर्गत्य भवतोगृहं जग्मिवान्, त्वाञ्च समाह्वयति, तस्मात्त्वमपि सत्त्वरं प्रयाहि, इत्थं कपटप्रबन्धेन तावुभौप्रतार्य तेजपालः स्वयंपरमप्रमोदमनुबभूव। अथैकस्मिन्दिवसे कनकसिंहस्तन्नगराधिपतिर्निजभार्याया गुणसुन्दर्या हारनिर्माणाय रत्नानां गवेषणामकारयत्, सर्वेमणिकाराः स्वस्वरत्नानि गृहीत्वा समागतास्तत्र तेजपालस्य तदमूल्यं रत्नं तया राज्ञ्या प्रसन्नीकृतम्। वणिग्वर ! ईदृशान्यन्यानि रत्नानि त्वयाऽऽनेतव्यानीति भूपतिस्तं तेजपालं समादिशत्। ततः स महेभ्यस्तथाविधानि रत्नानिमेलयितुमगाधे चिन्तासागरे निमग्नो विविधान्विकल्पान्प्रकुर्वन्सुगुणसिंहस्य समीपं गत्वाऽवादीत्–कुमारेन्द्र ! ईदृग्विधान्यपराणि रत्नानि त्वदन्तिके सन्ति ! कुमारेण भणितं मदन्तिके रत्नद्वयं विद्यते, महेभ्येन तद्रत्नयुगलं कुमारपार्श्वात्संगृह्य पश्चात्स जगदे–एतादृशानि रत्नानिक्कमिलन्ति ? कुमारोवदत्–रत्नद्वीपे प्रभूतानि जात्यरत्नानि विद्यन्ते। इत्थं कुमारोक्तं रत्नप्राप्तिस्थानं समाकर्ण्य क्षीणचिन्तस्तेजपालो नृपतेः सन्निधौ गत्वोवाच–भूपते ? अस्मिन्कार्ये षाण्मासिकोऽवधिरपेक्ष्यते, नृपेण तथैव तद्वचनं प्रतिपन्नम्। ततो गृहीतनृपाज्ञस्तेजपालो रत्नद्वीपं जिगमिषुर्यावत्प्रवहण-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मारोहति तावत्तत्प्रवहणवाहकास्तं प्रोचुः—श्रेष्ठिन् ! अस्मात्स्थानान्नातिदूरे जलधिप्रदेशे कश्चिद्यक्षो निवसति, स च मनुष्यभक्षणं करोति, अतस्तस्मै यक्षाय नरस्यबलिं दत्त्वैवाग्रे गमिष्यते । तस्मात्तदर्थं त्वयैको मनुष्यो गृहीतव्यः । इति नाविकोक्तं वचनं श्रुत्वा स्वकारागृहेस्थितं सुगुणसिंहं सहादाय प्रवहणं समारुह्य तेजपालो रत्नद्वीपं गन्तुं प्राचलत् । अथ दैवयोगेन यक्षाश्रितं मार्गं विहायान्यस्मिन्वर्त्मनि तत्प्रवहणं गच्छत्कतिभिर्दिवसै रत्नद्वीपमियाय । तत्र प्रवहणं स्थिरीकृत्य निकटवर्त्तिनि रत्नपुराभिधे पत्तने समागत्य तेजपालो निजक्रयाणकानि विक्रीय धनसञ्चयमकरोत् । ततस्तस्मिन्नगरे रत्नजिघृक्षुः स निजोपयोगिरत्नगेवषणां कर्त्तुं लग्नः । इतस्तन्नगराधिपतेरत्नसिंहभूपस्य प्रासादस्तद्गोपुरान्तिकस्थोऽभूत् । तस्मिन्प्रासादे तत्पुत्री रत्नवती निवसतिस्म, प्राप्तयौवना सा वरार्थिनीति प्रतिज्ञामकार्षीत्—यः कोऽपि नरो दीपकरागेण गानं विधाय दीपं प्रकाशयेत्तेन साकमहं परिणयेयम् । इति प्रतिज्ञापूरकस्य पुरुषस्यायोगादद्याऽपि साकन्याऽनूढा तिष्ठति । अथान्यदाऽपराह्णसमये सा कुमारिका निजप्रासादस्य गवाक्षे निषण्णाऽभूत्, तस्मिन्समये सुगुणसिंहो निजप्रवहणस्थितो नानाविधान्विकल्पान्प्रकुर्वन्परमात्मनो गुणैः समाकृष्टः सायंकालोचितेन दीपकरागेण प्रभुंस्तोतुमुपचक्रमे । तेन गायनेन परितः प्रवहणप्रदीपाः स्वयमेव प्रकाशन्तेस्म, तत्समीपस्थेषु गृहेष्वपि प्रदीपास्तथैव प्रज्वलिताः । एवं दीपप्रकाशं निरीक्ष्य गवाक्षस्थिता सा कुमारिका प्रमोदमेदुरा जज्ञे । अहो ! मदीया प्रतिज्ञाऽद्य संपूर्णाऽजनि, एषु प्रवहणेषु काऽपि मत्प्रतिज्ञापूरको नरो विद्यते, परमेतस्य पुंसः शुद्धिः कथं लभ्यते । एवं वितर्कयन्ती सा स्वप्रासादशिखरमारुह्ययस्यां दिशि शब्दश्रेणीमश्रौषीत्तस्यां काष्ठायां तच्छुद्धिहेतवे निजदासीं प्रैषीत् । दास्यपि तत्र गत्वा प्रवहणस्थितान्नरानपृच्छत् ,—भो यात्रिकाः ! दीपकरागप्रकाशको नरोऽत्र विद्यतेनवा ?

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तदा धृतमौना इव निःशब्दास्ते पोतनिषण्णा जना गूढाकारेङ्गितास्तस्थुः, गायकस्याभिधानं न कथयामासुः । यतो वैदेशिकाः परकीयराजनीतिं न विजानन्ति । तस्मात्तैरेव विज्ञातमियं नृपदूतिका किमर्थमत्र समागता ! गायकस्याभिधानं किमर्थं पृच्छति ? अस्मिन्द्वीपे नृपतेः कीदृग्विधं शासनं प्रवर्त्तते ? किंवाऽस्मिन्राज्ये केनाऽपि पुरुषेण गायनं न विधेयमिति भूपतिना निषेधो विहितोऽस्ति ? यदि चैतस्याभिधानं कथयामस्तर्ह्येनं बन्दीकृत्य नृपसन्निधावसौ नयति तदा श्रेष्ठिना वयमुपालभ्यामहे । इति विज्ञाय कोऽपि प्रत्युत्तरं नादात् । ततः खिन्नमानसा दासी पश्चादागत्य राजकन्यामवादीत्–स्वामिनि ! भवत्या आज्ञानुसारेण तत्र गतया मया सर्वत्र पर्यवेक्षणं विहितं तथाऽपि गायकस्य शुद्धिर्नलब्धा । इति दासीवचनमाकर्ण्य व्यग्रमानसा सा कन्या-निजजनकमवादीत्–हे तात ! ममाऽभीष्टदायको भर्त्ताऽत्र समीपस्थिते प्रवहणे संस्थितोऽस्ति, तं गवेषयित्वाऽत्र समानय, तेन सह ममोद्वाहं सम्पादय । यतो ममैतादृशी प्रतिज्ञाविद्यते, यः कोपिनरो दीपकरागेण गानं कुर्वन्प्रदीपान्प्रकाशयेत्, स ममभर्त्ताभवेत् । तथैवह्यस्तनेवासरे सायंकाले कश्चित्पुरुषोगायतिस्म, तेनगायनेन प्रदीपाः स्वयमेव प्रकाशन्तेस्मेति मया प्रत्यक्षतया व्यलोकि, तस्मादस्मिन्सन्निधिस्थे प्रवहणे यो दीपकरागगायकः स एव मम भर्त्ताऽस्ति । इत्थं निजकन्याया वचनं निशम्य महीपतिस्तत्पोताधिपतिं तेजपालश्रेष्ठिनं निजान्तिके समाहूय कन्यकागदितं सर्वं वृत्तान्तमचीकथत् । पुनस्तेन श्रेष्ठी भणितः–महेभ्य ? तद्गानकर्त्तारंनरमत्रसत्वरं समानय । यतस्तस्मैनराय मदीयं कन्यारत्नं सहस्ररत्नोल्लसितोहारश्च प्रदातव्योऽस्ति । इति नृपतिवचनं निशम्य तेजपालो भृशंप्रमुदितोऽभूत् । ततः सश्रेष्ठीस्वप्रवहणमासाद्य सर्वाञ्जनानपृच्छत्–कोऽत्रपोतेदीपकरागेणागायत ! सर्वैः कथितं योऽसौकारागृहे स्थितोऽस्ति तेनपुंसा गायनं विहितमिति जनमुखाच्छ्रुत्वा तद्गायकं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुगुणसिंहं विज्ञाय श्रेष्ठी निजचेतसीतिदध्यौ—सहस्त्ररत्नानां दीव्यरूपायाः कन्यायाश्चमे लाभोऽत्र प्रयासेनविना भविष्यति। इत्थं विकल्पजालं कुर्वन्स श्रेष्ठी सुगुणसिंहं निजान्तिके समाहूय नृपोक्तं कन्यावृत्तान्तं निवेद्य तेन सार्द्धं राजसदसि जगाम। सिंहासनोपविष्टो भूपतिस्तं सुगुणसिंहं रूपलावण्यनिधिं विलोक्य भृशं मुमुदे। ततः स्वतनुजा रत्नवती तेनतत्र समाहूयत, सापिवरार्थिनीधृताऽमूल्यनेपथ्या नृपास्थानीमासाद्य सपरिवारा स्वप्रतिज्ञापूरकस्य नरस्य परीक्षार्थं परितः सदसिसतैलवर्त्ति-कान्प्रदीपानस्थापयत्, ततस्तयाऽभाणि—क्षत्रियमानिनः ? सदस्याः ? पुरा स्वयंवरमण्डपे देशान्तरेभ्यः समागता राजन्याः कन्याया अभिलषितां प्रतिज्ञां पूरयित्वा कन्यारत्नमलभन्त, तथैवाधुनाऽपि प्रवृत्तिर्जागर्त्ति। अतो मदीयां प्रतिज्ञां निवेदयामि, तां सावधाना यूयं शृणुत, अस्यां राजसभायां तैलपूरिताः प्रदीपाः स्थापिताः सन्ति, तांश्च यो दीपकरागेण प्रकाशयिष्यति तस्य नरस्यग्रीवायामिमां वरमालां स्थापयिष्यामि। ईदृशं राजकन्यायाः सुधासोदरं वचनं श्रोत्रपुटेन सादरं निपीय सुगुणसिंहः स्वकलाकौशल्येन दीपकरागं प्रारभत, ततः सहसा सर्वतः स्थिताः प्रदीपाः सुविहितरागमाहात्म्येन स्वयमेव प्रकाशन्तेस्म। तद्दृष्ट्वा सर्वेसदस्या नृपामात्यादयश्च चमत्कृतास्तस्य कलाकौशलं प्रशंसन्तः प्रमोदन्तेस्म। ततस्ते सर्वेसुगुणसिंहं सुमनोहरैः सुमनोभिर्वर्द्धापयन्तिस्म। रत्नवत्यपिप्रभूतप्रमोदवारिराशौ निमग्ना स्वहस्तेन वरमालां तस्यकण्ठपीठे निचिक्षेप। ततो भूपतिः समहोत्सवं तयोरुभयोः पाणिग्रहं कारयामास। वसनाभरणादिकां विपुलां सम्पदं तस्मै वितीर्य स्वपुत्रीं रत्नवतीं स तस्याः श्वशुरालयं प्रेषयतिस्म। सुगुणसिंहोऽपि सभार्यो नृपदत्तं द्रव्यादिकं समादाय निजप्रवहणंप्रययौ। अथ तेजपालः पूर्णमनोरथः शीघ्रं स्वपोतं सज्जीकृत्य त्वरितवेगेन चालयतिस्म। जलवर्त्मनिगच्छन्सुगुणसिंहो निजोदन्तंमूलतः प्रारभ्य रत्नवतीं कथया-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मास । पुनस्तेन सा भणिता–सुदति ? अस्मिन्प्रवहणे सुदैवयोगादावयोः सम्बन्धोजातः, परन्त्वधुना निर्विघ्नतया सागरोल्लङ्घनंदुर्लभंमन्ये । यतोऽस्य महेभ्यस्य चित्तवृत्तिर्मलीना विद्यते, अनेनदुष्टवणिजा मदन्तिकात्रीणि रत्नानि बलात्कारेण गृहीत्वाऽहं कारागृहे निक्षिप्तोऽस्मि । अस्याधमस्य हस्तपाशादधुनापि मोचनावसरोमया न प्राप्यते । इत्थं पतिवचनं शृण्वन्ती सा प्रोवाच–स्वामिन् ? भवत्प्रसादेन सर्वविद्यासु कुशलास्मि, भवतःसकलंदुःखं निवारयिष्यामि, यावन्मम प्राणा विद्यन्ते तावत्तवरोममात्रमपिवक्रीकर्त्तुंकःक्षमः ? किञ्चिदपि भवता मनासिन्यूनं नैवचिन्तनीयम्, इदानीं भवता निर्भयतया स्थातव्यम् । इति निजभार्याया गिरं समाकर्ण्यभृशं मोदमानः सुगुणसिंहो लब्धसर्वस्व इव वेदनां विसस्मार । इतस्तेजपालः स्वमनसिविविधान्विकल्पान्कर्त्तुंलग्नः, अहो ? दैवगतिर्विचित्रा विद्यते, क्षणमात्रेण रङ्कोऽपि नृपायते, नृपतिश्चदरिद्रायते, दैवमेवात्रकारणमस्ति । अयं सुगुणसिंहो मयाबन्दीकृतोऽस्ति, तथापि क्षणादनेन राजकन्या समासादिता, भूरिरत्नसंपत्तिश्च स्वाधीनीकृताऽस्ति, परंपिपीलिकामुखे कलिङ्गं कियत्कालं तिष्ठति ? इदानीमेवाहं वर्त्मनितंजलधौपातयित्वा तदीयांस्त्रीरत्नादिकां सकलां सम्पत्तिं स्वसात्करिष्यामि । ततः कियन्ति रत्नानीमांप्रमदाश्च निजनगराधिपतये प्राभृतीकरिष्यामि, अवशिष्टञ्च सर्वं धनं मदन्तिके स्थास्यति । इत्थं तेजपालः श्रेष्ठी स्वमनसि विचार्य राजपुत्रीं रत्नवतीं प्रोवाच– हे सुन्दराङ्गि ? यस्त्वया परिणीतः सनरस्तुमया कारागृहे निक्षिप्तोऽस्ति, तञ्चश्वस्तनादिने वारिधौ पातयिष्यामि, इतश्चतुर्भिर्दिवसैरिदं प्रवहणं तीरं गमिष्यति । इति वज्रायमाणं महेभ्यवचनं निशम्य सा राजकन्या तस्मै भृशं चुकोप । तथापि तस्य वशवर्त्तित्वादुपायशून्या सा शान्ताकारा निजचातुर्येण कामपि युक्तिं विशोध्य श्रेष्ठिनं प्रत्युवाच–महेभ्याग्रणीः ? अयंपुरुषो भवता बन्दीकृतोऽस्तीति पूर्वमह-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मज्ञास्यश्चेन्मदीयं जीवितमेतस्याधीनं नाकरिष्यम् । परं दैवगतिः केनाऽपिनोल्लङ्घ्यते । इदानीं मयिकृपांविधाय मदीयामेकां प्रार्थनां स्वीकुरु । यदाऽयंपोतः पयोनिधेस्तटं प्रयाति तदाऽयं कारावासस्थितो नरस्त्वया सागरान्तर्निक्षेप्यः, यतश्चतुर्भिर्वासरै-रधिकंममसौभाग्यं वर्द्धते । एतावन्मदुक्तं वचनं भवतापरिपाल्यताम् । एतेन तव महान्तमुपकारंमन्स्ये । श्रेष्ठ्यपि तस्याः कन्यकाया वचनं प्रमाणीकृत्य तथैवाऽकरोत् । अथ रत्नवती तेजपालमनोगतं सर्वं पापं जानातिस्म । अनेन कुमारेण यदुक्तं तत्सत्यमेवप्रतीयते, अस्यमहेभ्यस्यहृदयं मलीमसमेव विद्यते । आस्तां खल्वेतत्, परमधुनाऽस्य कुमारस्य संरक्षणार्थंमया कोऽप्युपायोविधेयः, इति विचार्य सा रत्नवती स्वकीयाविद्याप्रभावेणैकां पेटांविनिर्माय तन्मध्ये निजपतिं सुगुणसिंहं स्थापयित्वा तांमुद्रिताञ्चकार । ततः स्वविद्याबलेनैकं महामत्स्यमाजुहाव । मन्त्राकृष्टं तत्र समायातं तं मीनं सा कथयामास–महामीन ? इमां मञ्जूषामहं जलधौ क्षिपामि सात्वया निजजीवितमिव स्वजठरे रक्षणीया, यदा चाऽहमेतां मार्गयामि तदा त्वयाऽसावक्षतैव मह्यं पश्चादर्पणीया । इत्थं तंमीनं प्रबोध्य रत्नवती पतिगर्भां पेटां प्रच्छन्नतया वारिधौ निचिक्षेप । मीनोऽपि निपतन्तीं तांमञ्जूषां स्वमुखेनिधाय गुप्तसञ्चारो निजमार्गं प्रययौ । अथ निजचरितं गोपयन्ती रत्नवती श्रेष्ठिनं जगाद–हे महेभ्य ? तव हितमिच्छन्त्यामया कारागृहस्थितो यः पुरुषः स जलनिधौ प्रक्षिप्तः । इति रत्नवत्या भणितं वचनं सत्यं मन्यमानः श्रेष्ठी भूरिप्रमोदं बिभ्रत्स्वचेतसिसिद्धं स्वकार्यमित्यमन्यत । अहो ? मदीया भाग्यरेखा बलीयसी । यतो मत्कृत्यमनयैव-निष्पादितमिति विचिन्तयतस्तस्य तत्प्रवहणं जलधेस्तीरमियाय । ततः प्रमुदितमनास्तेजपालस्तत्र स्थिरीकृतात्तस्मात्प्र-वहणात्सद्यः समुत्तीर्य महानन्दोदधौ निमग्नः सारतराणि वस्त्राभरणानि स्वयं परिधाय कतिचिदनर्घ्याणि रत्नानि दीव्य-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





रूपांतां कन्याञ्च सार्द्धं गृहीत्वा निजनरेशितुः प्राभृतीकरणाय राजमन्दिरं गन्तुं निरगात् । तदानीं निजभृत्यानिति समादिशत्–प्रवहणसंस्थितं सर्वं धनादिकं स्वकोष्ठागारे यूयं प्रक्षिपत । सदसिस्थितो नृपतिश्चिरं समायान्तं तेजपालं समवलोक्य परमसन्तोषमवाप, श्रेष्ठ्यपि विनयपूर्वकं विहितप्रणतिर्निजोचितस्थानमलञ्चकार । भूपतिना कुशलोदन्तं पृष्टो महेभ्योऽवदत् नरनाथ ? भवतः कृपाकटाक्षैः सर्वथा मे निरामयमस्ति, पुनरपि स जगाद–भूपते ! युष्मन्महिष्याः कृते हृदयङ्गमानि जात्यरत्नानि मया समानीतानि, इत्यभिधाय कियन्ति रत्नानि भूपतेरग्रेढौकितानि, इयञ्चैका राजकन्यासमानीता रूपगुणकलाभिर्विराजिता भवद्योग्यावर्त्तते । इत्थंव्यवहारिणोवचनं श्रुत्वा भूपतिस्तांकन्यामपश्यत् । तदानीं सा कन्यापिलज्जां नाटयन्ती मनाक् कटाक्षविभ्रमेण नृपतिमसूचयत् । ततो भूपतिरपि ज्ञाततदीयसङ्केतः सत्वरं समुत्थायरहसिजगाम । सा कन्याऽपि भूपतेरनुपदं गत्वा निजभर्त्तुःसकलवृत्तान्तसूचकमेकं पूर्वलिखितंपत्रं तदग्रे मुक्त्वा कथयतिस्म–महाराज ! इदं पत्रं रहसि स्थित्वा भवान्वाचयत्वितिममाभ्यर्थना सफलीक्रियताम् । अथ भूपतिस्तत्पत्रं समादायापवर्के गत्वा स्वयं वाचयतिस्म । तत्र स्वभ्रातुः सुगुणसिंहस्याभिधानं ज्ञात्वा तथाऽन्यदपि तत्सम्बन्धि वृत्तान्तं तेजपालश्रेष्ठिना विहितोपद्रवांश्च विज्ञाय साऽश्रुलोचनो भूपतिः स्वोपकारविधायिनं स्वकीयं लघुबन्धुं मिलितुं भृशमुत्सुकोऽभवत् । परं तत्पत्रवाचनेनैव तेन विज्ञातम्, अनेनश्रेष्ठिना मेभ्राता जलधौ पातित इति । अथैतत्पत्रवाचनेन सञ्जातप्रचण्डकोपः स नरपतिस्तेजपालस्य मुखमप्यनिरीक्ष्यतद्गृहाद्दकोष्ठागारादीनि सर्वाणि वस्तून्यात्मसात्कृत्वा तञ्च कारागृहवर्त्तिनं चकार । ततो मृषा राक्षसीवधनिवेदकान् तृणहारिणः स्वभृत्यानपि तथाऽशिक्षयत्, येन समस्ते नगरे जनमुखेषु महान्कोलाहलोऽजनिष्ट । भ्रातृदुःखेन दुःखितः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कनकसिंहस्तां कन्यामुवाच–हे बाले ! दुहितृकल्पां त्वामहं जानामि, मद्विषयेत्वया काऽप्यधृतिर्मनसि नविधेया । मृते भ्रातरि दुःसहपीडया ममहृदयं द्विधा विदीर्यते। तज्जन्यशोकशल्येन जर्जरीभूतं मदीयमिदं कलेवरं चिरंनस्थास्यति । तस्मादिदं राज्यादिकं सर्वं तुभ्यं प्रदाय गुणसुन्दरीभार्यासमेतोऽहं दुःखनिर्जरायैतीर्थाटनं कर्त्तुंव्रजामि । इत्थं नृपतेर्वचनं निशम्य राजसुता जगाद–भूमिपाल ! धैर्यं समाधत्स्व, धर्मसहायेन सर्वं शुभं भविष्यति, सत्वरं स्यन्दनं सज्जीकृत्य मया साकंभवान्समागच्छतु, येन जलधेस्तटं गत्वामद्विद्याबलेनाहं तव भ्रातरं जीवन्तं दर्शयिष्यामि, चिरंवियोगिनो वयं सर्वे परस्परमीलनेन सुखिनो भविष्यामः । इति राजसुतावचनं समाकर्ण्य लब्धसर्वस्व इव कञ्चनसिंहः सहसा रथं समानाय्यरत्नवत्या सह स्वयं तत्रोपविश्य जलधेस्तटं जगाम । ततो रत्नवती रथादुत्तीर्य पयोधेर्जानुदघ्नेवारिणि गत्वा निजविद्याबलेन तंमीनमाह्वयतिस्म। तदानीं स मत्स्योऽपि तीरमागत्य चिरकालसंरक्षितां मञ्जूषां रत्नवत्यै दत्त्वा स्वस्थानं प्रययौ। ततोरत्नवत्या कनकसिंहो भणितः– राजन् ! इमांमञ्जूषामुद्घाटय कनकसिंहेनाऽपि सा समुद्घाटिता, तस्यांसन्निविष्टस्य निजबन्धोः सुगुणसिंहस्य दर्शनादमन्दानन्दं स बभार । भूयसा प्रेम्णा मुहुस्तं समालिलिङ्ग, मिथः सुखदुःखवार्त्तां प्रकुर्वन्तौ भ्रातरौ रथोपविष्टौ निजप्रासादमीयतुः । ततः कनकसिंहस्तेजपालमहेभ्यं तृणाहारकान्स्वसेवकांश्च निजदेशान्निष्कासयामास । सुगुणसिंहस्य सेवाविधायिनं यक्षपूजकं च प्रभूतद्रव्यप्रदानेन प्रीणयतिस्म । ततस्तावुभौ भ्रातरौ मिथः प्रेमाविर्भावेन धृतप्रमोदौ दिनानि गमयामासतुः। इति भणित्वा शीलवती निजपतिमवोचत्–हे स्वामिन् ! अस्य वृत्तान्तस्य यः सारोऽवश्यग्राह्योऽस्ति स भवता गृहीत एव भविष्यतीति मन्ये, तस्मात्सांप्रतं सुखेन यथाभिलाषं गमनं त्वयाविधीयताम् । इत्थं शीलवत्याऽनुमतोऽजितसेनो निजान्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मन्त्रिवर्गपरिकरितेन भूपतिनासाकं प्राचलत् । यथोष्णरश्मिं गगनाङ्गणस्थं, बुधोऽनुयाति प्रखरप्रभावम् । प्रधानवर्गोऽपि तथा स्वकीय-भूमीपतेः सन्निधितां भजन्ति ॥ १ ॥ अथवर्त्मनिव्रजन्नृपतिर्निर्जलकुसुमाभिधाने प्रदेशे समागत्याजितसेन-पार्श्वेतद्भार्यया प्रदत्तंदीव्यं कुसुममपश्यत् । तच्च सरोजं सद्यो जलादुदुद्धृतमिव प्रफुल्लतरमासीत् । तद्विलोक्यनृपतिः स्वचेतसि चिन्तयितुं लग्नः, अस्मिन्निर्जलप्रदेशे कमलस्यनामाऽपि दुर्लभमस्ति, कस्मादिदं कमलमिह समागतम्, तच्छुद्धिश्चावश्यतया-मया विधातव्येति विचारयन्नजितसेनं निजान्तिकेसमाहूय तत्कमलवृन्तान्तं पृच्छतिस्म-सोऽपि भूपतये यथास्थितं तद्वृत्तान्तं कथयतिस्म । ततोऽजितसेनोक्तं वचनं निशम्य भूपतिस्तद्वचनमसत्यं मन्यमानोऽभव्य इवाश्रद्दधानः सन्नवोचत्-रे प्रधान ? ईदृशमसंभाव्यमिदंत्वदीयं वचनं कथं सत्यं मन्ये ? इत्थमजितसेनमभिधाय कपटजालैकरचनायां लब्ध-नैपुण्यां स्वकीयां प्रधानचतुष्टयीं रहसि समाकार्य तत्कमलवृत्तान्तं तेन न्यवेदि, किं तत्सत्यं ज्ञातव्यं वा वितथम् ? प्रधानाः प्रोचुः-नृपते ? तद्भार्यया शीलवत्याऽजितसेनो वञ्चित एवाऽस्ति । यतोऽस्मिँल्लोके विशुद्धशीलपालनी तादृशी भार्याकुतः संभाव्यते ? याहि जन्मतः प्रारभ्य मुग्धाविशुद्धस्नेहधारिणी मेधाविनी पातालसुन्दरी पतिव्रतानां धुरिकीर्त्तनीया समभूत्, साऽपि विशिष्टप्रज्ञं प्रेमवन्तं जयवन्तसेननामानं भूपतिं प्रतारयतिस्म, तर्ह्यन्यासां प्रमदानां वचसिकुतो विश्वासो भवेत् ? इत्थं निजप्रधानगदितं वचनं समाकर्ण्य तद्वार्त्ताश्रवणे समुत्सुको नृपतिस्तानपृच्छत्-केयंपातालसुन्दरी ? तया च स्वपतिः कथं वञ्चितः ? तद्वृत्तान्तं ब्रूथ । एवं नृपतेः प्रश्नं श्रुत्वा चतुर्णामेको ज्यायान्मन्त्री बभाषे-नरनाथ ? मदुक्तं वृत्तान्तं सावधानतया शृणुष्व । सर्वसम्पदामेकं विशालं चैत्रमिव न्यायरत्नानामद्वितीयं निवासस्थानं दुर्वारवैरिवाराणांदुर्भेदनीयेन



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नभस्तलस्पर्शिना महोन्नतेन प्राकारेण परिवेष्टितं सजलपरिखयाविभ्राजितं चितितिलकं विशालशालं विशालपुरं नाम नगरं समस्ति । तत्र सकलकलाकलापेषु निपुणमतिर्निजभुजौजसा निर्जिताखिलवैरिवर्गोदिगन्तविश्रान्तकीर्त्तिनिकरः सुभट-शिरोमणिर्जयवन्तसेननामा भूपतिःप्रजाःपालयन्राज्यं करोति । सचैकदा प्रभूतैश्वर्यविराजितपरिवारवर्गपरिकरितः सदसि सिंहासनोपविष्टः सभ्यान्नरान्प्रत्यवदत्—हे सभ्याः ? अस्मिन्भुवने काऽपिकलैतादृशीविद्यते ? यामहंनजानामि ? तदसंभा-व्यमपि नृपवचनं निशम्य तत्रस्थिताः सर्वजनास्तंप्रोचुः—राजन् ? भवान्सर्वकलानां पारदृश्वाऽस्तीतिकोनवेत्ति । तदानीं सत्यवक्ता धृतधैर्यः कश्चिन्नरोऽभाषिष्ट—नरेश्वर ? भवान्सर्वासुकलासु पारगामीदृश्यते, परन्त्वेकं स्त्रीचरित्रं त्वं नजानासि। यतो ये देवासुरान् निजमन्त्रविद्याबलेन वशीकुर्वन्ति, ते सिद्धमन्त्राअपिनराः स्त्रीचरित्रेभ्योदूरंपलायन्ते । वारिणिव्रजतां प्राणिनांचरणविन्यासान्विज्ञातुंकेऽपि समर्थाभवन्ति, व्योम्निडयमानानांगरुत्मतां चरणश्रेणींगणयितुंशक्तिमन्तो बहवोविद्यन्ते। तथाऽपि स्त्रीहृदयचेष्टितं विज्ञातुंलोकत्रयेऽपिकोऽपिचमोनाऽस्ति । उक्तश्चान्यत्र—अश्वप्लुतं माधवगर्जितञ्च स्त्रीणांचरित्रं पुरुषस्य भाग्यम् । अवर्षणां चाप्यतिवर्षणञ्च, देवानजानन्तिकुतोमनुष्याः ॥ १ ॥ राष्ट्रस्यचित्तंकृपणस्यवित्तं, मनोरथंदुर्जनमानुषाणाम् । स्त्रियश्चरित्रं पुरुषस्यभाग्यं, देवोनजानातिकुतोमनुष्यः ॥ २ ॥ ईदृग्विधानितस्य सत्यवादिनोवचांसि समाकर्ण्यभूपतिः शिरः कम्पयन्विचारमग्नोबभूव । अनेन पुरुषेण यदुक्तं तत्सत्यमेव विज्ञायते । यतः स्त्रीणां गूढान्येवमनांसिविद्यन्ते । तस्मान्ममान्तः-पुरवर्त्तिन्यः सर्वाःप्रमदाःपतिव्रतपरायणा भवन्तीति न संभाव्यते । इत्थं विशङ्कमानःस पुनःस्वचेतसिव्यचिन्तयत्—यन्निर्मल-शीलधारिण्या भार्ययासाकमेवसाद्धिः संयोगोविधातव्योनाऽन्यया, तर्हिसाम्प्रतं मयाकिं कर्त्तव्यमितिविकल्पयन्सनिजमनसीति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





निश्चयमकार्षीत्, कस्यचिद्राज्ञो जातमात्रां पुत्रींपरिणीयताश्चभूमिगृहे संरक्ष्य प्राप्तयौवनया तयासार्द्धंभोगविलासः कार्यः। प्रायेण स्त्रीणां पुरुषाणाञ्चानार्यसंगमादेवदोषाः समुद्भवन्ति। भूगृहान्तर्वासेनकस्याऽपि जनस्यसङ्गमन्तराकुतो दोषापत्तिर्भविष्यति ? एवंसुदृढंनिश्चित्यभूपतिः स्वकीयान्सेवकान्समाहूय कामपिनिजयोग्यां भूपकन्यामानेतुंदेशान्तरंप्रैषीत्। नृपाज्ञांगृहीत्वासत्त्वर प्रयाणंकुर्वाणा राजभृत्याः सुरूपां सद्योजातामेकां राजपुत्रीं समादायस्वस्वामिनेसमर्पयामासुः। ततः सनृपतिरपितयाबालयासह लग्नंविधाय निजप्रासादस्यभूगृहान्तरेतां स्थापयतिस्म। तस्याः संरक्षणार्थञ्चैकांधात्रीममुचत्। प्रतिदिनं पाल्यमाना सावृद्धिमियाय। तदा भूपतिस्तांधात्रीं भूगृहाद्बहिः समाहूयेति समादिशत्—अतःपरंतस्याबालायाः केशप्रमार्जनार्थं वस्त्रादीनाञ्चपरिधापनार्थमेवत्वयाभूगृहान्तरे गन्तव्यम्। तया सार्द्धंवचनमात्रमपि नवक्तव्यमिति मदाज्ञाऽद्यारभ्यत्वया पालनीया। अथ प्राप्तयौवना सा बालाबभूव, तदातांधात्रीमपितत्रव्रजन्तीं स न्यषेधयत्। तस्याश्चाभिधानं पातालसुन्दरीति राज्ञाविनिर्मितम्। यतः सा भूमिगृहान्तरे स्थित्वावृद्धिंजगाम। रूपलावण्याभ्यांनिर्जितनागकन्याकान्तिरासीत्तस्माद्यथार्थनामधारिणीसाविरेजे। अथाजन्मशुद्धया पतिभक्तौदृढतररागशालिन्या तयासहमोदमानः स भूपतिर्विविधान्भोगान्बुभुजे। सा पातालसुन्दरी परपुरुषस्यमुखमपिनैक्षिष्ट। अत एवैषा सर्वथाविशुद्धशीलधारिणी पतिव्रतैकचूडामणिरस्तीतितां मन्वानोभूपतिस्तस्मिन्भूमिगृहेबहुधा न्यवसत्। यदानिजोचितमावश्यकं कार्यंभवेत्तदैवसबहिरायाति। अथान्यदानिजकान्त्या निर्जितमन्मथरूपो बहुभिर्जनैः परिवेष्टितोऽनेकविधवस्तुजातसमन्वितोऽनङ्गदेवाख्यः कश्चित्सार्थवाहकोमणिद्वीपात्तत्रसमागतः। यस्मिन्नगरेयः प्रधानःस प्रसादयितव्य इतिध्यात्वा स श्रेष्ठीनिजान्तिकादामलकस्थूलानामनर्घ्याणांमौक्तिकानामस्मिँल्लोके दुर्लभानामेकं मनोहरं हारमपराणि च सारभूतानि वस्तू-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निगृहीत्वा तन्नगराधिपतेः सन्निधौगत्वा प्रणिपातंविधाय तत्सर्वंप्राभृतीचकार। तद्वस्तुनिरीक्षणेनराजा स्वयं सन्तुष्यतस्यानङ्गदेवव्यवहारिणः शुल्कं न ग्राह्यमिति निजाधिकारिणो नरानाज्ञापयत्। ततः सव्यवहारी मणिमौक्तिकप्रवालसुवर्णप्रमुखानि सकलानि सारवस्तूनि विक्रीय कोटिधनानामधिपोऽजनिष्ट। स्वनिवासहेतोर्मणिमयमेकं प्रवरं प्रासादं पटुभिः शिल्पिभिरकारयत्। इतोनृपतेश्चामरधारिणी कामपताकाभिधाना तर्जितदेवाङ्गनाकान्तिर्गणिका तस्मिन्नगरे बभूव। प्रभूतं धनं दत्त्वातां स्ववशवर्त्तिनीं विधायतयासाकं सोऽनङ्गदेवो यथेष्टं विषयसुखमनुबभूव। अथैकस्मिन्दिवसेऽनङ्गदेवोऽवकाशमधिगम्य-कामपताकामपृच्छत्–वामोरु! अस्यनगरस्याधिपतिः सदान्यायसभायां यथासमयं नागच्छति, जातुचिदायातिचेत्सत्वरं समुत्थाय स्वालयंव्रजति, तस्यमनसः स्थैर्यंसुष्ठु न दृश्यते। स्वयंद्यूतादिव्यसनेषु पराङ्मुखोदृश्यते। तथैव परस्त्रियं मातृसमांगणयति। तथापि तस्य नृपतेर्हृदयं व्यग्रतरं कथं लक्ष्यते? इत्थमनङ्गदेवस्य वचनं निशम्यगणिकाप्रोवाच–नरोत्तम! भवतः प्रश्नस्योत्तरन्त्वहं न जानामि, परन्त्वेतावद्वृत्तान्तमहंवेद्मि, तद्यथा–अस्यपत्तनस्याधिपतिः शुद्धान्तवर्त्तिनीषु श्रेष्ठतमया कयाचिदेकयाराज्ञ्याविमोहितः सन्नहर्दिवंतिष्ठति, तामेवस्त्रियंस्वसन्निधौराजारक्षति, तांकदाचिदपिभूमिगृहाद्बहिर्निष्कासयति। यतः सापरपुरुषं न विलोकयति। स्वयञ्चतया सह विषयसुखं यथाभिलाषं भुनक्ति। भूपतिस्तां कन्यां जातमात्रां परिणीय तत्कालमारभ्याद्यावधि भूमिगृहे रक्षितवान्। इत्थं गणिकोक्तवचनानि समाकर्ण्य पटुबुद्धिरनङ्गदेवः स्वचेतसिव्यचिन्तयत्–यास्त्रीजगच्चक्षुः सूर्यमप्यस्तोदितं न जानाति, सर्वाणि राज्यकार्याणि सन्त्यज्यस्वयं नृपतिश्चसर्वदा यस्याःसान्निध्यं न विमुञ्चति तर्हिंसाऽङ्गनाकीदृशीभविष्यति? यस्यादर्शनमपि दुर्लभं तदातत्स्पर्शनं तु कुतो लभ्यते। एवं कामग्रहगृहीतचित्तो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





विषयोपहतहृदयोऽनङ्गदेवः पातालसुन्दर्याः संमीलनोपायं चिन्तयतिस्म, यतोयस्याः संयोगोदुर्लभः सा प्रमदा कामिनोहृदयं रतिसुखेन सम्यक्प्रीणयति । तस्माद्विशेषतो मनसश्चापल्यं विबुधजनैर्निवारणीयम् । इतः स व्यवहारी मनोरथं सफलयितुं भूयो भूपतेर्बहूनि प्राभृतानिचक्रे, एवंमुहुः सत्क्रियादिभिस्तेन नृपतिर्वशीकृतः । यतः–दानेन मानेन समर्चनेन, स्तवेन सम्यग्विनयेन देवाः । भवन्ति तुष्टा अपि भूपतीनां, लोभप्रियाणां किमुवाच्यमत्र ॥१॥ ततः स सार्थवाहोनृपतेरन्तः पुरेऽपि निःशङ्कतयागमनागमनंकरोति, तथापि तं कोऽपिन निवारयति। अथान्यदा सव्यवहारी तद्भूगृहस्य सर्वस्थानं विलोक्य स्वगृहमागत्यनिजहितानुकारिभिर्जनैः प्रच्छन्नतयानिजगृहादारभ्यभूपतेर्भूगृहपर्यन्तं सुरङ्गमेकं कारयामास । तस्यभूगृहस्यभित्तौ गुप्तयन्त्रश्चविधापयामास । सच गुप्तबिलमार्गः साक्षान्नरकाध्वेव समभूत् । अथान्येद्युः स सार्थवाहस्तेन सुरङ्गमार्गेणसमागत्यभूगृहस्यभित्तौ तस्थिवान् । यावन्नृपतिः पातालसुन्दर्याः पार्श्वाद्बहिर्याति, तावद्धृतधैर्यः सार्थाधिपतिर्झटिति यन्त्रद्वारेणभूगृहं प्रविश्य सुखशयनेसुप्तांनिद्रायमाणां पातालसुन्दरीं कामाङ्गनासदृशीं विलोक्यनिजचेतसि विचारयतिस्म । अहो ? निजरूपेण निर्जितनागकन्यालावण्या नृपाङ्गार्धधारिणी सुभगेयं लोकेधन्यतमावर्त्तते । आजन्मतः सुनिर्मलशीलधारिणी क्षत्रियकुलसमुद्भुताऽसौवराङ्गना मदुक्तानिन्यायहीनानि वचनानि कथं सहिष्यते ? अस्याश्चहृदयंकीदृग्विधमस्तीति कथं ज्ञायते मया ? इत्थं निजमनसि वितर्कयन्सव्यवहारी पातालसुन्दरींशनैर्विबोध्यसुभाषितैर्वचनैर्वार्त्तयतिस्म, तस्मिन्नेवक्षणेसञ्जातकौतुका सा प्रफुल्लमानसासमभूत् । चिरकालेन सञ्जातपरिचया वधूरिव सा तेन सार्द्धंहास्यविनोदान्समाचरन्ती रतिसुखमपिसुखेन भुनक्तिस्म । अहह ? विलोक्यतामनादिभवस्यायमभ्यासः केनाऽत्र समादिष्टः ? जीवस्यैतादृशः स्वभावः, यतोरागद्वेषकषायाहारभयरोदन-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निद्रामैथुनप्रमुखानि व्यसनान्यदृष्टाश्रुतान्यपि जन्मान्तराभ्यासवशतोजीवः प्रतिपद्यते। तद्यथा—भवान्तरं प्राप्य स एव जीवः, पूर्वार्जितेनाऽपिनिजेन कर्मणा। नियोजितोऽदृष्टमपूर्वमश्रुतं, भावं विजानाति निजौकसीव ॥ १ ॥ अथैवं स्वचेतसि विशङ्कमानः स व्यवहारी तयासाकं विषयसुखानि सुखेन परिशीलयतिस्म। ततस्तावुभौमिथोमिलित्वा सङ्केतं विधाय सुरङ्गमार्गेचैकां रज्जूं गमनागननहेतवेबबन्धतुः। यदा नृपतिर्भूगृहाद्बहिर्याति तदासापातालसुन्दरीतां रज्जूं सञ्चालयति, तेन रज्जूप्रयोगेण ज्ञातसङ्केतोऽनङ्गदेवः सद्यस्तत्रसमेति। एवं प्रत्यहं स सार्थवाहोनिर्षादवद्गमनागमनमकार्षीत्। पातालसुन्दरीञ्च भोगविलासैः प्रीणयतिस्म। अथैवं सानारी महाधूर्त्ताविद्यते, तथापि निजभर्त्तारं पतिव्रतात्वं निजमखण्डितं दर्शयति। अहो! स्त्रीणां चातुर्यकीदृशम्?--अबलानां चरित्रस्य, मर्यादानैवविद्यते। यदीयकूटभावानां, ब्रह्माऽप्यन्तं न गच्छति ॥१॥ अथान्येद्युः पातालसुन्दरीतमनङ्गदेवमाचख्यौ—व्यवहारिन्! मयि विद्यमानायांत्वं किञ्चिदपि भयं मा शङ्कस्व, मां त्वद्गृहंनय, सर्वांनगरशोभांमांदर्शय। इत्थं पुनःपुनस्तयाप्रोच्यमानः सार्थवाहः स्वमनसि भयंदधानोऽपि प्रेमवशात्तद्वचनंनिषेद्धुमक्षमस्तां निजगृहंनिनाय। सकलां नगरशोभां च राज्ञीं सदर्शयामास। ततोऽन्यदापातालसुन्दरी निजसहचरस्य वेश्मनोगवाक्षे सन्निविष्टा नगरचर्यामद्राक्षीत्, तस्मिन्समये बहुपरिजनसमन्वितं वनवाटिकायां विश्रामार्थं व्रजन्तं भूपतिं निरीक्ष्य सा निजचेतसि व्यचिन्तयत्—अहो! अयं नृपतिः स्वयमेवं विविधं क्रीडासुखं सम्पादयति। मान्तुजन्मतः प्रारभ्याद्यावधि भूगृहान्तरेकारासदनोपमेरक्षति। एवं विकल्पयन्ती सा नृपतेः सकाशाद्विरक्ता सतीतमनङ्गदेवमित्यवोचत्—सार्थवाह! अनेन भूपतिनाहं भूगृहात्मके कारागृहे क्षिप्ताऽस्मि शीलव्रतसंरक्षणाय। अतस्तंनृपतिं मदीयांशीलविशुद्धिं दर्शयामि। तस्मात्त्वं कपटभावेन रुजार्जितोभव. मन्दी-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





भूतस्य तव वृत्तान्तं सर्वत्रनगरे प्रसरिष्यति। ततः स्वस्थीभूय त्वंस्ववेश्मनि भोजनार्थं भूपतिं निमन्त्रयस्व। तदानीमहं रसवर्ती परिवेषमाणा नृपतिं चमत्कारं दर्शयामि। ईदृशं पातालसुन्दर्या वाक्यं निशम्य व्यवहारीतांजगाद्–मृगलोचने! इदृशीं लोकविरुद्धाऽनीतिर्मया कथं क्रियते? भूपतिश्चकेनप्रकारेण निमन्त्र्यते? त्वञ्चनृपतेः सन्निधौरसवत्याः परिवेषणं कथं करिष्यसि? इदं प्रत्यक्षविरुद्धंकार्यं सर्वथाऽनाचरणीयं विद्यते। इत्थं तद्वणिग्वचनं निशम्य पातालसुन्दरीबभाषे–वणिग्जातिः प्रकृत्यैवभीरुर्विद्यते, भयमन्तरेणाऽपि सदाभयमेव चिन्तयति। यतः–क्षत्रियाभयमालोक्य, शौर्यमादधतेस्वतः। भयेऽप्य-नागतेभीरु–र्वणिग्जातिर्हि कम्पते ॥ १ ॥ श्रेष्ठिन्! त्वमस्माकं चरित्रं न जानासि, स्त्रीजातिरहमस्मि। साक्षादिन्द्रोऽपि मया प्रतार्यतेचेदस्यमहीपतेर्मुधापाण्डितमानिनः कियत्सामर्थ्यं मदग्रे? तस्मात्त्वं निःशङ्कमनामदीयं वचनमङ्गीकुरु, किमधिकजल्पनेन? यदित्वं मदुक्तंवचनं नपालयिष्यसितर्हि त्वां जीवन्तं किं मोक्ष्यामीति पातालसुन्दर्यावचनं निशम्यभयसंत्रस्तगात्रोऽनङ्गदेवस्तत्क्षणं तदुक्तवार्त्तां स्वीचकार। भयार्त्तोजनः किं न करोति? ततोऽनङ्गदेवश्चिरंमन्दप्रकृत्यास्थित्वापुनर्मुधौषधाद्युपचारेण क्रमतः स्वस्थीभूय भोजनसामग्रींप्रगुणीचकार। निजकौटुम्बिकान् समाहूय भोजनदिनं निर्णयामास। भोजनदिने प्रातः समुत्थाय गृहीतप्राभृतः स नृपान्तिकंगत्वा विज्ञपयामास–नरनायक? प्रभूतेन रोगेण पीडितोऽहं मृततुल्योऽभूवम्। अधुना भवतः प्रसादेन लब्धस्वास्थ्योजातोऽस्मि। तस्मादस्मिन्वासरेमद्गृहेभोजनोत्सवोवर्त्तते, अतो भवान्सकुटुम्बः समागत्यमांकृतार्थं करोतु। एवं स बह्वाग्रहेण भूपतिना भोजननिमन्त्रणं स्वीकारयामास। ततो भोजनावसरे जाते सपरिवारो नृपतिः श्रेष्ठिनोगृहंप्रययौ, तदानीं श्रेष्ठी स्वयमेव भूरिसत्कारपुरःसरं राजानं प्रवरासनेस्थापयित्वा सर्वां व्यवस्थांकारयामास। ततोविधृतसारनेपथ्याऽल-



For Private And Personal Use Only

ङ्कारैर्विभूषिता पातालसुन्दरी विविधानि भोज्यवस्तूनि परिवेषयन्ती निजचातुर्यकलां भूपतिं दर्शयामास । अहो ! स्त्रीजातेः कीदृशं धूर्त्तत्वम् ! अथ नृपोऽपि भोजनं कुर्वाणो निजभार्यां पातालसुन्दरीं विलोक्य संजातविस्मयो व्यचिन्तयत्–अहो ? भूमिगृहस्थिताऽसौकथमत्र समायाता ? अथवा नैषा पातालसुन्दरी, तत्समानाकृतयः किमन्या रमण्यो न भवेयुः ? मदीयोऽयं भ्रमोऽस्ति, सा वराक्यत्रकुतः समायाति ? इदानीमेवाहं तदन्तिकादागतोऽस्मि । सा च जन्मतः प्रारभ्य सरलभावा विद्यते । तस्मान्मत्पत्नीयं नास्ति । इयन्तु भार्याऽस्य सार्थवाहस्यैवविद्यते । तथाऽपि चातुर्यादिगुणैस्तु तामियमनुकरोति, रूपादिसंपत्त्याऽपि तादृश्येवासौ दृश्यते, किञ्चिन्मात्रोऽपि विभेदो न विलोक्यते। मत्पत्न्या अस्याश्चोभयोः सादृश्यंकथं युज्यते ? अस्य वृत्तान्तस्ययथार्थं स्वरूपं को जानाति ? अस्यनिर्णयमपि कोविदध्यात् ? इत्थं स्वचेतसि विचार्य तस्या अभिज्ञानार्थं धूर्त्तैकशिरोमणिः सा पातालसुन्दरी परिवेष्य यावन्महानसं प्रयातितावत्तेन भूपतिना तस्या वस्त्राञ्चले सर्पिषोबिन्दुरपाति । तद्घृतबिन्दुनादूषितं निजवसनंविलोक्य सा मनसि व्यचिन्तयत्–रे भूधव ? मन्मुखाग्रे तवविज्ञानं कियन्मात्रम् ? शुद्धशीलां मां परीक्षितुं भवता घृतबिन्दुनिक्षेपोविहितोऽस्तीति स्वमनसि गर्वं वहमाना सा तालव्यजनं गृहीत्वा वीजयन्ती स्वभर्त्तारमवोचत्–धरापते ? महोग्रविषकवलितामिव कथमिदं स्वादुतरान्नं नाऽश्नासि ? इदं भोजनान्नन्तु सुखेनस्वादनीयं वर्त्तते, तथाऽप्येतद्भोज्यान्नं वणिजः समस्ति, अतो राजकुलोद्भवाय भवते कथं रोचते ? किं वा नराधीश ? अस्मदीयं गृहादिवैभवंनिरीक्ष्य चमत्कृतिं विदधता भवता शून्यचित्ततया किं न भक्ष्यते ? उत महतां जनानां स्वल्पतरैवक्षुधा भवेत्तस्मात्त्वं न भक्षयसि । इत्थं मधुरोक्तिं समुद्गिरन्ती सा स्वकीयचातुर्यकलां दर्शयतिस्म। अहो ? कीदृग्विधोऽस्या धूर्त्तायाश्चेष्टाप्रपञ्चः ? सुरक्षिताऽपि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



युवतिरक्षतस्नेहा न भवति। तद्यथा—

शास्त्रं सुनिश्चितधियापरिचिन्तनीय-माराधितोऽपि नृपतिः परिशङ्कनीयः। आत्मीकृताऽपि युवतिः परिरक्षणीया, शास्त्रे नृपेचयुवतौच कुतः स्थिरत्वम् ॥१॥ ततः सभूपतिः शङ्कितमनाः संशयविस्मयाभ्यां समन्वितः सार्थवाहस्य भार्ययोः कपटचर्यां विलोकतेस्म। अनङ्गदेवोऽपि स्त्रीचरित्रं निरीक्ष्यस्मितमादधानो निजोचितांक्रियां समाचरत्। ततः पातालसुन्दरी सशर्करंदुग्धं-नृपतेर्यथारुचिपरिवेष्य गृहापवर्कामियाय। नृपतिरपितदुग्धंविषमिव विषमं मन्यमानो मुनिरिवधृतमौनो निःस्वादतया पिबतिस्म। ततः सार्थवाहः पूगीफलताम्बूलादिकं मुखवासंदत्त्वा महीधवंमहामूल्यैर्वसनाभरणैः सत्कृत्य सन्तोषयामास। अथ गृहीतसत्कारो नृपतिः परिजनपरिकरितः सत्वरंस्वप्रासादमगमत्। इतः पातालसुन्दर्यपि तद्वेषं परित्यज्य स्वकीयवस्त्राणि परिधायशीघ्रत-यासुरङ्गमार्गेण भूगृहंगत्वा स्वकीयशय्यायां निश्चिन्तमानसा सुष्वाप। अथ सञ्जातसन्देहो भूपतिः कुञ्चिकाः समादाय मुद्रितानि सर्वाणितालकानिसमुद्घाट्य भूगृहान्तरेसमागत्यविलोकयामास, यथापुराप्रसुप्तांविमुच्यनृपतिर्गतस्तथैवतदानीमपि निद्रितांतां ददर्श। ततो विस्मितमानसो भूपतिस्तामुत्थापयामास। साऽप्युज्जृम्भमाणा निद्रावस्थां व्यञ्जयन्ती समुत्तस्थौ। तां तथावस्थां विलोक्य नृपतिः स्वचेतसि व्यचिन्तयत्—वणिग्गृहे या प्रमदा मया व्यलोकि, सात्वपरैव, इत्थं स्वमनसि समाधाय तेन रत्नोल्लसितवस्त्राभूषणानि तस्यै तद्योग्यानि यथाभिलषितं प्रदत्तानि। यतस्तस्यां कूटकारिण्यां भार्यायांमनागपि दोषस्तेन न विलोकितः। अतस्तया साकं पूर्ववत्प्रेमभरं वहमानो नृपतिर्विषयसुखमनुबभूव। अहो ? धूर्त्तजनस्य चित्रंचरित्रन्तु धूर्त्तजना एव जानन्ति। यतो धूर्त्ताः सत्यस्यव्यलीकतामसत्यस्य सत्यताञ्च दर्शयित्वा मुग्धजनान्प्रतारयन्ति। अथैकस्मिन्दिवसे



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पातालसुन्दरी गर्वभावमावहन्ती तं सार्थवाहं सुप्रसन्नं विधाय कथयतिस्म–प्रियपते ? इदानींत्वं देशान्तरदिदृक्षया प्रयाणतत्परो भव। यतस्तत्रस्थितानि विविधानि कौतुकानि विलोक्य नेत्रसाफल्यं कुर्वः। तथाविधंतस्या वचनं निशम्य प्रत्युत्तरं दातुमक्षमः स प्रोवाच–नृपाज्ञां समादातुमहं गच्छामि, कदाचित् प्रजापालोऽस्मदीयमिमंवृत्तान्तं जानातिचेदावाभ्यां किं कर्त्तव्यम् ? ततः पातालसुन्दरी जगाद–वणिजः प्रकृत्यैव भीरवोविद्यन्ते, इति लौकिकोक्तिरधुनात्वया सत्यापिता । सार्थवाह ? इदानीं ममचातुर्यं त्वं विलोकय, तावत्त्वं प्रवहणानि प्रगुणानि कारयस्व। यैश्चावां सागरं समुल्लंङ्घ्य सत्त्वरं देशान्तरं व्रजाव। भवताऽत्रत्यः सकलोव्यापारः संकोच्यताम्। उद्धारकास्थितं यत्किमपिद्रव्यं तत्सर्वं स्वग्राह्यवस्त्वादिकं च परिगृह्य सज्जीभव। यदहं ब्रवीमितद्वचनंत्वयापालनीयम्, तथा करणेनतवशुभं भविष्यति। सर्वेभ्योव्यवहारबन्धनेभ्योमुक्तोभव। इत्थं तदीयामुक्तिं समाकर्ण्य साहसिककार्योद्यमात्पराङ्मुखोऽपि प्रभीतहृदयः सार्थवाहः कारागृहस्थित इव तद्वचनपाशेन निबद्धस्तया सार्द्धं प्रयातुं सज्जीबभूव। अहो ? कामिनीमुखनिरीक्षणे लोलुपानां नराधमानां जीवितं धिक्। यतो नरा बाल्यावस्थायां मातरं विलोकयन्ति, प्राप्तयौवनाः प्रमदाधीना भवन्ति, चरमावस्थायां च पुत्रादिपरिवारसुखं समीहन्ते, परन्त्वेते विमूढधियः स्वहित प्रेक्षणं जातुचिन्नकुर्वन्ति। यतः– इच्छानुसारिकुधियो विषयेषुरक्ता–जानन्ति नो स्वहितमुन्मथितस्वभावाः। कर्मानुसारिगतयो मनुजा लभन्ते, दुःखानि कालवशतः सुखसंपदश्च ॥ १ ॥ अथ पातालसुन्दरी तं सार्थवाहमुवाच–त्वंनृपतेः समीपंगत्वेति कथय, मम मातापितरौरुजार्जितौ स्तस्तस्मात्ताभ्यामहं सत्त्वरं समाकारितोऽस्मि, अतोऽहं तत्रजिगमिषया भवदाज्ञां समानेतुं समागतोऽस्मि। भवानिदानीं महान्तं प्रसादं विधाय मे प्रयाणस्याज्ञांददातु। प्रयाणावसरे च मां संभावयितुं भवता समागन्त-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्यम् । इत्थं पातालसुन्दर्या मृषोक्तिवादं निशम्यकिञ्चिदूनोऽपि सार्थवाहःसुविनीतः शिष्य इव तदुक्तं वचनं प्रमाणयन्नृपान्तिकं समागत्यप्रोवाच–पृथ्वीपाल ! ममभातापितरौचरमावस्थामनुभवन्तावधुना मरणाभिमुखौ सञ्जातौ, मद्वियोगजन्यदुःखेन भृशंदुःखार्त्तौतौमामाशु पत्रद्वारेण समाह्वयतः । अतो देवेन मय्यनुग्रहं विधाय गमनादेशः प्रदीयताम् । अस्मिन्नगरे निवसतामया भवतः प्रसादेन प्रभूतासमृद्धिः समुपार्जिताऽस्ति । त्वदुपकारमाजीवितान्तं प्रतिकर्त्तुमसमर्थोऽस्मि । इत्यनङ्गदेवस्य स्वदेशगमनसूचकं वचनं समाकर्ण्यनरपतिर्बभाषे–सार्थवाह ! भवादृशां सज्जनानांदुःसहवियोगजनक आदेशः कथं मयावितीर्यते ! निषेधोऽपि कथंक्रियते ? यतोमाव्रजेत्येवं यदिकथयामि तर्हिमङ्गलाभावंतद्वचनं द्योतयति, यदिचगच्छेतिब्रवीमि तदास्नेहविभङ्गद्योतकंवचनंभवेत्, स्थीयतामित्युक्तेच महत्त्वाप्रकाशकं वचनं निगद्यते, यथेच्छंविधीयतामित्यभिधानेनौदासीन्यं प्रतीयते, किञ्चेदानीमेवप्रयाणाज्ञां ददामीत्युक्त्या सोपचारं वचनं भवेत्, अतःप्रयाणाभिमुखं भवन्तं किमपि वक्तुं न समर्थोऽस्मि । यदि भवान् गन्तुमना अस्ति तर्हिमद्योग्यं किमपि कार्यं निवेद्य मां कृतार्थय, अधुना निवेदनीयंस्याच्चेत्तन्निवेदय, यदिवा पश्चान्निवेदनीयंतर्हिसुखेन पश्चाद्वक्तव्यम् । इत्थं नृपतिगदितांसुधासूक्तिं निशम्यसार्थवाहोजगाद–नरनाथ ! भवतो भूयस्या कृपया मम सर्वाणि कार्याणि सिद्धानिजातानि, तथापिभवान्सन्तुष्टश्चेन्ममप्रयाणावसरे जलधितटपर्यन्तं भवता समागन्तव्यम् । येन ममदिगन्तकीर्त्तिः प्रसरेत् । सर्वत्रलोकेनृपमान्यस्य जनस्य यशःसन्ततिर्विस्तारंप्रयाति । यतः–सन्मानमासाद्य नरेन्द्रदत्तं, पूजां लभन्तेत्र परांजनेषु । विनैव यत्नेन महोन्नतीनां, पदंसुलभ्यंमहतांप्रसादात् ॥ १ ॥ इत्येतत्सार्थवाहवचनं नरेश्वरेणाङ्गीचक्रे । अहो ? महतां प्रवृत्तिः कीदृशीभवतीतिविलोक्यताम्, यद्वचनमितरजनोवदति तत्प्रेम्णा ते प्रमाणयन्ति ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततःप्रमोदमेदुरसार्थवाहःशुभेमुहूर्त्तेबहूनि प्रवहणानिप्रभूतैःक्रयाणकैः संभृत्य प्रगुणीकृतवान् । स्वयंचशिबिकायामुपविश्य पयोधेस्तटप्रदेशं जगाम । तस्मिन्नवसरेनृपतिरपिनरवाहनं समारूढस्तत्रैवसपरिवारः समागात् । पातालसुन्दर्यपिशिबिकायामुपविश्य तत्रागत्य स्वकीयपुण्येन मदिष्टंकार्यंसञ्जातमितिबुद्ध्याप्रमदंधारयन्ती राजानं विहिताञ्जलिः प्रोवाच–धराधिप ! त्रिलोकनाथस्यमहान्प्रसादोऽस्मासुवर्त्तते, भवतश्चाऽपितथैवास्ति, त्वदनुग्रहेणैवमदीयः स्वामी प्रभूतांसम्पदमलभत । भवतःकृपाकटाक्षेणदुःसाध्यान्यपि कार्याणिसिद्धिप्रदान्यभूवन् । राजन् ! बहुमानावलेपेनाऽज्ञतया प्रमादाद्वात्वयिमनागप्यपराधाचरणंमया विहितश्चेत्तत्सर्वं भवताक्षन्तव्यम् । प्रभो ? भवतश्चरणोपासकानस्मान्मत्वा कस्मिन्नपिसमये स्मरणीया वयम् । विशेषतो वणिग्जातिंतुकः स्मरेत् ? परन्त्वेतावदस्माकं कथनमुचितमेवेत्युक्त्वा सा विरराम । अहो ! पांसुलाया धाष्टर्यंविलोक्यताम् ? एवंविधानि तदुक्तवचनानि निशम्य भूपतिर्व्यचिन्तयत्–राज्यासनसेविनंमांधिग्, इयमङ्गनातुपातालसुन्दर्येवास्तिनाऽन्या । अथवा समानाकृतयः केचनभवन्ति । पातालसुन्दरीभूगृहवर्त्तिनी कथमत्रसंभाव्यते ! पुराऽपि भोजनकालेममैतादृशो भ्रमोऽजनितथैवाऽयमपिभ्रान्तिजनकोविचारोविद्यते । एवं निजमनसिसमाधानंविधायवर्त्मन्यगच्छत् । क्रमेण सर्वेसपरिवारा जलधितटंप्रापुः । तदानीं सत्त्वरंसार्थवाहो भूपतिं प्रणम्य पातालसुन्दरीसमेतो महतिप्रवहणेनिषसाद । नृपादयः सर्वेपश्चाद्वलिताः । भूपतिः स्वप्रासादमवाप्यमच्छुद्धिंकारयेच्चेन्मम कागतिरितिशङ्कांदधाना पातालसुन्दरी सार्थवाहं कथयितुं लग्ना, हे कान्त ? अस्मदीयानिप्रवहणानिमार्गान्तरेशीघ्रंवाहयतु । इत्थंतत्कथनमात्रादेवमनोनेत्रवायुवेगेनमिथस्ताड्यमानाः कल्लोला इवतानि प्रवहणानिप्रचेलुः । ततः सा पातालसुन्दरीषाण्मासिकावधि तस्मिन्प्रवहणे तेन सार्थवाहेन सार्द्धं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





क्रीडासुखमनुबभूव। तदनुतस्यानङ्गदेवस्य यथार्थाभिधानं विभूषयता सुकण्ठनाम्ना तदीयकनीयसाभ्रात्रासह देवृसम्बन्धेन मोदमाना सा हास्यविनोदानकार्षीत्। एवञ्चतस्य सुकण्ठस्यसुस्वरेणाविमोहिता सा तस्मिन्समासक्ता प्रच्छन्नतया रतिविलासानप्यकरोत्। बतस्त्रीणांप्रवर्त्तनंकीदृग्विधंगूढम्? यस्यान्तंकःपुमान्प्राप्नुयात्? अहो? महतामपि भ्रमंजनयन्तिप्रमदाः। यत उक्तम्—वेधाद्वेधाभ्रमंचक्रे, कान्तासुकनकेषुच। कान्ताकनकसूत्रेण, वेष्टितं सकलंजगत् ॥१॥ किञ्चजलकल्लोलेभ्यस्तज्जन्याबुद्बुदा अधिकचञ्चलास्तेभ्योऽधिकचञ्चलाविद्युदभिधीयते, ततोऽपितद्वेगोऽतिचञ्चलोविद्यते, तस्मादप्यम्बुधरस्तस्मादप्यधिकजवोवायुर्निगद्यते। तस्मादप्युद्धपक्षस्यगरुडस्याधिकतरोवेगो लक्ष्यते। तथैव लक्ष्मीचाञ्चल्यमपि लोकेऽतीवप्रशस्यते, खलानां संगतिश्चक्षणप्रभासमाना विद्यते, एतेभ्यः सर्वेभ्यः स्त्रीणांचापल्यमधिकतममेवप्रतिपादितं शास्त्रेषु, स्त्रीप्रवर्त्तनन्तुविचित्रस्वभावमेवविलोक्यते, तस्मादेव योगनिष्ठजनास्तासांसङ्गंदूरतः परिहरन्ति। ततः पातालसुन्दरी निजकान्तमनङ्गदेवं वञ्चयित्वा गुप्तवृत्त्या निजदेवरंसुकण्ठंनिषेवतेस्म। अथैकस्मिन्दिने साप्यचिन्तयत्—सुकण्ठेनसाकंभोगंभुञ्जानाया ममाऽयमनङ्गदेवोऽन्तरायकारकोऽन्वहंजायते, तस्मात्तंनिहन्मिचेदनेनसुकण्ठेन सार्द्धंनिःशङ्कतया विषयसुखमनुभवामि। एवंविधंनिश्चयंमनसिविधाय चैकस्मिन्वासरे रात्रिसमयेऽनङ्गदेवोदेहचिन्तायै समुत्थाय प्रवहणस्य प्रान्तभागेनिषण्णस्तस्मिन्क्षणेऽवसरं प्रतीक्षमाणा पातालसुन्दरी शीघ्रं समुत्थाय पाषाणखण्डमिवतं श्रेष्ठिनं जलधौ पातयित्वा मिथ्याभूतं रोदनं कुर्वन्ती प्रवहणस्थिताञ्जनानिति प्राहस्म—रे रे? धावत, धावत, मदीयो भर्त्ता वारिधौ पतितः, हन्त रङ्कजनस्यहस्तगतं रत्नं यथा विनिर्याति तथैवममाऽपि सञ्जातमिति विविधानि तस्याः प्रलापवचनानि निशम्य तत्रस्थिताः सर्वेजनाः संमिल्य परितस्तं निरीक्षन्तेस्म, तथापि तच्छुद्धिंकेऽपिनालभन्त, तदानीं सा कुलटा कुटिलाशया पातालसुन्दरी



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पतिव्रताचारंदर्शयन्ती भृशं विललाप–अधन्याऽहमप्यधुना देहमिमं न धारयिष्ये, प्रियपतौ दिवंगते किमत्रलोके मम जीवनेन ? पतिव्रतानामयमेव धर्मः समुपदिष्टः। तथा चोक्तम्–ज्योत्स्ना शशाङ्कस्य वृषस्यलक्ष्मी–श्छाया शरीरस्य जलस्यमत्सी। यथावियोगं सहते न जातु, सती न पत्युः सहते तथैव ॥ १ ॥ निजपतिपथानुसारिणी धर्मपत्नी भवेद्। ईदृशानि तदीयवचनानि सर्वेषांहृदयानि विदारयन्तिस्म। अहो ? कपटजालस्य कीदृशी मर्यादा विद्यते। सज्जनास्तां विलोकयन्तु। ततस्तत्र स्थिताः सर्वे जनाः शोकनिमग्नमानसास्तां विलपन्तीं पातालसुन्दरीं कथयामासुः–श्रेष्ठिनि ? त्वमकस्मान्मरणाभिमुखी किमर्थं जायसे ?–अद्यवाब्दशतान्तेवा मृत्युर्वै प्राणिनां ध्रुवम्। तस्माद्धर्मार्थिना भाव्यं, धर्म एव सहायकृत् ॥ १ ॥ दैववशात्कालधर्मं प्रयातस्तवपतिरिदानीं तव सन्निधौ नागामिष्यति। दैवतन्त्रितमिदं जगत्पराधीनं विद्धि। तस्माच्छमरसेन शोकाग्निं मन्दीकृत्यशान्तिं भज। ततः सा च्छद्मभावेन किञ्चिच्छोकभावंद्योतयन्ती निजदेवरं सुकण्ठनामानं तेषां प्रवहणानामधिपतिंचकार। स्वयमपिनिर्विघ्नतया तेन साकंयथेप्सितं सुखंबुभुजे। ततोऽन्यदा सुकण्ठः स्वचेतसिव्यचिन्तयत्–इमां दुष्टकर्मविधायिनीं कुलटांधिक्, अनयादुष्टयाऽपराधशून्यो महाबुद्धिनिधानो मदीयभ्राता सार्थवाहः समुद्रमध्येपातितः। तथैवेयमधमा कस्मिन्नपि समये मामप्येतदीयां गतिं नेष्यति। धिगस्त्वस्या जीवितम्। अनयाऽधमया प्रथमं नृपतिः परित्यक्तः पश्चात्सार्थवाहोऽपि वञ्चितः, तस्मान्मन्येहं, मामपि परित्यज्य साऽन्यत्र गमिष्यति नात्र सन्देहः। न जाने किमन्यद्व्यलीकं सा करिष्यति ? इत्थं विचारयतस्तस्य सुकण्ठस्य चित्तं तस्यां विगतस्नेहमभूत्। तथापिनिजभ्रातृपत्नित्वात्तद्भयेनचतत्कथनानुसारेण कार्यंवाहयति। पिशाचिनीवशं गत इव सुकण्ठः कतिचिद्दिनानि तयासह व्यनैषीत्। अथ जलधिपतितोऽनङ्गदेवो दैववशा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





त्तत्कालप्राप्तमेकं फलकमवाप्यतत्रचोपविश्य स्वकीयपुण्यैरिवकल्लोलैर्वाह्यमानो भव्यजनोयथा भवसमुद्रं धर्मप्लवेनतीर्त्त्वापारं-प्रयाति तथातंजलधिंतीर्त्त्वा सिंहलद्वीपं प्राप। तत्र च स्वस्थीभूय तेनविचिन्तितम्-अहो ? कामान्धतया तस्यानिर्दयाया कुलमर्यादोज्झिताया व्यभिचारिण्या विश्वासघातिन्याः सङ्गंकुर्वतामया महाऽनर्थप्रदोऽसज्जनेनाऽप्यनाचरणीयः स्वामिद्रोहो-विहितस्तस्मादेवेयं पापसमुद्भवा विपत्तिर्मे समजनि । महाधूर्त्तायां परपुरुषलम्पटायां विश्वस्तजनघातिकायामेतस्यामहमास-क्तोऽभूवं तस्मात्कामान्धचेतसं मां धिगस्तु। अस्मात्पापराशेः कदामुक्तो भविष्यामि ? एवं पुराकृतस्य महापापस्यमुहुःस्म-रणं कुर्वतस्तस्यानङ्गदेवस्य मानसंवैराग्यवासितंबभूव। ततः संसारमसारं विचिन्तयन्स श्रेष्ठी सहसा सद्गुरोश्चरणान्तिकं प्राप्य दीक्षां जग्राह। सम्यग्भावेन भावितात्मा स मुनिः सदानिरतिचारं चारित्रं पालयन् व्यचरत् । इतोदैवबलेन सुकण्ठ-श्रेष्ठिना प्रेरितानि प्रवहणान्यपि तस्मिन्नेवद्वीपे समाजग्मुः। तत्रतानिस्थिरीकृत्य सर्वेजनाः समुत्तीर्य स्वस्वोचितानि कार्याणि समाचेरुः। अथान्यदा तत्रस्थितः सुकण्ठः पातालसुन्दरीसमेतो यत्रैषोऽनङ्गदेवनामामुनिः कायोत्सर्गेण संस्थितस्तस्मिन्नेव वनेक्रीडितुं जगाम, तदानीमाकस्मिकंमुनिदर्शनं कृत्वा सञ्जातसंशयः सुकण्ठो लज्जयाविनम्राननोऽभूत् । ततस्तेन स्वकीयं सकलं वृत्तान्तं मुनेरग्रे निवेदतम्। तेन पृष्टो मुनिरपि निजंचरित्रं साद्यन्तं सुकण्ठाय समाचख्यौ। मुनिकथितं सर्वंवृत्तान्तं-विदित्वा समुत्पन्नसंवेगरङ्गः सुकण्ठस्तंमुनिं स्वापराधं मुहुःक्षमयामास । एतस्मिन्प्रस्तावेतावुभौमिथोमिलिताविति विज्ञाय विमुक्तनारीसदाचारा पातालसुन्दरी सहसैकंप्रवहणं प्रगुणं कारयित्वा सुकुण्ठश्चपरित्यज्यैकाकिनीद्वीपान्तरं प्रययौ। तत्र स्थि-ता सा यावज्जीवं स्वच्छन्दवृत्तिर्वाराङ्गनावेषधारिणी दुराचाररता पञ्चत्वं प्राप्याधोगतिमियाय। ततः क्रमेणबहुकालं संसार-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सागरे परिभ्रमणं करिष्यति । संप्राप्तसम्पूर्णवैराग्यः सुकण्ठोऽनङ्गदेवमुनेः समीपे सर्वसमीहितदायकंसर्वविरतिव्रतं स्वीचकार । ततस्तावुभौ निरतिचारं निर्मलं चारित्रं प्रपाल्यप्रान्तेकालं कृत्वा शुभध्यानेनदिवंजग्मतुः । क्रमान्निर्मलेनाध्यवसायेन मोक्षगामिनावुभौ तौ भविष्यतः । इतोजयन्तसेनभूपतिरनङ्गदेवश्रेष्ठिनः प्रयाणकालीनां संभावनां विधाय पश्चाद्वलित्वानिजसन्देहनिरासाय भूमिगृहं गत्वापरितोव्यलोकयत्, परंतत्रस्थितां पातालसुन्दरींनापश्यत् । तेन परमं विषादमापन्नो भूपतिर्निजामात्यसामन्तादीन्समाहूय जगाद–अनङ्गदेवश्रेष्ठी महाधूर्त्तः, सम्प्रति विद्यमानेऽपि मयि मदीयां भार्यां पातालसुन्दरीं भूगृहस्थितांहृत्वादेशान्तरं गतः । अहो ! अस्यदुराचारिणश्चरित्रं किंब्रवीमि–परस्त्रीसंगतिः पुसां, नरकायैव जायते । राजपत्नी मता माता, उभयत्र भयप्रदा ॥ २ ॥ रे रे ? सुभटाः ! युष्माकंमध्येऽधुनाकोऽपि तादृशो वीराग्रणीर्वर्त्तते ? यस्तावुभौ निबद्ध्य ममसन्मुखंसमानयेत् । यतस्तयोः सकलसभासमक्षं शिक्षां विधाय कृतार्थो भवामि । तदानीं सर्वे मन्त्रिसामन्तादयःप्रोचुः–महाराज ? स्वभार्या भवतातत्प्रयाणावसरे कथंनोपलक्षिता ! इति तेषां वचनं श्रुत्वा भूपतिरवोचत्–यूयं पतितस्योपरिपादप्रहारान्मा कुरुत, क्षतस्योपरिक्षारप्रक्षेपं वा माविधत्त । इदानीं ममापाक्रियामपृष्ट्वा केवलं महापापिनौ तौ निगडयित्वाझटित्यत्र समानयत । एवं कथयित्वा सपरिवारो भूपतिः पुनः समुद्रतीरंजग्मिवान् । नाविकाँश्चसमाकार्य समादिष्टवान्–प्रवहणं सत्वरं युष्माभिः प्रगुणीक्रियताम् । नाविकाः प्रोचुः–नरेन्द्र ? भिषग्गुटिकागान्धिकपुटिकावन्नेदंकार्यं सद्यः प्रजायते । एकस्य प्रवहणस्य सज्जीकरणे भूयान्कालोऽपेक्ष्यते तदातत्प्रगुणीभवति । किञ्च तस्य सार्थवाहस्य प्रवहणानि कस्यांदिशि गतानि तद्वयंनविद्मः, तेषां प्रयाणेचभूरिकालोव्यतीतः । अतस्तेषां शुद्धिः कुतः समानेयाऽस्माभिः ! । तथै-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वास्मत्सन्निधाववशिष्टमेकमपि प्रवहणमधुनानविद्यते, यस्मात्तत्सज्जीकृत्य वयंशीघ्रं गच्छामः ? सर्वाणि प्रवहणानि गृहीत्वा सार्थवाहः प्रयातोऽस्ति । इत्थं नाविकोक्तिं समाकर्ण्यनिःश्वसन्भूपतिः स्वचेतसिव्यचिन्तयत्–अहो ? पापचारिण्या महाधूर्त्तयाऽनया पांसुलया पाखण्डजालेनाहं प्रतारितः, जन्मतः प्रारभ्यभूमिगृहे संरक्षिताऽकृतान्यजनसंसर्गा मय्यसाधारणस्नेहधारिणी विशुद्धशीलाऽपिसा मांवञ्चयित्वा चैतादृशमकृत्यमकार्षीत् । तस्माद्धिक्स्त्रीचरित्रम् । यतः–पोषिताऽपि प्रिया सम्यक्, भूरियत्नेन रक्षिता । वञ्चयित्वा स्वभर्त्तारं, क्रीडत्यन्येनधिग्वशाम् ॥ १ ॥ इत्थं भूपतिः संशयविषादविस्मयनिर्वेदरूपायामापत्तौ निपपात । तस्मिन्समये तत्रैवसागरोपकण्ठे सुरासुरनरेन्द्रवन्दितचरणकमलः केवली भगवान्सहसा समाजगाम, निजकान्तिभिः सहस्ररश्मिं तर्जयन्तं भगवन्तं केवलिनं विलोक्य प्रफुल्लनयनोनूर्व्यविचक्षणोनृपतिर्जहर्ष । भगवतः पादयुगलं वन्दित्वा पातालसुन्दर्याश्चरित्रं तेनपपृच्छे–केवली भगवानपि ज्ञाननिधिस्तस्याः सकलं पापचेष्टितचरित्रं कथयामास । तच्छ्रुत्वानृपतिः संसारस्यासारतां विज्ञाय वैराग्यवासितो बभूव । राज्यादिकं सर्वं कारागृहोपमं विदित्वा त्यक्तसर्वपरिग्रहः सनरेन्द्रो भगवतः केवलिनश्चरणान्तिके दीक्षां गृहीत्वा सप्तमेदिने केवलज्ञानमवाप । ततः केवलज्ञानेन सर्वभावान्करतलगतानिव विलोकयन्स विविधान्देशान्पावयन् भव्यजनान्देशनामृतं पाययन्कियताकालेनकर्माणि क्षपयित्वा मोक्षं जगाम । अतो नराधीश ? एतावद्भिरुपायैः सुरक्षिताऽपि पातालसुन्दरी कुलटाऽजनि, तर्हिताद्दक्साधनविहीनस्यास्यवणिजः स्वेच्छाचारिणी भार्या कुसती भवेत्तत्रकः संशयितो भवेद् ? धूर्त्तस्त्रियोमेनासुन्दरीवदसदाचारं सेवमानाअपि निजचरित्रेणाऽन्यान्निजसतीत्वं दर्शयन्ति । इति प्रधानवचनं समाकर्ण्य राजातंपृच्छातिस्म- केयं मेनासुन्दरी ? किञ्चतयाविहितम् ? तत्स्वरूपं ब्रूत ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तच्छ्रुत्वाचतुर्णामेको मन्त्री बभाषे–निजसंपद्भिश्चन्द्रवद्भासमाना धनाढ्यजनसेविता विशालशालाभिर्विराजमाना चन्द्रावती नाम नगरी बभूव। तस्यां चन्द्रसेननामा कश्चित्क्षत्रियोन्यवसत्। सच विद्याभ्यासकलासुनिपुणोऽपि निर्धनावस्थोऽभूत्, शरीरकान्त्या तर्जितमन्मथरूपोऽपि स दैवयोगेनदुःस्थितिमन्वभूत्। तस्य चैकाचन्द्रसेनाऽभिधाना भार्या बभूव। सा महारूपवत्यपिदुराचारसेविनी क्रूरस्वभावाचासीत्। निजभर्त्तारं चन्द्रसेनं सा प्रत्यहं भृशमुद्वेजयतिस्म। तद्दुःखेनदुःखितश्चन्द्रसेनो दिवानिशं शोकसागरेनिमग्नोनिजकर्त्तव्यपराङ्मुखोऽभवत्। निजपतिं महागुणनिधिं जानन्त्यपि सासदैव तंतिरस्कुर्वन्ती परपुरुषेषुरागवतीजज्ञे। इत्थं तदीयकुचरितानि विलोक्य वित्रस्तहृदयश्चन्द्रसेनो निजहर्म्यंत्यक्त्वा देशान्तरं प्रययौ। कियताकालेन परिभ्रमन्पद्मपुराभिधंपत्तनंप्राप। तत्र स भाटकेन गृहं स्वीकृत्यन्यवसत्। तन्नगरवासिभिः सह मैत्रीं विधाय विद्याविशारदः स कलाप्रयोगेण प्रतिदिनं द्रव्योपार्जनं कर्त्तुं लग्नः–तस्मिँश्चनगरे विशालमार्गा बृहज्जनव्याकुलैका विपणी समस्ति। तत्र महाधनाढ्या अनेके व्यवहारिणो निवसन्तिस्म। कार्यवशात्तत्र गमनागमनं कुर्वतश्चन्द्रसेनस्य बालचन्द्र नाम्नाकेनचिद्व्यवहारिणा साकं मैत्री जज्ञे। ततः स प्रतिवासरं निवृत्तिसमये घटिकामात्रमपि बालचन्द्रस्य सन्निधौवार्त्ताविनोदायाव्रजत्। एवं प्रत्यहंगच्छंश्चन्द्रसेनोऽन्यदा नगरविलोकनार्थं परिभ्रमन् कस्यचिद्व्यवहारिणः प्रासादस्य सन्निधौ गत्वास्थितः, ऊर्ध्वंचनिरीक्षमाणः स गवाक्षे सन्निविष्टां रूपलावण्यैकवसतिं प्राप्ततारुण्यां मनोहारिणीं चातुर्यकलाभिर्विराजितामिषद्धास्यंवितन्वन्तीं चन्द्रवदनां मेनावत्यभिधांस्त्रियमपश्यत्। तदानीं तत्स्वरूपं निरूप्य विस्मितमानसश्चन्द्रसेनः स्वचित्ते विकल्पयतिस्म. अहो ? कीदृग्विधं निःसीमतेजोलावण्यमन्दिरमिदं स्त्रीरत्नं विधात्रा निजचातुर्यकलापेनविनिर्मितमस्ति ?

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अस्याः पाणिग्रहणविधाता पुरुषोलोके धन्यवादमर्हति । इत्थं विचारकल्लोलमालया वाह्यमानःस यावदास्तेतावत्सा गवाक्ष-स्थिता मेनावती विचारमग्नमधःस्थितं चन्द्रसेनंविलोक्य तदीयरूपलावण्यचातुर्यकलाकलापं विलोकमाना मान्मथैः शरैर्विध्यमानहृदया समभूत् । क्षणं विमृश्य तद्रूपमोहिता सा तं क्षत्रियकुमारं स्वान्तिके समाह्वातुं बहून्सङ्केतानकरोत्, तथाऽपि " वैदेशिकानां परगृहप्रवेशोऽनर्थप्रदोऽस्ती " ति विचार्यविशुद्धबुद्धिः स विचारमग्नस्तत्रैवतस्थौ । ततो विषयान्धितविवेक-नयना मेनावती कामवेगमसहमाना स्वयमेवशीघ्रमधः समुत्तीर्य तदन्तिके समागत्यतंसत्कृत्य निजप्रासादान्तः प्रवेश्य द्वारं च संरुध्य हावभावेन प्रीणयतिस्म । येन तस्यक्षत्रियकुमारस्य विद्याज्ञानबलं क्व गतमिति न लक्ष्यतेस्म । यावत्स्त्रीणां कटाक्ष बाणैर्नविद्धस्तावद्विज्ञविवेकिनः पुरुषस्य ज्ञानविवेकधैर्यप्रशस्यते । अन्यत्राप्युक्तम्—तावन्मौनी यतिर्ज्ञानी, सुतपस्वीजितेन्द्रियः । यावन्नयोषितांदृष्टि—गोचरंयातिपूरुषः ॥१॥ ततश्चन्द्रसेनस्तस्याअतीवाग्रहेण तयासार्द्धंविषयसुखानिबुभुजे । मेनावत्यपि भृशंतुष्टाऽजनि । अथ तद्वियोगं सोढुमक्षमासा प्रोवाच तम्—सुभग ? प्रतिदिनं ममपतिर्विपण्यां निजहट्टेमध्यान्हसमयेप्रयाति, सायंकाले च गृहं समागच्छति । तावत्कालमहमेकाकिन्येवगृहे तिष्ठामि, अतस्त्वयानिर्भयतयाऽपराह्णकालेऽत्रसततं समागन्तव्यमित्यभिधाय निजान्तिकादेकंनिष्कं तस्मैप्रादात् । पुनस्तयासप्रोचे—नररत्न ? द्रव्योपार्जनकृतेत्वयाकापि चिन्ता न विधातव्या, प्रतिवासरंतुभ्य-मेकं सुवर्णनिष्कं वितरिष्यामीति तस्यागिरं समाकर्ण्य निजकरतलास्थितंनिष्कं च विलोक्यभृशं मोदमानःसस्वस्थानमगात् । अप्रयासेन धनं भार्याश्चलब्ध्वा प्रभूतंशर्ममन्यमानश्चन्द्रसेनः प्रत्यहं मिष्टान्नानिभुक्त्वा मेनावत्यासाकं विषयक्रीडामकार्षीत् । एवं तया सह रममाणस्यचन्द्रसेनस्य पञ्चदशवासरा व्यतीयुः । अहो ? प्रमदासंगः किं न करोति ? पुरा स्वमित्रस्य बालचन्द्रस्यहट्टे तन्मि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लनायप्रत्यहं चन्द्रसेनोऽगमत्तदपि रमणीस्नेहपाशनिबद्धो विस्मृतवान् । अथैकदातस्यप्रसुप्तस्य निजमित्रस्मरणंजातम्, रे ? मूढेन मया पूर्वं प्रतिज्ञातं यत्प्रत्यहंमया मित्रान्तिकेगन्तव्यमितिजातस्मरणश्चन्द्रसेनः कस्मिँश्चिद्दिने बालचन्द्रस्य मिलनाय- जगाम । तदानीं चिरं समायातं तं विलोक्य बालचन्द्रः पप्रच्छ–मित्र ? तव चिरादर्शनं कथं जातम् । किं कार्यवशात्त्वं ग्रामान्तरंगतः ? किंवा महत्कार्यमेतादृशं किञ्चिदापतितम् ? किंवा स्वशरीरे किञ्चिदस्वास्थ्यंवर्त्तते ? यत इयन्ति दिनानि- त्वमत्रनागतः ! तत्कृपापरेणभवता निवेद्यानुगृह्यतामयंजनः । इति बालचन्द्रवचनं समाकर्ण्य चन्द्रसेनोऽवादीत्–व्यवहारिन् ? सर्वथा भवतःप्रसादेन शरीरं मे निरामयं विद्यते, ग्रामान्तरमपिनाव्रजम्, महति कार्येपिनपतितोऽस्मि। किन्तु हर्षशोकप्रदायां कस्यांश्चिदापत्तौ निमग्नोऽस्मि । तस्माद्भवतः सन्निधौनागमम् । तदाबालचन्द्रस्तंपप्रच्छ–कीदृग्विधा तवापत्तिः ? तस्याःस्व- रूपंमांनिवेदय, इत्थं निजमित्रेण पृष्टश्चन्द्रसेनोऽभिन्नहृदयत्वान्मेनावतीसंसर्गजन्यंसकलं स्वचेष्टितं कथयामास । तस्याःपति- र्यस्यां विपण्यांव्रजति तस्याभिधानं तद्गृहाभिज्ञानश्चतस्मै निवेदितम्। पुनः स प्रोवाच–मित्र ? तया प्रमदयासाकं प्रभूतंसुखमनु- भवामि, इति प्रमोदकारणंविद्धि, कदाचित्तत्पतिर्जारकर्मरतं मांज्ञास्यतिचेन्ममशिरश्छेदं करिष्यतीतिशोकार्त्तोऽस्मि। इत्थं शोक- प्रमोदाभ्यां संकलितोऽहं वासरान्निर्वहामि। एवं स्ववृत्तान्तं निगद्यबालचन्द्रस्यमनसः समाधानंकृत्वा स विरराम। परन्तुसामेना- वती बालचन्द्रस्यैवभार्याबभूव। तत्संबन्धमजानता चन्द्रसेनेन सरलभावेनैषावार्त्ता तदग्रेप्रकाशिता । अथ बालचन्द्रोऽपि निज- भार्याया व्यतिकरं समाकर्ण्य संशयिताशयोजज्ञे, यदस्य कथनाऽनुसारेण मत्पत्न्या इदं सर्वं वृत्तान्तं निश्चीयते, तथापि प्रत्यक्षं तदकृत्वा साम्प्रतं किमप्यस्याग्रे कथनीयं तन्मूर्खचेष्टितमेव विज्ञेयमिति स्वचेतसिनिर्धार्य सगृहीतमौनोऽजनि, यतः—श्रुतं

For Private And Personal Use Only

समस्तंवचनंजनानां, न सत्यतामेति कदाचिदत्र । तस्मात्सुधीभिः प्रविधायसाक्षा–द्विनिर्णयस्तस्य शनैर्विधेयः ॥१॥ अथ द्वितीयस्मिन्वासरे बालचन्द्रस्तदेवकार्यं प्रत्यक्षीकर्तुं स्वगमनसमयं व्यतिक्रम्य निजगृहाङ्गणे गत्वाबाढस्वरेण "द्वारमुद्घाट्यता" मितिमुहुराक्रोशंचकार । तस्मिन्नवसरे चन्द्रसेनमेनावत्यौ परस्परंहास्यादिविनोदंचक्रतुः । तदेतद्बालचन्द्रस्योद्घोषणां निशम्य मेनावती वित्रस्तहृदया व्यचिन्तयत्–अधुनाऽयंसहचरःक्वगोपनीयः ? द्वारिस्थितः श्रेष्ठीतुत्वरमाणो भृशमारार्टीं करोति । इति चिन्ताग्रस्तमानसा मेनावती तत्कालोत्पन्नबुद्धिप्रभावेण गृहस्यैकस्मिन्कोणे किलिकाऽवलम्बमानायां स्कन्धवाह्यायां वेपमानंचन्द्रसेनंसंगोप्य निद्रितोत्थितेव चक्षुषीमर्दयन्तीनीचैः समुत्तीर्य गृहद्वारमुद्घाट्य निजपतिंसच्चक्रे । पुरैव विज्ञाततदीयवृत्तान्तः क्रोधाग्निध्मातहृदयो बालचन्द्रोदृढीयसीं यष्टिंगृहीत्वागृहान्तः पुरितस्तंजारपुरुषं मृगयतिस्म । परंगुप्तीकृतंतमविलोक्यश्रान्तः स सुखशयने निषसाद । ततोमेनावती हावभावं व्यञ्जयन्ती तदन्तिके समागत्यमधुरवचनैः पृच्छतिस्म–प्राणवल्लभ ? सांप्रतं विषण्णमानसः कथंलक्ष्यसे ? वेश्मन्यपि समयमन्तराऽद्य सत्वरं समागतोऽसि, तत्कारणंमां निवेदय । इत्येतद्वचनंश्रुत्वा भृशंक्रुद्धः स महेभ्योरक्ताङ्गःसद्यःसमुत्थाय जल्पन्तीं निजभार्यांतिरस्कृत्य कथयतिस्म–एषा स्कन्धवाह्या मयानविलोकिताऽस्तीत्यभिधाय यावत्करस्थितेन दण्डाग्रेणतामास्फालयति तावत्प्रभीतेन तस्यांस्थितेन चन्द्रसेनेन व्यग्रतयामूत्रधाराविहिता, तेन मूत्रप्रवाहेण तदधःस्थितोलूखलःसंभृतः । तदानींमेनावतीभृशंरक्तेक्षणा तमुवाच–स्वामिन् ? किमद्यविजयापानंविहितम् ? किंवा मनोभ्रमजनकमन्धद्भक्षितम् । भूरिप्रयासेनमयासमानायितमिदं काचभाजनेषुसंभृतंगङ्गोदकं स्कन्धवाह्यायां संस्थापितमासीत्, तानि च काचपात्राणित्वया यष्टिप्रहारेण स्फोटयित्वा तज्जलंसकलं विप्ला-

वितम्, येन जलेनायमुलूखलोऽपूर्यत। निरीक्षस्व दृष्टिंप्रसार्य, तस्यगङ्गोदकस्य पानंकुरुष्वान्यथा महापापस्यभाजनं भविष्यसि। तथाविधं तद्वचनंनिशम्य यथार्थतन्मन्यमानो बालचन्द्रस्तस्य क्षत्रियकुमारस्य मूत्रपानमकरोत्। क्षारं विचित्रगुणश्चतद्विज्ञाय तेनस्वभार्या पृष्टा-वल्लभे! किमिदंगाङ्गंवारि क्षारंदृश्यते? सावदत्-स्वामिन्! गङ्गोदकंतुसर्वदा सुस्वादुभवति, परंह्योमयोलूखलेलवणं चूर्णितम्। तस्मात्तत्क्षारं संजातमितिकूटप्रत्युत्तरप्रदानेन मेनावती सरलस्वभावं निजपतिं वञ्चयित्वा निजसहचरस्य मूत्रपानमकारयत्। ततो बालचन्द्रो लब्धश्रमोविलक्षीभूय निजापणमगमत्। ततो मेनावती निजसहचरंचन्द्रसेनंस्कन्धवाह्यायाः समुत्तार्यचैकंदीनारंप्रदाय निजस्थानंव्यसृजत्। द्वितीयस्मिन्दिने चन्द्रसेनः पूर्ववद्बालचन्द्रस्यापणमियाय। वार्त्तालापं प्रकुर्वंश्चन्द्रसेनोविहस्यतंप्रोवाच-प्रियमित्र! ह्यस्तनेवासरेयदाश्चर्यं जातंतत्किमद्यवर्णयामि? कदापिनैतादृशंमयाविलोकितमित्यभिधाय मूत्रपानावधि सर्वं वृत्तान्तं निवेद्य तत्स्मृत्वाऽद्याऽपिहास्यं न विरमति, महाकौतुकमेतदासीदित्थंब्रुवाणः कराभ्यां जठरंगृहीत्वाभूरिहास्यमकरोत्। चन्द्रसेनमुखादिति निजगृहस्यवार्त्तां निशम्य बालचन्द्रस्यहृदये वह्निज्वाला समुत्तस्थौ। तथाऽपि साक्षाददृष्टत्वात्स उपायशून्यः किंकुर्यात्? प्रचण्डक्रोधाग्निज्वालयाभृशंतप्तोऽपिस पुनःशान्तोजातः। मूत्रपानस्य स्मरणं कुर्वतस्तस्यश्रेष्ठिनोत्रमनशङ्काबभूव, तथापि विचारसदौषधेनतां निवारयामास। स्वमनसि सचैवंव्यचिन्तयत्-अयंक्षत्रियकुमारः प्रत्यहं ममभार्यया सार्कं विषयसुखविलासान्निर्विशति। मिष्टवचनैर्मयासार्द्धं मैत्रींतनोति। स्वकीयंमूत्रजलंमामपाययत्। किमिदमस्य दुराचारस्यचेष्टितं साधारणमस्ति! परंनिरुपायोहं किंकरोम्यधुना! अथैवंवर्त्तमाने कियद्दिनानन्तरं तस्यांवार्त्तायां स्मृतिमुपागतायामेकस्मिन्दिने बालचन्द्रोऽपराह्णसमये निजापणंमुद्रयित्वा स्वगृहंप्राप्य द्वारमुद्घाट्यतामितिभृशंचुक्रोश।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्मिन्क्षणेपर्यङ्कस्थितौ मेनावतीचन्द्रसेनौ ताम्बूलविटिकाः परस्परंदत्त्वा विनोदंकुरुतस्तदानीं मेनावती निजभर्त्तुर्ध्वनिंश्रुत्वा सत्वरं मृन्मयेभग्नप्राये चैकस्मिन्कुशूलेचन्द्रसेनं समुत्तार्य बृहद्भाण्डेनतन्मुखमाच्छाद्य निश्चिन्तीभूय गृहद्वारमुद्घाट्यस्वभर्त्तारं विहितादरं गृहान्तः समानिनाय। बालचन्द्रस्तुतत्कर्म ध्यायन्सर्वद्वाराणिमुद्रयित्वा सर्वतोवीक्षमाणोऽपि तंजारनापश्यत्। तेन-व्यग्रमानसः स तथैवद्वारं निरुध्यतस्थिवान्, स्वमनसिचैवंविचिन्तयति—बहिरघनगमिष्यामि, तंदुष्टं जीवन्तं नमोचयामि, निरुद्ध-द्वारादस्मात्स्थानात्कथंसनिःसरिष्यति? एवंनिश्चित्य मौनमुखो बालचन्द्रोद्वारदेशेस्थितः। ततो मेनावतीतंबभाण—प्राणप्रिय! आवयोर्भृशंक्षुद्व्याधिःसमुत्पन्नः प्राणाश्चव्याकुलिताःसन्ति। द्वारगवाक्षादीन्यपिनिरुध्य भवानुपविष्टः। रसवत्याअपिनिषेधो-भवताऽक्रियत, सर्वंगृहमपिभवतावीक्षितम्, नजाने किमेतादृशंबृहत्कार्यं तत्रसमायातम्? येनत्वं व्यग्रबुद्धिर्लक्ष्यसे। साम्प्रतं भवतः प्रकृतिर्विचित्राविद्यते। भवदीयमनसि स्थितायाः वार्त्तायानिराकरणं त्वंनकरोषि, तर्हिभवत इच्छा, भवतेयद्रोचते तद्विधी-यताम्। तत्रेष्टकार्येणममनास्ति किञ्चित्प्रयोजनम्। तथाप्येतावन्ममविज्ञापनीयंत्वया स्वीक्रियताम्। विशेषतो भवतोभोजनेच्छा न स्याच्चेद्विपण्यांगत्वा कान्दविकहट्टात्पक्वान्नादिकं समानीयत्वयाक्षुन्निवृत्तिर्विधीयताम्। क्षुधार्दितेन भवता न स्थेयमिति सविनयं निजभार्यावचनं निशम्यप्रशान्तामर्षोबालचन्द्रो विपण्यां गत्वाप्रस्थद्वयप्रमितं मिष्टान्नं समादाय सत्वरंगृहमागत्य-तद्भोक्तुमुपविष्टस्तदा मेनावती हास्यविनोदान्प्रकटयन्ती निजभर्त्तुःसमीपंगत्वा तन्मनःस्वाधीनीकर्त्तुंयुक्तिक्रममारभत। यतो निजसहचरोऽपि क्षुधाकुलोऽस्ति। अतस्तस्मै भोजनं दत्त्वा पश्चान्मयाभोक्तव्यमिति स्वमनसि विचारयन्ती सा निजपतिना साकं हास्यप्रहेलिकां प्रकुर्वन्ती जगाद—स्वामिन्! अस्मिन्सन्मुखस्थिते कुशूलच्छिद्रेक्रमभाजावांदशसंख्यान्मिष्टान्नपिण्डा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्प्रक्षिपाव, यदि भवता प्रक्षिप्ता एते तच्छिद्रगता अधिका भवन्ति तदाऽहं यावज्जीवं तव दास्यकर्मणि तिष्ठामि । यदि मम विजयः स्यात्तर्हि त्वदीयकण्ठस्थितो मौक्तिकहारस्त्वयामह्यं प्रदेयः । इति प्रतिज्ञां स्वीकृत्य तौ दम्पती प्रमुदितमानसौ मिथो भोजयन्तौ पर्यायेणैकैकं पिण्डं प्रक्षिपन्तौ कुशूलस्थितं चन्द्रसेनमपि भोजयतः । मेनावत्या प्रक्षिप्ताः पिण्डाः अधिकाः कुशूलच्छिद्रे न्यपतन्, बहिः पतितानपि पिण्डान्सा निजपतिदृष्टिं वञ्चयित्वा चन्द्रसेनाय प्रादात् । एवं निजपाटवेन स्वकान्तस्य चक्षुषोर्धूलिप्रक्षेपं विधायनिजेष्टसहचरमपि प्रीणयामास । स्वकीयविजयेन स्वभर्तृकण्ठस्थितं हारमपि सा जग्राह । इत्थं क्रीडमानयोस्तयोः सूर्योऽपि वारुणीं दिशं प्राप्यार्णवे निममज्ज । सान्ध्यं समयं व्यतीत्य तौ दम्पती रजन्यां निद्रायमाणलोचनौ शयनभूमिं प्राप्यसुषुपतुः । प्रभाते समुत्थाय मेनावती मधुरास्वादां रसवतीं विनिर्ममे । बालचन्द्रः स्वस्थीभूय निजभार्यया निष्पादितां रसवतीमास्वाद्यशान्तवृत्तिर्निजापणमियाय । ततो निर्भयमानसा मेनावती चन्द्रसेनं कुशूलाद्बहिर्निष्कास्य यथेच्छं भोजयित्वा तेनसह भोगविलासाननुभूय दीनारमेकंवितीर्य तं व्यसृजत् । अथ तृतीयस्मिन्दिने चन्द्रसेनो निजमित्रस्य बालचन्द्रस्य हट्टं जगाम । तेन चन्द्रसेनः पृष्टः—भो मित्र ! किमिदानीं न दृश्यते भवान्, ग्रामान्तरं गतवान् किम् ? तद्वचनं समाकर्ण्य चन्द्रसेनोऽवदत्—मित्र ! अधुनात्वत्रैव तिष्ठामि, परन्तु परेद्युर्यद्वृत्तान्तं जातं तस्य वर्णनं किं करोमि ? इत्यभिधाय सर्वं तद्वृत्तान्तं तस्मै व्यवहारिणे निवेदयामास । बालचन्द्रस्तच्छ्रुत्वा प्रदीप्तक्रोधानलेन प्रज्वलितहृदयो मन्त्रौषधिभ्यामुपहतसत्त्वो भुजङ्गम इवोपशशाम । यतोऽसावदृष्टतत्कर्मत्त्वात्तमपि मनागुपालब्धुमसमर्थोऽभूत् । ततः स कियद्दिनानन्तरं निजचेतसिव्यचिन्तयत्—रे दैव ! किं कर्मपुराकृतं मया, येनातिदुष्टा मिलितेयमङ्गना । गृहस्थितो जारनरो न गृह्यते, किमत्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कार्यं निरुपायचेतसा ॥ १ ॥ सृतमुपायान्तरैः, अधुना सकलं गृहमेव प्रज्वालयामि, येन तन्मध्यवर्त्ती स दुष्टोऽपि भस्मीभवति । अन्यथा मदीयं मनः शान्तं न भविष्यति । इति निश्चित्यश्रेष्ठी निजसद्मस्थितानि सर्वाणि सारवस्तूनि स्वहट्टं निनाय। ततोऽन्यदा बालचन्द्रो विहितभोजनो गृहादापणं गत्वा मुहूर्त्तादनन्तरमेव जारपुरुषजिघृत्तया व्याघुट्य स्वगृहमागतः। द्वारदेशं प्राप्य तदुद्घाटयितुं तेन गाढोद्घोषणा विहिता, तदानीं मेनावती चन्द्रसेनेन सार्द्धं क्रीडारसमनुभवन्ती तत्कृतां घोषणां समाकर्ण्य स्वचेतसि परां चिन्तामवाप। सा विचिन्तयितुं लग्ना–अद्यमे महत्कष्टमापतितम् । नास्त्यस्य कष्टस्योद्धरणे कोऽप्युपायोऽवशिष्टः। इदंसर्ववृत्तान्तंतेन विज्ञातमस्ति। अस्तु किमेतच्चिन्तया ! यद्भावि तद्भविष्यति । सर्वेषां सत्त्वानां दैवमेव परमः सहायकोविद्यते। अतः सर्वं शुभं भविष्यति। इत्थं वितर्कयन्ती सा निजपितुर्गृहात्समानीतायां मञ्जूषायां चन्द्रसेनं पूरयित्वा तां संमुद्य कुञ्चिकाश्चस्वान्तिके रचित्वा द्वारदेशमागत्य निजपतिं सादरं गृहान्तरे प्रवेशयामास। अथपेटायां प्रसुप्तश्चन्द्रसेनश्चिन्तयति–अद्य मे पापरक्तस्य, मृत्युरेव न संशयः। किं मया धीविहीनेन, जारकर्मेदमाश्रितम् ॥ १ ॥ यदि जीवन् गमिष्यामि, दैवयोगादतः परम्। पुनर्नात्रसमेष्यामि, शिक्षा मे मिलिता दृढा ॥ २ ॥ प्रभो ! त्वं सर्वजीवानां, रक्षकः प्रणिगद्यसे। शरण्य ! दीनतापन्नं, मां समुद्धर दूषितम् ॥ ३ ॥ पुनर्नाहं करिष्यामि, कुकर्म पापवर्द्धकम्। दासोऽहमितिमांमत्वा, क्षमस्व परमेश्वर ! ॥ ४ ॥ इत्थं स्वापराधं मुहुः संस्मरंश्चन्द्रसेनोविषादपरायणो बभूव। इतोऽमर्षानलेनप्रज्वलितगात्रोबालचन्द्रोभूयसा वेगेन सकलंगृहंपर्यालोच्यक्काऽपिस्थले तं जारमनवलोक्य तद्दग्धुकामस्तत्रस्थितानि कानिचिदवशिष्टानि वस्तूनिभृत्यैर्बहिर्निष्कासयामास । निजपत्नीं मेनावतीं स प्राह–कान्ते ! त्वज्जनकावासं,

याहि त्वं सुखिनी भव। किं त्वया क्लेशकारिण्या, नास्ति मे त्वत्प्रयोजनम् ॥ १ ॥ मदीयं गृहमेतद्धि, ज्वालयामि न संशयः। संसारावासखिन्नस्य, कुतः स्यात्सद्विचारणा ? ॥ २ ॥ निजपतिवचनं निशम्य मेनावती तं प्रतिजगाद–स्वामिन् ! इदानीं भवतो हृदयं मिथ्याभ्रमेण विभिन्नं जातमस्ति, तस्मादेवेदृशी मलीमसा कार्यविमुखा भवदीया मतिकल्पना समुज्जृम्भिता। मज्जनकस्य पञ्चसहस्ररूप्यकाँस्त्वं धारयसि, द्विसहस्ररूप्यकक्रीतमिदं गृहमपि मत्पित्रा प्रदत्तं भुनक्षि। अतस्तदृणं वृथाकर्त्तुमयं समारम्भस्त्वया मण्डितः। त्वदीयः प्रपञ्चो मया विज्ञातपूर्वः, गृहं प्रज्वाल्य जठरपिठरं सुखेन पूरयिष्यसि तदहं विलोकयिष्यामि, इत्थं वदन्त्या बहुमानितायास्तस्याश्चतुर्थपत्न्या वचनमनादृत्य श्रेष्ठी तां दूरीकृत्य तद्गृहं यावत्प्रज्वालयितुं प्रारेभे तावन्मेनावती तं प्रोवाच–स्वेच्छाचारिन् ! भवदीयमिदं वेश्म खण्डशो विभिद्याधःपातय, किं वा वह्निना प्रज्वाल्य सद्योभस्मीकुरु, साम्प्रतं त्वां न निवारयामि। तथाऽपि ममजनकगृहाद्वस्त्राभरणसंरक्षणार्थं समानीतेयं मञ्जूषा मदीया वर्त्तते, तस्याः स्वामित्वं त्वदीयं नास्ति। अतस्तां मञ्जूषां गृहीत्वा यामि तदनन्तरमिदं गृहमेकदेशतः सर्वतो वा त्वयाप्रज्वाल्यताम्। एतावदुक्त्वा सा भारवाहचतुष्टयं समाकार्यतैस्तां पेटां समुत्पाट्यसमीपवर्त्तिनि कस्यचिद्-गृहान्तरे मोचयामास। ततः साधूर्त्ता प्रतिष्ठितान् पौरमुख्याञ्जनान्समाहूय निजाभिप्रायं न्यवेदयत्–अयं ममपतिर्भ्रान्तो–विपरीतमतिः स्वयम्। निर्हेतुकमिदं वेश्म, प्रज्वालयितुमुद्यतः ॥ १ ॥ न जाने कीदृशी बुद्धि–रस्याऽस्ति क्षुभितात्मनः। बालोऽपि स्वहितं वेत्ति, स्वावासं कोविनाशयेत् ? ॥ २ ॥ स्वहितं यो न जानाति क्रोधाम्बुनिधिमज्जितः। स नरो जायते लोके, क्लेशायैव पदे पदे ॥ ३ ॥ इत्थं मेनावत्याः प्रलापं निशम्य सर्वैर्नागरिकैर्वारितोऽपिस निजाग्रहं न मुमोच। वर्षशतैः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सिच्यमानोऽपि पापाणो न कदाप्यार्द्रतां दधाति । निजसङ्कल्पं सत्यापयितुकामः स सदुपदेशमपि नामन्यत,-यतः-अरण्यरुदितं कृतं, शवशरीरमुद्वर्त्तितम् । श्वपुच्छमवनामितं, यदुखरभूमिषु वर्षितम् । स्थलेऽब्जमवरोपितं, बधिरकर्णजापः कृतः । धृतोन्धमुखदर्पणो-यदबुधो जनः शिक्षितः ॥ १ ॥ बधिराग्रे वृथा गीतं, वृथावृष्टिर्महार्णवे । वृथा जन्म कुशीलानां, वृथामूर्खोपदेशनम् ॥ २ ॥ निजं शिक्षयतः सर्वाङ्गनानवमत्य बालचन्द्रो निजहस्तेनैव निजं गृहं प्रज्वालयामास । भस्मीभूते तस्मिन्गृहे तेन विज्ञातं पापिनस्तस्य जारस्य बलिदानमद्य यथार्थं सञ्जातमिति विदित्वा शान्तमनसा तेन जज्ञे । अथ मेनावती कार्यविधानदक्षा सन्ध्यासमयमासाद्यरहोगतांतां मञ्जूषामुद्धाट्य चन्द्रसेनं बहिर्निष्कास्य स्वस्थानं विसृज्य स्वयमपि मञ्जूषामादाय निजपितुर्गृहं जगाम । तत्र गत्वा सा साश्रुलोचनेव पितरं प्रावोचत-रे ! तात ! धूर्त्तेन तवातिवल्लभ-जामातृकेनाकुलितार्त्तिभागिनी । समागताऽत्रास्मिमदीयरक्षां, कुरुष्व तद्गेहमदाहि तेन ॥ १ ॥ इत्यादि मूलतः समारभ्यसर्वं वृत्तान्तं पित्रे निवेद्य सा तत्रैव दिवसान्निनाय । बालचन्द्रश्चान्यरथ्यायां भाटकेन गृहीते वेश्मनि निवासं चकार । ततोऽन्यदा बालचन्द्रो निजापणं गत्वा चिन्ताचान्तमानसः स्थितस्तावच्चन्द्रसेनः सोत्साहस्तदन्तिके समेत्यतं मिलित्वा तदीयमुखमुद्रां विच्छायां विलोक्य बभाषे-रे मित्र ! चिन्तयसि किं विकलस्वभावः, किं लक्ष्यसे स्मितविहीनमुखाकृतिस्त्वम् । किं वस्तु केन भवदीयमपाहृतं वा, दुःखं निवेद्य सुहृदं भव हीनचिन्तः ॥ १ ॥ इत्थं चन्द्रसेनगिरं निशम्य बालचन्द्रो विस्मयमवाप्य मनसि विचिन्तयति-रे दैव ! दीनमनसो ममकीदृशोऽयं, वर्वर्त्ति कर्मजनितः प्रबलोविपाकः । यद्दुष्टशिक्षणकृते गृहमात्मनीनं, प्रज्वालितं सतुहहाकुशलः समस्ति ॥ १ ॥ एवं विकल्प्य



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निःश्वासपरम्परां विमुञ्चन् स परमं विषादमवाप । ततश्चन्द्रसेनेन गतदिवस्य सकलं वृत्तान्तं निजमित्राय न्यगादि । पुनः स जगाद–मित्र ! प्रमादवशतोऽपि कदापि तत्र, नातः परं ककुभि हा गमनं विधास्ये । तद्दुष्टकर्मकरणाद्विरतोऽधुनाहं, प्राणक्षयोभवति येन सृतं तकेन ॥ १ ॥ इति चन्द्रसेनगदितं वचनं निशम्य बालचन्द्रः स्वमनसि व्यचिन्तयत्–अहो ! कीदृशमेतदाश्चर्यम् ? कस्याग्रे निवेदनीयमिदम्, अयं क्षत्रियसुतो मदीयभार्यया सह रतिसुखं भुनक्ति, तच्च सकलं वृत्तान्तं मदन्तिके समागत्यमां निवेदयति । तथाऽपि स जारोमद्धस्तगतो न भवति । अतोऽस्मिन्कार्ये मया क उपायो विधातव्यः । इति पर्यालोचयतस्तस्य मनसीतिविस्फुरितम् । अनेनैव क्षत्रियसुतेन निजश्वशुरमिदं वृत्तान्तं श्रावयित्वा तदात्मजाया दुराचारं ज्ञापयित्वा गृहदहनादिकश्चसर्वं ख्यापयित्वा तस्य मनःसमाधानं करोमि । यद्वृत्तान्तविज्ञानेन तस्य क्रोधाग्निः प्रशमिष्यति । एवं निश्चित्य बालचन्द्रो निजश्वशुरालयं जगाम । संजातरोषंश्वशुरं निरीक्ष्यविनम्रमूर्त्तिः स प्रार्थयन्प्राह–पूज्य ? क्षमस्व बतमामकमेकदोषं, दोषप्रबन्धमपि शिष्टजनाः क्षमन्ते । कृत्वा प्रसादमतुलंमयि भोजनार्थं, प्रातस्त्वया मम गृहे गमनं विधेयम् ॥ १ ॥ यतस्त्वं सर्ववृत्तान्तं, मदीयंज्ञास्यसिस्फुटम् । तदैवतवसन्तापो–नंक्ष्यति नैवसंशयः ॥ २ ॥ इति बालचन्द्रस्यदृढाग्रहेण तेन निमन्त्रणं स्वीचक्रे । ततस्तेनबालचन्द्रेण चन्द्रसेनोऽपि भोजनार्थं निमन्त्रितः । द्वितीयस्मिन्दिने बालचन्द्रेण मधुरास्वादा विविधप्रकारा रसवती प्रगुणीकृता । भोजनावसरे निजश्वशुरश्चन्द्रसेनश्च समायातौ, ताभ्यां सह बालचन्द्रः स्नानंविधाय परिहितविशुद्धवसनास्तेत्रयोऽपि भोक्तुमुपविष्टाः । विचित्रस्वादसिद्धानि भोज्यानि समास्वाद्यतृप्तिमापन्नाः पूगीफलताम्बूलादिकं गृहीत्वा ते चैकस्मिन्वेश्मभागे निषेदुः । मेनावत्यपि किञ्चिद्दूरे निषण्णाऽस्ति । तदानीं बाल-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





चन्द्रो निजभार्यायाश्चरित्रं ज्ञापयितुं चन्द्रसेनं सविनयं जगाद–प्रियबन्धो ! ययाप्रमदयासार्द्धं तव मैत्रीप्रसङ्गोऽस्ति तस्या वृत्तान्तं यथामां प्रत्यहं कथयासि, तथैवेदानीं तद्वृत्तान्तं निवेदय । श्वशुर ! मत्प्राणतोऽप्यधिकप्रियोऽयंमेसुहृदस्ति । अस्मिंश्च कलानिधानेक्षत्रियकुमारे सा वामलोचनादृढं स्नेहं धारयति, तथैवाऽस्यपुरुपस्य तया प्रभूतं प्रियं विहितं परन्त्वि-दानीं दैवयोगेन तयोर्वियोगोऽजनि । अयं क्षत्रकुलोद्भवः प्राप्तमहाविद्यः समग्रकलासुकोविदः समस्ति । इत्थंतत्प्रशंसां विधाय योग्यस्थानेतं संस्थाप्य बालचन्द्रस्तुष्णीं तस्थौ । निजचातुर्यकलादिप्रशंसांनिशम्य प्रफुल्लगात्रश्चन्द्रसेनस्तद्वृत्तान्तं व्याख्यातुं प्रारभत । तदुच्यमानं स्वकीयंवृत्तान्तंश्रुत्वा तद्दृष्टिगोचरमागत्य मेनावती झटिति लज्जां शिथिलीकृत्य चन्द्रसेना-भिमुखं व्यलोकयत् । स्वचेतसि तयाविज्ञातं स एवायं चन्द्रसेनो मम सहचरो मदीयभर्त्तुरग्रेरहसि कृतं कर्माऽधुनानिवेदयति । पुराऽपि खल्वनेनैव सर्वं वृत्तान्तमस्याग्रे निवेदितमिति संभाव्यते । यतोऽनयोर्मैत्रीप्रसङ्गः प्राचीनो विद्यते । अधुना महाऽनर्थ-जनकः परिणामः समुपस्थितः । यद्यपि स्वयं सर्वं जानाति, परन्त्वद्यमात्पितरंसमाहूयाऽयमन्यमुखेन मदीयमसच्चरित्रंख्यापयि-तुमिच्छति । इदानीं मयाकिंकर्त्तव्यम् ? इदं वृत्तान्तं यदि मत्पिताज्ञास्यति तर्हि मे का गतिः ? इति विचिन्त्य सा चन्द्रसेनं निजसङ्केतंज्ञापयितुं मुखमुद्रां प्रकाशयन्तीस्वाङ्गुलीनां परावर्त्तनेन नेत्रयोः सञ्चालनेन कपोलदेशेदक्षिणकरतलस्थापनेनेदं वृत्तान्तंत्वयानख्यापनीयमिति सूचयामास । ततोऽञ्जसाविज्ञातमेनावतीचेष्टितश्चन्द्रसेनो निजहृदि विज्ञातवान्–यदियं भार्या बालचन्द्रस्यैवविद्यते, पुरा या वार्त्ताऽस्याग्रे मित्रभावेनमया प्रकाशिता तदतीवासमीचीनं कृतम् । अधुनाऽहमस्यश्वशुरस्यपुर-स्तात्तां वार्त्तामभिधातुमुद्यतोऽस्मि । अस्य परिणामो दुःखावहो भविष्यति, अतोऽहमुपायान्तरंचिन्तयामीतिविचार्य सावधानी-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूय मित्रभयात्तेनसर्ववृत्तान्तन्तु निवेदितम् । पश्चात्तेनस्वचातुर्येण श्रेष्ठी बभाषे–महेभ्य ! एवंविधमानन्दमहं स्वप्नावस्थायां प्रत्यहमनुभूयापि जाग्रदवस्थायां किमपिनापश्यम् । इति युक्तियुक्तंतदीयंवचनं श्रुत्वा बालचन्द्रोऽवदत्–चन्द्रसेन ! त्वंप्रतिवासरं मांयद्वोचस्तत्स्वप्नगतं वा साक्षादनुभूतम् ? सप्रोवाच–महेभ्य ! तत्सर्वं स्वप्नविलसितमेव सत्यं कुतो भवेत्, यद्येन दिवानिरीक्षितं श्रुतं वा भवेत्, तत्तेन नरेण स्वप्नगतं सर्वं साक्षादनुभूतमिव विलोक्यते । ममाऽप्येतादृशंव्यसनंवर्तत-मस्ति । इत्थं चन्द्रसेनस्यव्यलीकंवचनं निशम्य बालचन्द्रो विच्छायवदनोनिजमनसिव्यचिन्तयत्–अहो ! मयामूढेन मूर्ख-वदाचरितं केवलं पश्चात्तापाय सञ्जातमेतत् । विनाऽपराधेन मया कान्तायास्तिरस्कारो विहितः ! सर्वसमृद्धिभाजनं गृहमपि प्रज्वालितम्, एतादृशं महानर्थप्रदंकार्यं मदन्यः कःसमाचरति ? । इत्थं शोचमानः स स्वकीयश्वशुरस्याग्रे विलक्षीभूय विनम्राननस्तुष्णीं तस्थौ । ततस्तच्छ्वशुरो विज्ञातवृत्तान्तस्तं बहुधोपालभ्यस्वनिकेतनं जगाम । अथ बालचन्द्रेण विज्ञातम्, इयमङ्गनासदाचारा मदनुवर्त्तिनी निष्कलङ्काविद्यते, अस्याश्चकिमपिदूषणं नास्त्येवेति जातप्रत्ययः स स्वकीयभार्यां मेनावतीं पूर्ववत्संभाव्य गृहस्थाश्रमोचितानिकार्याणि शान्तवृत्त्या विदधे । चन्द्रसेनोऽपि निजोपार्जितधनं गृहीत्वा स्वस्थानं प्रययौ । इत्थं स्त्रीचरित्रवृत्तान्तं कथयित्वा चत्वारस्तेप्रधाना अरिमर्दनभूपालं पुनः प्राहुः–नरेन्द्र ! अनयामेनावत्या निजसहचरस्य-रक्षणार्थं कीदृग्विधा युक्तिप्रपञ्चा विहिताः ! अतः सुधीभिः सर्वदा स्त्रीचरित्रेभ्यो दूरतः स्थेयम् । यतः–मधुरं भाषतेयोषिद्-हृदयंक्षुरिकोपमम् । चिन्तयत्यन्यदेवासौ, विदधात्यन्यदेव सा ॥ १ ॥ अतः सा समयंप्राप्य साहसं कार्यं न जहाति, स्त्रीणां प्रपञ्चजालान्यनेकविधानिसन्तीतिविज्ञाय तासां वचने प्रत्ययः केनचित्पुरुषेण कदापि शुभमिच्छतानविधेयः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





इति श्रीजगद्विभूषणशासनमहोदधिशीतरश्मि स्वपरसमयपारदर्शि तपोगच्छदिवाकर भव्यजनतारक प्रातःस्मरणीय योगनिष्ठाध्यात्म-ज्ञानविभाकर श्रीमद्बुद्धिसागरसूरीश्वरशिष्यरत्न श्रीमद्-अजितसागरसूरिविरचितेऽजितसेनशीलवतीचरिते शीलवतीप्रदत्तनिजशील-प्रभावोद्द्योतकसततविकसितकमलनिरीक्षणसमुद्भूतद्वेषभावमावहद्भिररिमर्दनभूपस्य कुमतिभिः प्रधानैस्तच्छीलवैतथ्यख्याप-नार्थं मुधाऽभिहितपातालसुन्दरीमेनावतीदृष्टान्तद्वयवर्णनाधिकारे तृतीयः प्रस्तावः समाप्तिमगमत् ॥ ३ ॥





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## ॥ अथचतुर्थःप्रस्तावः ॥

चराचरं येन विलोकितं जग-द्विशुद्धविज्ञानवरैकचक्षुषा। तंदेवदेवं प्रणमामिसन्ततं, श्रीपार्श्वनाथंशुभवल्लिवारिदम् ॥१॥ अथैतानि प्रधानगदितानि वचनानि निशम्य सुमतिशाली सुमतिचन्द्रोऽरिमर्दनभूपं बभाषे-नायमेकान्तवादोमन्तव्यः। यतः-शैले शैले न माणिक्यं, चन्दनं न वने वने। साधवो नहि सर्वत्र, मौक्तिकं न गजे गजे ॥ १ ॥ राजन्! बहुरत्ना वसुन्धरा। अतोऽस्मिञ्जगति नानाविधा नरानार्यश्च विद्यन्ते, सर्वे देहिनः समानबुद्धयोनदृश्यन्ते। मुख्यतस्तेषां चत्वारो भेदाः शास्त्रे प्रदर्शिताः सन्ति। तद्यथा-पूर्वं पुरुषभेदानाह-अनुकूलोऽथदक्षश्च, शठोधृष्टस्तथैवच। चतुर्धा पुरुषोज्ञेयः, कार्याकार्य विचक्षणः ॥ १ ॥ तत्राद्यस्यलक्षणमाह-सदाशान्तस्वभावः शोभनाननच्छविर्मनोहरसौरभ्योद्भासिशरीरः प्रसाधनमन्तराऽपि स्निग्धकुन्तलो विकसद्देहलावण्यो रमणीयतरकरचरणाद्यवयवो वस्त्राभरणादिपदार्थेषु स्वल्पाभिरुचिः प्रायो लघुहस्तपादविन्यासः कुन्दकुमुदबन्धुसमानावभासमानदशनश्रेणिः स्वल्पनिद्रासुखो विगततन्द्रः सूक्ष्माहारोह्रस्वोपस्थः शुद्धवसनप्रियोगभीरमधुरवाग्विस्तरः शय्यासनादिभोग्यपदार्थेषु परिमलस्वच्छतां समीहमानः सङ्गीतशास्त्रेऽधिकमनोवृत्तिः शूराग्रयायी धृतसंग्रामोत्सवः सततमुदारचेतोवृत्तिः पाणिगृहीतभार्यायामेवपरमं सन्तोषं मन्यमानो यो नरो भवति स प्रथमोऽनुकूलोऽभिधीयते। द्वितीयो यथा-उत्तमलक्षणलक्षितः प्रशस्यतरस्वभावः सर्वदा पवित्रचित्रादिषु प्रीतिमान् शुद्धशीलगुणविराजितमानसो भव्यतरशरीरकान्तिर्विज्ञातसमयतारतम्यो रसभावोर्जितसत्काव्यविधाने धृतोत्साहः सत्कार्यकलाकलापेषु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दक्षमतिः सर्वजनानन्ददायकः परप्रीतिवल्लिवितानजीमूतः संगीतशास्त्ररसास्वादनविदूरः स्वचातुर्येण समुचितवचनं ब्रुवाणो निजस्वभावेनैव परनारीगणं सहोदरमिवप्रेक्षमाणः सततं सदाचारेण वनिताजनमनोरञ्जकः प्रतापैकमहानिधानः स्मितानना यो भवेत्स दक्ष इति निगदितः । तृतीयो यथा प्रत्यक्षेप्रियवादरतः कपटजालैः सम्भृतहृदयकुहरः परित्यक्तदैवभवदरः परसत्त्वानां निरागसामपि महानर्थकरः स्थूलतरकरो विशालवक्षःस्थलो बृहन्नितम्बाभोगः कुर्मवद्वृत्ताङ्गश्चञ्चलनयनः क्रूरतरशरीराकृतिः स्वल्पलज्जः कामक्रीडासुलम्पटः शाखामृगइवातिचञ्चलचित्तः सुतरामसत्यवादरतः सततं स्वकार्यसमर्थने बद्धकक्षो लाभाऽलाभवृद्धिक्षयविज्ञानविकलहृदयो योभवेत्स शठः समुदाहृतः । चतुर्थो यथा-स्थूलतरमुखकेशमस्तकः स्फारतरनेत्रयुगलः पारिप्लवमनोनयनव्यापारोह्रस्वतरकरचरणशिरोधरोऽलघिष्ठनितम्बबिम्बोदीर्घतरपादतलोभूरितरक्रोधनिद्रः प्रमोदबहुलः कपटकोटिनिधानः पैशुन्यप्रमुखदुर्गुणग्रसितमानसः परित्यक्तसकलजनविस्रम्भःप्रीत्यादिगुणगणाऽनभिज्ञो बहुलभोजी विहितदम्भवृत्तिराविदितसर्वसत्त्वभयो निर्लज्जतया सारमेयवत्कामसेवी विहितोपकारेषु जनेषु सततमुपद्रवविधानप्रवणः कुकृत्यसमाचरणे सदोद्यतमतिस्त्रिकालसाक्षीभूतस्य जगत्प्रभोरपि भयमनाशङ्कमानो योऽस्मिन्भूतले विचरति सधृष्ट इत्यभिहितः । भूपते ! इत्थं चतुर्विधं नरलक्षणं प्रदर्शितमधुना स्त्रीभेदांस्त्वं शृणु-पद्मिनी, चित्रिणी, हस्तिनी, शंखिनीचेति । तत्राद्या यथा-विद्वज्जनश्लाघ्यगुणश्रेणिः शशाङ्कानुकारिवदनमुद्रा हाटकोपमशरीरच्छविः कर्णान्तविश्रान्तलोचना कोकिलकण्ठी मधुरभाषिणी सिंहवत्तनुकटिः कम्बुवत्कमनीयकण्ठनाला कमलवत्कोमलकरचरणा शुकवन्निम्ननासिकायष्टिः कदलीस्तम्भसमानप्रवरोरुर्भुजङ्गभोगायमानस्निग्धकेशपाशा प्रवालखण्डोष्ठसुषमा कुन्दोज्ज्वलदशनश्रेणि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हंसगमना बृहत्कनककलशवत्पीनस्तनी प्रक्षीणनिद्राहारहास्यकेलिर्निजदेहपरिमलपुञ्जेन परितोदिग्विभागान्सुरभीकुर्वन्ती सद्बुद्धिप्रभावा कोमलस्वभावा महोन्नतमनाः प्रभुपूजोत्सुकमानसाऽनवरतं देवगुरुभक्तिपरायणा पूर्णप्रेमाभिलाषामादधाना कुलमर्यादानुपालिनी लज्जावतीनामग्रचारिणी पवित्रवर्त्मानुसारिणी या मानिनी भवेत्सा पद्मिनीति निगद्यते। द्वितीया यथा—नितान्तपारिप्लवनयना दृढतरधीरचेतोवृत्तिः कमलदलवत्कोमललोचना केसरद्युतिशरीरकान्तिर्नीलाञ्जनसमस्निग्धकुन्तलकलापा विडम्बितगजगतिविभ्रमा भ्रमरभ्रमप्रदभ्रकुटीनिवेशा केकानुकारिवाणीविलासा मधुरप्रियवचनविन्यासा काव्यशील्पसंगीतचित्रकलाभिः सकलजनानन्ददायिनी प्रेमरसोत्पादने दक्षमतिर्विविधमानसिकचातुर्यबलशालिनी नातिह्रस्वदीर्घशरीरावयवा नातिस्थूला स्वल्पक्रोधावेशा शुद्धवस्त्रालङ्कारप्रिया प्रक्षीणप्रमादा या भवेत्सा चित्रिणीकथ्यते। तृतीया यथा—दीर्घकरयुगला लघुमस्तकाकारा लम्बमानवक्षोजा प्रकामिमायामचरणा मनागुष्णकरतलाऽऽयामतरदेहयष्टिः प्रचण्डामर्षपूरितस्वान्ता, कुटिलगत्या पृथिव्यां पादप्रक्षेपं कुर्वन्ती स्थूलनासिका बृहदोष्ठभ्रूकुटिः खर्वकरशाखानिकरा विनम्रशिरोधराऽनारतं तीव्रकामाभिलाषा क्षीणतरलज्जावेशाऽत्याहारकारिणी क्रूरतमस्वभावा करिमदानुकारिशरीरपरिमला स्थूलतरकटिवदनविभागा कपटेर्ष्यादिदुर्गुणवासितमानसाऽनवरतं पैशून्यवृत्त्योपजीवन्ती पिङ्गकेशी या नारीभवेत् सा हस्तिनीत्यभिधीयते। तुर्या यथा—विपुष्टाङ्गी भृशं क्षुधितस्वभावा तीक्ष्णरुक्षरोमराजिर्मर्कटवत्पिङ्गनयना गन्धकवद्विनिन्दनीयशरीरस्वेदा दुर्विवेकविशालशाला गृहकृत्याकृत्यानभिज्ञा वक्रप्रलापकारिणी तीव्रक्रोधान्धनयनाऽतिरुक्षस्वरोदया सर्वदारतिभोगेष्वतृप्तात्मा मृषावादिनी सर्वथात्यक्तमर्यादा दुष्टस्वभावा निजपतिवचनं परित्यज्य स्वेच्छयाप्रवर्त्तमाना विद्युद्वच्चञ्चलमनोवृत्तिः सदा क्लेश-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





प्रिया प्रीतिमार्गस्यविद्वेषिणी परित्यक्तकुलरीतिर्या नारीभवेत्साशंखिनीत्यभिधीयते। इत्थं सुमतिचन्द्रः सम्यक्श्रवण-तत्पराणामरिमर्दननृपतेस्तत्प्रधानानाञ्चाग्रे पुरुषनारीणां भेदानुक्त्वा पुनः प्रोवाच—राजेन्द्र! अस्मिञ्जगति सज्जना अपि वसन्ति, तथैवदुर्जना अपि वसन्ति, गुणिनोऽपिसन्ति दुर्गुणिनश्चापिसन्ति, तस्मादनेन प्रधानचतुष्टयेन भवतोऽग्रे यानि दृष्टान्तानि कथितानि तानि सर्वाणि दुर्गुणाङ्गनानामेव। साम्प्रतमहं सद्गुणशालिन्याः स्त्रिया एकां वार्त्तां ब्रवीमि, तां सावधाना यूयं सर्वे शृणुत। पुरा प्रतिष्ठानपुरे विद्वज्जनमूर्द्धन्यः सर्वगुणसंपन्नः शशिचन्द्रनामा कश्चित्पण्डितोन्यवात्सीत्। तस्य यशोभद्रा भार्याऽभूत्। तयोश्चैकाभूरिप्रेमास्पदं निर्जितदेवाङ्गनाङ्गलावण्या सुभद्राभिधाना पुत्री बभूव। प्राप्तनवयौवनां तां विवाहयोग्यां विलोक्य यशोभद्रा मधुरवचसा निजस्वामिनमवादीत्-प्राणप्रिय? अस्मत्पुत्रीं सुभद्रां यौवनारूढां किं न विलोकयसि? साम्प्रतं सा विवाहयोग्या जाताऽस्ति, ततोऽचिरादेव तद्योग्यमुचितगुणरूपशालिनं विद्यावित्तसमन्वितं वरं विशोध्य तेन सार्द्धंपुत्रींपरिणाय्य संसारसुखमनुभवाव। एवं निजभार्योदितं वचनं योग्यतमं विज्ञाय शशिचन्द्रस्तद्वचनं प्रमाणीकृत्याऽविलम्बतया निजाभीष्टं किञ्चिदपि नगरंगत्वाकस्यचिद्गृहस्थस्य गुणचातुर्यकलानिधानममितरूपं कुमारं प्रसन्नीकृत्य तस्मिन्नेवसमये विवाहसंबन्धं विधाय लग्नदिवसं शुभं निर्धार्य स्वगृहमाययौ। निजभार्यायै सर्वंतद्वृत्तान्तं निवेद्य शशिचन्द्रोविवाहोचितसंभारान्मेलयितुमुद्युक्तोऽभवत्। तदन्तिके किञ्चिदपि धनं नासीत्, ततः स व्यचिन्त-यत्-स्वयं विद्वानस्मि, अस्मिन्नगरे लब्धप्रतिष्ठोऽस्मि, अतोऽस्मिन्कार्ये प्रभूतधनव्ययोमे भविष्यति। प्रागेवतत्प्राप्त्युपायोमया विधातव्य इति विचार्य स्वबुद्धिप्रभावेण नूतनमेकं श्लोकं विरचय्य प्रजापालनाम्नस्तन्नगराधिपतेः समीपं गत्वा शुभा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शीर्वादं दत्त्वा निजवाञ्छितं जगाद-महाराज ! मम कन्यकाया विवाहसमयः संप्राप्तस्तत्रसहस्रद्वयं रूप्यका अपेक्ष्यन्ते । निष्किञ्चनोऽहं भवदन्तिके समागतोऽस्मि । तस्मादिमं श्लोकं ग्रहणके गृहीत्वा सहस्रद्वयं रूप्यकान्मह्यं देहि, भवदीयं महान्तमुपकारं गणयिष्यामीत्यभिधाय तं श्लोकं श्रावयित्वातत्पत्रं तस्मै स समर्पितवान् । तत्पद्यं यथा-"न भवतियन्नहिभाव्यं, भवति हि भाव्यं विना प्रयत्नेन । करतलगतमपिनश्ये-न्नास्तिहि भवितव्यता यस्य" ॥ १ ॥ ततो नृपतिस्तत्पत्रस्थितं श्लोकं गृहीत्वा निजपार्श्वे विमुच्य रूप्यकाणां द्विसहस्रं प्रदाय तं पण्डितं व्यसृजत् । लब्धेष्टधनः शशिचन्द्रोऽपि स्वगृहमागत्य महोत्सवपुरःसरं पुत्रीविवाहं साधयामास । इतः प्रजापालभूपतिना कतिचिद्दिनानि तत्पण्डितदत्तं श्लोकपत्रं निजान्तिके रक्षितम्, ततः कियति काले गते तत्पत्रं विस्मृतीभूयालक्ष्यतां गतम्, अन्यदा राज्ञा तद्गवेषणा बहुधा कारिता, तथापि तत्प्राप्तिर्नजाता । तदा भूपतिना चिन्तितम्-यदिसपण्डितस्तच्छ्लोकानयनार्थमागमिष्यति, तर्हि तस्मै किमुत्तरं दास्यामि ! मदन्तिके तन्नास्तीति कथनेन शुद्धव्यवहारोमेकलङ्कितो भविष्यति । यदि तेन सकले धने प्रदत्ते तदीयं श्लोकं न ददामि तर्हि लोकेऽपि यावज्जीवमपयशस्तिलकं स्याद् । तस्मादिदानीं किं कर्त्तव्यं मयेति चिन्तया व्यग्रमानसो भूपतिर्यावदास्ते तावच्छशिचन्द्रः सकुसीदं मूलधनं समादाय नृपमन्दिरमभ्येत्य राज्ञोऽग्रे रूप्यकराशिं चकार । भूपतिस्तद् द्रव्यराशिं निरीक्ष्य निजमानसे व्यचिन्तयत्-जगत्पते ! विद्यमानेयं राज्यलक्ष्मीर्विनश्यतु, वा ममोपरितीक्ष्णखड्ग प्रहाराः समापतन्तु, किंवाऽस्मिन्नेव समये मे मृत्युर्भवतु, एतत्सर्वं वरं मन्ये । परं मदीया बुद्धिर्धर्मपथाद्विच्युता मा जायताम् । इत्थमनेकधा नृपतिः स्वचेतसि परमात्मनः स्तुतिं कुर्वन्नास्ते तावत्पण्डितोऽवदत्-राजन् ! इमे भवद्दत्ता रूप्यकास्त्वया

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





गृह्यन्ताम्, मद्दत्तः श्लोको मे प्रत्यर्प्यताम्। एतादृशं पण्डितवचनं निशम्य नरपतिरभाणीत्–विद्वद्रत्न! भवता यद्धनं दत्तं तेन साम्प्रतं नास्ति मे प्रयोजनम्, त्वरां किमर्थं करोषि, तावतैवधनेन सकलानि मे कार्याणि भविष्यन्तीति त्वया न मन्तव्यम्। तेनैव नास्ति मे कर्त्तव्यसंकेतः, भवतो वेश्मनिस्थितमपि तद्धनं मद्गृहेनिपतितमेव जानामि। भवदीयम विश्वासं मनागपि न चिन्तयामि, भवान्प्रसन्नीभूयेदं धनं गृहीत्वा सुखेन निजगृहं प्रयातु। समयान्तरे त्वयैतद्यथेच्छं दातव्यम्। एवंविधं नृपतिवचनं निशम्य पण्डितेनाभाणि–भूपते! अधुना प्रयोजनमन्तरा परकीयं धनं किमर्थं रक्षामि! प्रतिदिनं कुसीदवृद्धिं तुरङ्गमा अपि न प्राप्नुवन्ति। तथाविधा लोकश्रुतिरपि गीयते–"यद्येकेन रामेण दशाननस्य नगरी लुण्टिता तर्हि द्वादशभिस्तादृशै रामैः किं न विधीयते!" तच्छ्रुत्वा राजाऽवदत्–विद्वन्! अस्य धनस्य व्ययस्त्वया सुखेन विधीयताम्, अस्य धनस्य कपर्दिकामात्रमपि कुसीदं मयानापेक्ष्यते, किञ्च कदाचिदस्य वित्तस्यापेक्षा मम जनिष्यति तदा भवतः पार्श्वान्मूलमात्रमेवद्रव्यं गृहीष्यामि। इति नृपतिवचनं प्रमाणीकृत्य धनराशिं च समादाय पण्डितः स्वस्थानं जगाम। अथ भूपतिर्निजमानसे व्यचिन्तयत्–अधुनात्वापतितं कार्यं मया निर्वाहितं तथाऽपि स श्लोकः कस्मिन्नपि समये पण्डिताय प्रत्यर्पणीयो मया नूनम्, तस्य लब्धिस्तु सर्वथा न विद्यते। अतस्तत्प्राप्त्यर्थं कश्चिदुपायो मयाऽवश्यं विधातव्यः। इति चिन्तयतो नृपतेस्तच्छ्लोकस्य स्वान्तिके चिरस्थायित्वात्स्मृतिः समुत्पन्ना, यस्य चेदमादिमं पदं (न भवति) इति साध्यविषयं विधाय धृतधैर्यः स्वराज्यधुरं विश्वस्ताय निजामात्याय प्रदायस्वयं यात्रानिमित्तेन देशान्तरं जगाम। ततो भूपतिः परिभ्रमन्क्रियद्भिर्दिवसैर्विविधशोभाभिर्विभूषितेऽतीवमनोहरे मदनपुराभिधे पत्तने जग्मिवान्। यद्यपि स्वयं राज्यधरः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षत्रियकुलचूडामणिर्वर्त्तते, जन्मतः प्रारभ्य कस्मिन्नपि समये दुःखलेशं श्रुतिगोचरं नाकरोत्, तथाऽपि स साम्प्रतं विपत्ति-ग्रहग्रस्तो मार्गजनितश्रमक्षुत्पिपासानिद्रादिकष्टमनुभवन्नपि प्राप्तां विपत्तिं विनाशयितुं निजवचनञ्च परिपालयितुं मदनसेन-नरेशस्य तन्नगराधिपतेः शुश्रूषां चिकीर्षुः सन् सर्वजनानपृच्छत्—शीतातपक्षुत्पिपासादिविविधदुःखैः शुष्कश्यामशरीर-त्वादयं राजकुमार इतितं कोपिनाज्ञासीत् । ततो दीनावस्थोऽयं कश्चिद्वैदेशिक इति विज्ञाय मदनसेननरेशेन निजपुत्र्याः सेवाकृते स रक्षितः । तदानीं प्रजापालभूपेन नभवतीति स्वाभिधानं प्रख्यापितम् । तेन सर्वे नागरिका नृपा-मात्यादयो नभवतीत्याख्ययात माजुहुवुः । अथ नवहायना सा राजकन्यका प्रतिवासरं पाठशालायामध्येतुं प्रयाति, तया सह तद्रक्षणार्थं नभवतीतिसंज्ञकः प्रजापालः सदा व्रजति । पुनरध्ययनान्ते नृपकन्यां समानीय नृपराज्योः स्वाधीनां चकार । तस्यां पाठशालायां बहवो बाला विद्याभ्यासमकुर्वन्त । तत्रामात्यन्यायाधीशदुर्गपालानां तिस्रः पुत्र्यः पठितुमव्रजन्, ताभिः सार्द्धमस्या राजपुत्र्याः सुदृढाप्रीतिर्जज्ञे । भोजनपानविहारादिकमपिताश्चतस्रः सहैव कुर्वन्तिस्म, क्षणमात्रमपि ता वियोगं सोढुं नशेकुः । विद्याभ्यासे दक्षमतयस्ताः कियता कालेन सूक्ष्मबुद्धिप्रभावेण काव्य-कोशव्याकरणन्यायरहस्यं विज्ञायान्यान्यपिशास्त्राणि पेठुः, नवीनग्रन्थरचनामपिताश्चतस्रः स्वयमेवविदधुः । शिल्पादि-विविधकलाकलापेषु पारगामिन्यश्च बभूवुः । प्रभूतगुणसंपन्ना महारत्नसमानास्ताः संप्रेक्ष्य सर्वेनागरिकास्तन्मातापितरश्चा-मन्दंहर्षंभेजुः । प्रेमदृष्ट्या ताएव निरीक्ष्य सर्वेजनाः स्वनेत्रसाफल्यं मेनिरे । अथान्यदाचतस्रस्ताः सहचर्यः संमील्यसंस्थिता-स्तस्मिन्समये प्रधानपुत्री जगाद—प्रियसख्यः ! साम्प्रतमस्माकं यादृक्त्वं गाढस्नेहनिबन्धनमस्ति, तादृशमेव सर्वदा तत्स्थास्यति ?

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अस्मिन्विषये मदीयंमनः साशङ्कं तिष्ठति, अधुना त्वस्माकमभिन्नं हृदयं विद्यते, शरीरमात्रेण भिन्नतां दधामः, भोजनासनपानादिकाः सकलाः क्रियाः सहैवाचरामः। सुखदुःखवृत्तान्तमपि परस्परं निवेद्य मनःसमाधानं कुर्मः। तथाप्येतत्सुखं स्वल्पदिनान्येव पश्यामि, यतः स्वस्वमातापितृभ्यां परिणयनसमये प्रदत्ता वयंभिन्नभिन्नदिग्वर्त्तिन्यो भविष्यामः। अतोऽस्माकं वियोगोयथानस्यात्तथोपायः प्रागेवाऽस्माभिर्विधातव्यः। इति प्रधानसुतागादितं वचनं निशम्य राजसुता प्रोवाच– प्रियसख्यः? वयं सर्वाः प्रशस्तगुणसम्पन्नं रूपसौन्दर्यशालिनं सकलकलावित्तं मेधाविनमेकंनरं प्रसन्नीकृत्यपितृजनानपृष्ट्वा गुप्तरीत्यागान्धर्वलग्नेन परिणयामस्तर्हि यावज्जीवमस्माकं प्रीतिसंबन्धोऽविच्छिन्नतया तिष्ठति, स सम्बन्धः कस्मिन्नपि समये न विनंक्ष्यति। इदं राजकन्यकोक्तं वचनं ताभिस्तिसृभिः प्रमाणीकृतम्। पुनर्नृपाङ्गजाऽवादीत्–सख्यः? अस्माकमस्मिन्पत्तने नगरश्रेष्ठिनो लालचन्द्रस्य सूनुर्भ्रातृचन्द्राऽभिधानोऽनवद्यरूपगुणलावण्यनिधानो लक्षणतोऽप्यधिकतरशोभां धारयन्विराजते। तेन महेभ्यसूनुना पाठशालायामस्माकं विद्याशिक्षणार्थं महान्प्रयासोविहितोऽस्ति। अस्मिन्पत्तने तदीयं गृहं महर्द्धिजुष्टं निगद्यते, जनेष्वपि प्रतिष्ठितकीर्त्तिरसौश्रूयते। तस्मात्तेन सार्कं लग्नमस्माभिर्विधातव्यमेवंकृतेकापिक्षतिर्नसंभाव्यते। प्रथमन्तु भ्रातृचन्द्रस्याऽभिप्रायः कीदृशोऽस्तीति परीक्षितव्यमस्माभिः। इत्थं निश्चयं विधायैकां पत्रिकां लिखित्वाताभिश्चतसृभिस्तस्यां स्वहस्ताक्षरं कृत्वा नभवतिनाम्ने स्वानुचरायदत्त्वा कथितम्, इदंपत्रं लालचन्द्रनन्दनाय त्वयादेयम्, पुनस्तद्दत्तं पत्रं समादाय शीघ्रमागच्छेति शिक्षयित्वाताभिः स विसृष्टः। गृहीताज्ञः स दूतोवर्त्मनिगच्छन् तत्पत्रमुन्मुद्य स्वयं वाचयित्वा पश्चान्महेभ्यगृहं गत्वा तत्पुत्राय तां पत्रिकां प्रादात्, भ्रातृचन्द्रेणापि तत्पत्रोत्तरं संलिख्य तदानीं तस्मै दूताय समर्प्य पश्चात्प्र-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हितः। दूतोवर्त्मन्यागच्छंस्तदपि पत्रं स्वयं वाचयित्वा निजस्थानं समागत्य ताभ्यः प्रादात्। ततः परस्परपत्रव्यवहारेण कियान्कालस्तासां व्यतीयाय। अथैकस्मिन्दिने कस्मिंश्चित्स्थानेतेन श्रेष्ठिसूनुना सार्द्धं मिलित्वाताभिरिति निश्चयोविहितः, अमुकस्मिन्वासरेऽमुकस्थानेऽमुकसमये शुभेमुहूर्त्तेकमपि पुरोहितं साक्षीभूतं विधाय गान्धर्वविधिनाऽस्माभिः पाणिग्रहोऽवश्यं संपादनीयः। इत्थं संकेतं विधाय ते सर्वेस्वस्वस्थानंजग्मुः। एतद्वृत्तान्तं तदितरः कोऽपि न जानाति, अनक्षरज्ञोऽयंदूतस्तु-वराकोऽस्मत्संकेतं किञ्चिदपि न वेत्तीति विज्ञाय भ्रातृचन्द्रसमेताभिः कन्यकाभिः साहसिकंकार्यमिदं समारब्धम्। यतः—सहसा विदधीत न क्रिया-मविवेकः परमापदां पदम्। वृणतेहिविमृश्यकारिणं, गुणलुब्धाः स्वयमेवसंपदः ॥ १ ॥ इति नानाविधेषु नीतिवाक्येषु यद्यपि स्वयं कुशलाः सन्ति तथाप्येततत्साहसं विधातुं समुद्यतास्ताः किञ्चिदपि नापेक्षन्ते स्म। तथाऽप्युत्तरस्मिन्कालेदैवनियोगात्किंभविष्यतीति न विज्ञायते। यतः-भाग्यं फलति सर्वत्र, न च विद्या न च पौरुषम्। समुद्रमथनाल्लेभे, हरिर्लक्ष्मीं हरोविषम् ॥ १ ॥ अथ विज्ञाततत्कार्यरहस्यः सदूतस्तासां लग्नदिनादर्वाग्दिवसे लालचन्द्रश्रेष्ठिनोगृहं गत्वा तदन्तिके स्थित्वा प्रथमं प्रासङ्गिकं वार्त्तालापं विधाय पश्चात्स्वसमीहितमवोचत्-महेभ्य ! श्वोभवतो गृहे समागन्तुं ममावकाशो भवेन्नवा तस्माद्द्यवासरे लौकिकार्थं समायातोऽस्मि। ईदृशं वज्रपातसममशुभं 'नभवतिवचनं' निशम्य कम्पमानशरीरः श्रेष्ठी प्रोवाच-नभवते ! कस्य लौकिकार्थं त्वं समागतः ? कृपांविधाय शीघ्रं तन्निवेदय। तदा स जगाद-श्रेष्ठिन् ? त्वन्तु मां सम्यक् जानासि, सर्वदाऽहं राजसद्मनि तिष्ठामि, नृपतेः कन्यकां रक्षामि, ताञ्चगृहीत्वा पाठशालायां सततं गच्छामि, पुनरध्ययनान्ते गुर्वनुज्ञातां तां समानीय नरेशितुः समीपे स्थापयामि। यद्यवकाशो मिलति तदात्व-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दीयमापणं समागत्य किञ्चिन्मात्रमुपविशामि । तेन स्नेहसम्बन्धेनाऽहं भवदहितं कार्यं ज्ञात्वाऽपि भवन्तं न कथयामि तर्हि कृतघ्नो भवामि । इति विदित्वा त्वां विबोधयितुं सत्त्वरमहं समागतः । तद्यथा—श्वोनिशायां नृपामात्यन्यायाधीशदुर्गपालानां चतस्रः कन्यास्तवाङ्गजेन साकं गान्धर्वविधिना लग्नं विधातुं राजविलासोद्याने समेष्यन्ति, अतोयुष्मत्पुत्रस्यमरणं नृपहस्तेनैव भविष्यति । यद्येतत्कार्यात्तवसूनुंत्वं निवारयिष्यासि तदपि चतसृभिस्ताभिरेवतव पुत्रोहनिष्यते, उभयथाऽपित्वत्पुत्रस्य मरणं नूनं भविष्यति । मन्येऽहमधुना तवपुण्यं क्षीणतरं विद्यते । इत्युक्त्वा स यावदुत्थाय गच्छति तावत्तस्य करं गृहीत्वा श्रेष्ठी निजान्तिके स्थापयित्वा तं प्रणिपत्यसविनयंपप्रच्छ—बन्धो ! ममपुत्रो यथाजीवन्भवेत्, केनचित्साकंवैरश्चनस्यात्तादृशः कश्चिदुपायोविद्यते ! अस्तिचेन्मय्यनुग्रहं विधायसद्यस्तंब्रूहि । ततः सदूतोऽवदत्—महेभ्य ? अस्मिन्समये काश्चिदन्यमुपायं नजानामि, परन्त्वेकंसाधनं विद्यते तच्छृणु—दुर्बलावस्थोऽहं गृहस्थितस्वजनदुःखपरम्परयाभृशंपीडितो गृहंपरित्यज्यात्रसमागतोऽस्मि, भवतःस्नेहवशाद्यदि मरणदायकमिदंदुश्चिन्त्यं कार्यं विद्धामि तदा तवपुत्रो जीवेन्नाऽन्यथा । एवं कृते सति मदपत्यानां पालकोऽस्मिंल्लोकेकोभवेद् ? तेषाञ्चपोषणं भवान्कुर्याच्चेदहं सर्वसारभूतममूल्यमिदं जीवनं परित्यज्यत्वत्कार्यं साधयामि । इत्थं नभवतिवचनं निशम्यतत्कथनानुसारेण श्रेष्ठिना निजसूनुश्चतुर्दिनंरहसि रक्षितः । ततः श्रेष्ठिना राजसेवकोऽभाणि—प्रियबन्धो ? यद्यस्माकमिदंमहाकष्टं निर्विघ्नतया दूरीभविष्यति तदातुभ्यं वा तवापत्येभ्यो दशसहस्रदीनारान्दास्यामि, इतिसत्यंजानीहि, नभवतिरुवाच—व्यवहारिन् ! निश्चिन्तोभव, मयि जीवतितवपुत्रस्य किञ्चिदपिव्यलीकं कर्त्तुंप्राये णकोऽपि समर्थोनास्ति । इत्थं श्रेष्ठिनं समाश्वास्य तत्पार्श्वाद्द्रस्योचितवस्त्राभरणादिकं समादाय निजवस्त्राञ्चलेनतत्सर्वं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निबद्धयस्वस्थानंप्रययौ। द्वितीयस्मिन्दिनेप्रातः समुत्थाय नभवतिः स्वनियमानुसारेण दैनिकं सेवाकार्यं निर्वाह्यनिशायां निजस्थानमभ्येत्य वस्त्राभरणादिसमेतो राजविलासोद्यानं जग्मिवान्। स्वस्यजीर्णानि वसनानि निजाङ्गात्समुत्तार्यमहामूल्यानि वस्त्रालङ्करणानि तेनपरिहितानि। स्त्रयंचत्रवंशे समुत्पन्नो राज्यासनभागी च विद्यते, पुनर्वरराजस्य रत्नवसनालङ्कारान्परिहितवान्, अधुनातच्छोभायाः किंवर्णनं क्रियते? वर्त्मनिप्रयान्तमेकं पुरोहितमपि भाटकेनगृहीत्वा निजान्तिके स्थापयित्वा नभवतिः कन्यानामागमनंप्रतीक्षमाणः कालं यापयतिस्म। गाढान्धकारच्छन्नायां तमस्विन्यां श्रमखिन्नावुभौतदेकध्यानपरायणौ शीतेनसङ्कुचितगात्रौ स्तेनवत्तुष्णींतस्थतुः। तावत्ताश्चतस्रः कन्या देवदर्शनं निमित्तीकृत्य दासदासीवर्गमपहाय चैकस्मिन्स्यन्दने समुपविश्यविलासोद्याने समाजग्मुः। रथादुत्तीर्य यावन्नभवतेः सन्निधौ ता गच्छन्ति, तावत्प्रथमतः सञ्चितया विवाहसामग्र्या पुरोहितेन नभवतिना साकंपाणिग्रहंकारयित्वासत्वरं विवाहविधिस्तासां समापितः। ततोलब्धेष्टदक्षिणः पुरोहितः स्वस्थानंययौ। अथ वरसमेतास्तास्तदुद्यानवर्त्तिराजभवनं तद्रक्षकेन समुद्घाट्य दीपोद्द्योतं कारयित्वातस्मिन्प्रासादे सुखविलासार्थंजग्मुः। ततःसुखोपविष्टास्तावरंविलोकयन्त्यः स्तब्धा अजनिषत, किमधुना कर्त्तव्यं किमुवक्तव्यंचेति विचारशून्यहृदयास्ता विनम्राननाः भूतलबद्धदृष्टयोऽभूवन्। तदानीं नभवतिना राजसुता पृष्टा–नृपनन्दिनि? भवत्या मनोभिलाषा संपूर्णा किंसमजनि? साऽवदत्–'नभवतियन्नहिभाव्यं,' एतावदुक्त्वा सा तुष्णींबभूव। तथैवतेनपृष्टा प्रधानपुत्री जगाद–'भवति हिभाव्यंविनाप्रयत्नेन'। इति पठित्वासाऽपिविरराम। ततस्तृतीयां न्यायाधीशदुहितरंसजगौ–किंतवमनोभिलषितं सफलं जातम्? तदानींसाप्यवादीत्–'करतलगतमपिनश्येत्,' इत्थंनिगद्यसाऽपि मौनमुखीजाता। अथतुर्यां दुर्गपालात्मजांसबभाषे–

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





त्वदीयमनोरथः किंसिद्धः ? तदासावभाण–'नास्तिहि भवितव्यतायस्य' ॥१॥ इत्यभिधाय सापिगृहीतमौनाऽभूत्। एवमनुक्रमेणैकैकंपादं निगद्य ताश्चतस्रः कन्याः स्वस्थानंययुः। अथनभवतिस्तुतदुक्तैश्चतुर्भिःपादैः संपूर्णश्लोकं संलिख्य स्वान्तिके धृत्वा निजमानसे व्यचिन्तयत्–अहो ? कोऽस्म्यहम् ! सर्वं राज्यभारं परित्यज्य कस्मादत्रसमागतोऽस्मीति संस्मृत्य पुनःपुनर्दैवमाहात्म्यं संस्तौति, प्रभो ? अचिन्त्यगतेस्तव महिमानं किंवर्णयामि ? रे दैव ? शशिचन्द्रपण्डितस्यैकः श्लोकोमया निष्काणां सहस्रद्वयप्रदानेन गृहीतोऽभूत्, सचश्लोको दुर्भाग्यवशात्कुत्रचिन्मयापातितस्तस्मात्तं पण्डितं कथं मुखंदर्शयामीति चिन्ताग्रस्तेन मया करदीकृतस्यास्यलघुनृपतेर्वेश्मनिक्षुद्रजनोपभोग्यं दासत्वमङ्गीकृतम्, तदपि ममाभिलषितसिद्ध्या सफलं जातम्। रे दैव ? करस्थितोऽप्यलक्षतांगतोऽयंश्लोको देवाङ्गनासमानं विद्याकलादिष्वपिलब्धप्रावीण्यं कन्याचतुष्टयञ्च मयासमासादि, तत्सर्वंतवैव चेष्टितंविभावयामि। तव प्रत्युपकारं कर्त्तुं केनाऽपि प्रकारेणाहमक्षमः। एवं प्रभुगुणमहिमानं विचिन्तयतस्तस्य सकला रजनी सुखेन व्यतीयाय। प्रभाते समुत्थाय सज्जीभूतो नभवतिर्नृपतेः सकाशात्प्रयाणाज्ञां गृहीत्वा निजदेशमभ्यगात्। कियद्भिर्दिवसैर्निजपुरमधिगम्य सर्वान्नागरिकान्निजदर्शनेन प्रमोदयन्निजप्रासादं जगाम। द्वितीयस्मिन्दिने सभासीनो निजपरिजनपरिवारितः प्रजापालभूपतिः शशिचन्द्रपण्डितं समाकार्यतंश्लोकंतस्मै वितीर्य रूप्यकाणांद्विसहस्रं प्राभृतीचकार। लब्धश्लोकः शशिचन्द्रो राजप्रसादं गृहीत्वा प्रमोदपूरितमानसः स्वस्थानमियाय। ततोऽन्यदा प्रजापालनृपतिः स्वमनसिव्यचिन्तयत्–पुरामदनपुराभिधेनगरे चतस्रः कन्याः परिणीयप्रच्छन्नोऽहमत्र समागमम्। ताः किमन्यं पुरुषं परिणीतवत्यः ? किम्वा ममनामस्मरणं कुर्वन्त्योऽधुनाऽपिमां प्रतीक्षन्ते ? तत्परीक्षायै तत्र मयागन्तव्यमिति



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निश्चित्यपुनः स्वकीयराज्यव्यवस्थां मुख्यामात्यायदत्त्वा यात्रामिषेण स मदनपुरमभीयाय । तत्रैकस्यां धर्मशालायामुत्तारकं परिकल्प्य राजवंशोचितवसनाभरणानि परिधाय नगरचेष्टांविलोकितुं स बहिर्ययौ । इदानीमनेन प्रजापालेन निजनामाऽपह्नुत्य भानुसिंहेत्यभिधानं प्रकटीचक्रे । नगरान्तरे परिभ्रमन् भानुसिंहो लब्धप्रतिष्ठस्य धनाढ्यस्य कस्यचिद्व्यवहारिणोहट्टस्यान्तिकेगत्वा किमपि विलोकमानइव तस्थौ । तदानीं हट्टस्थितोमहेभ्यस्तं निरीक्ष्य दीव्यकान्तिचिन्हैरयं राजकुमार इति विज्ञाय तं सत्कृत्यसमुचितस्थानेन्यवेशयत् । मिथस्तयोर्वार्त्तालापं कुर्वतोर्भानुसिंहोऽवकाशंलब्ध्वा नृपादिकन्यानां विवाहसम्बन्धिवृत्तान्तमपृच्छत्–तदामहेभ्योऽवादीत्–चतस्रोनृपादिकन्याः स्वयंवरमहोत्सवमिच्छन्ति, किन्तु तासां मातापितरस्तं निषेधयन्ति । अतस्ताश्चतस्रः सम्प्रति न्यायसद्मनि न्यायावलोकनं कुर्वन्ति । तासां न्यायाऽन्यायविज्ञानकौशल्येन प्रजानांमनोरञ्जनेनच प्रसन्नहृदयो भूपतिस्ताभ्यएवेदं दुःसाध्यं न्यायकार्यप्रादात् । इत्थं व्यवहारिणो मुखात्तासां गुणचातुर्यं निशम्य तन्मीलनेऽतीवोत्सुकोऽपि भानुसिंहोविचिन्तयन्कमप्युपायंनालभत । केननिमित्तेन तत्रमया गन्तव्यम् ? केन प्रकारेण तासामग्रे ममप्रसिद्धिर्भवेदिति विचारयता तेनेति स्वमनसिनिश्चितम्, केनाऽपि जनेनंसह क्लेशोमयाविधातव्यः येन तासां समीपे ममगमनं सद्यो भविष्यति । इत्थं दृढीकृत्याग्रे व्रजतस्तस्यवर्त्मनिमनोहर एकः प्रासादो दृष्टिगम्यो वभूव । तत्प्रासादद्वारदेशे महानेको दुन्दुभिस्तेन विलोकितः । ततस्तेन तद्वृत्तान्तं तन्मार्गगामीकश्चिन्नरः पृष्टः । तेन पान्थेन तदा निवेदितम्–रे वैदेशिक ? अस्मिन्मनोरमे प्रासादे दीव्यकान्तिश्चातुर्यकलाकोविदाऽनङ्गसेनाभिधा गणिका निवसति, तया चायंदुन्दुभिः संस्थापितः । यस्यतत्समागमेच्छा भवति सविलासी नर इमं दुन्दुभिंस्पृशति, अस्यताडने सपादलक्षरूप्यकाणां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्ययोभवति । यस्यैतादृग्धनप्रदाने सामर्थ्यं भवेत्सैवनरस्तंताडयित्वा गणिकायाः समागमंलभते । अन्यथातन्मुखदर्शन-मप्यन्येषां जनानां नजायते । इतिपान्थगदितं वृत्तान्तं श्रुत्वाभानुसिंहो व्यचिन्तयत्–दुर्बलेनकेनचित्साकं वैरंविधाय न्याय-मन्दिरेयद्गन्तव्यं तत्तुनीचजनसेव्यं निन्दनीयंकर्म लोकेगण्यते । तस्मादिदं गणिकागृहगमनं श्रेष्ठं विद्यते, यतश्चोक्तम्–मारयितव्यश्चेद् द्विपेन्द्रोहन्तव्यः लुण्टनीयश्चेत्निधानोऽपहर्त्तव्यः किम्वाऽनार्यसंगमान्महद्भिः साकंविरोधोऽपि वरमितिविचार्य तस्य दुन्दुभेः समीपंगत्वा दण्डौ गृहीत्वा स यावद्बलं तंताडयामास । येनध्वनिना सकला नागरिकाः च्चणं धृतबाधिर्याबभूवुः । तं ध्वनिंश्रुत्वाऽनङ्गसेनाऽपि धृतोत्साहा निजकार्यं परिपूर्णं जातं प्रभूतधनप्राप्तिरद्यमे भविष्यतीति मन्यमाना निजदासीभिः परिकरिता स्वासनात्सहसासमुत्थाय तं कुमारं समानेतुं सन्मुखमागत्य स्वागतोक्तिंव्याहृत्य शुभशब्दानुच्चारयन्ती निज-रङ्गभवनेनिनाय । बहुधा तस्य सत्कारक्रियां विधायानर्घ्यरत्नमयेप्रवरासनेतमुपवेश्य स्वयमपि योग्यासनभाग् बभूव । ततोऽनङ्गसेनयाच्चणं वार्त्तालापं विधाय निजप्रतिज्ञातं दुन्दुभिवृत्तान्तं तस्मैन्यवेदि । तदा भानुसिंहस्तामुवाच–वाराङ्गने ! धनसम्बन्धिनी काऽपि चिन्ता त्वया नविधेया । ततोऽनङ्गसेना तेन साकं क्रीडितुमियेष । तदभिप्रायं ज्ञात्वा भानुसिंहः प्रोवाच–अनङ्गसेने ! यथात्वं निजाभिलषितनियममास्थाय संस्थिताऽसि, तथैवाहमपि स्वप्रतिज्ञातनिर्वाहकोऽस्मि । तद्यथा–यद्वृत्तान्तमहं कथयामि तस्य निर्णयं मे मनःसम्पादकं यथार्थं करोषिचेत्त्वयासाकं भोगविलासान्कर्त्तुमिच्छामि, त्वत्प्रति-ज्ञातं धनश्चतुभ्यं प्रयच्छामि । अन्यथा कपर्दिकामात्रमपि न ददामि, मदुक्तमिदं वचनं तव मान्यं स्याच्चेदत्र तिष्ठामि । नोचेत्त्वं स्वकार्यसक्ता भव, अहमपि मार्गाभिमुखो भवामि, नह्येतावता कस्यचित्किञ्चिद्गतम् । इत्थं नृपवचनं तयाऽप्यङ्गीचक्रे ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततो भानुसिंहो निजाभीष्टां वार्त्तां वक्तुं प्रारभत–सकलसमृद्धिनिदानमानन्दपुराभिधं यथार्थसंज्ञं पत्तनमस्ति, तस्मिन्मणिचन्द्रनामा जनमान्यएकोविद्वान् वसतितस्यसर्वगुणसंपन्नः सकलकलाकलितो राज्यकार्यविधाने निपुणमतिः सर्वजनसद्बुद्धिप्रदायको लोकप्रियः सतां सदामान्यो मणिसेनाभिधेयः पुत्रो वर्त्तते। प्राप्तसद्गुणः सर्वजनोपकारकः सद्वृत्तः स मणिसेनो निजगृहमागत्य स्वमातापित्रोरग्रे स्वपराक्रमस्य वार्त्तां यदा निष्कासयति तदा तत्पिता तदसहमान इव सहसा तद्वार्त्तां त्रोटयित्वा तिरस्कारवचनैस्तं भर्त्सयति। प्रतिक्षणश्चतं कथयति–अद्याऽपित्वं किञ्चिन्नजानासि, बुद्धिलेशोऽपि त्वयि न विद्यते, मूर्खशिरोमणिरेवत्वमसि, ईदृशानि निन्द्यवचनानि प्रयुञ्जानस्तज्जनकस्तस्यपत्न्यां शृण्वन्त्यां तज्जीवितं कपर्दिकोपमं करोति। तथापि मौनं सर्वार्थसाधकमिति विचिन्त्य मणिसेनो जनकोक्तं सर्वं सहमानो निरुपद्रवस्तिष्ठति। परन्तु तदसह्यं दुःखं कियत्कालं सोऽपि सहते ? ततोऽन्यदा स्वपत्न्यां संस्थितायां मणिसेनस्तत्पित्रा परुषवाक्यैर्भृशं तिरस्कृतस्तस्माद्भूरिक्रोधेन तप्यमानो मणिसेनो निजपितुर्मारणस्य निश्चयं कृतवान्। ततो निशायां तत्पिता महानसेभोक्तुमुपविष्टस्तदानीं मणिसेनः समीपवर्त्तिनः कस्यचित्क्षत्रियस्य गृहात्खड्गं समानीय गुप्तवृत्त्या महानसद्वारस्य पृष्ठभागेनिलीय स्वमनसीत्थं विचारयति–भुक्त्वाऽसौ मुखप्रक्षालनार्थं यावद्बहिर्निःसरति तावदनेन खड्गेन तस्य शिरश्छेदं करोमि। तथाकृते शीतवारिणा पामा विनंक्ष्यति। इत्थं विचिन्तयति तस्मिन्वारिरिक्तं कलशं दृष्ट्वा भोजनं कुर्वाणस्तत्पिता स्वभार्यां प्रतिजलमयाचत। तद्भार्या जलं ददती निजपतिं प्रति कथयति–स्वामिन्! अस्मदीयः पुत्रो गुणगणालंकृतो राजमान्यः सर्वत्र लब्धप्रतिष्ठो विद्यते. तस्य तिरस्कारं तत्पत्नीसमक्षं प्रत्यहं त्वं करोषि तद्योग्यं न जायते। अयं पुत्रो महाक्षमावान् वर्त्तते,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ईदृक्षैर्भवदुक्तैः परुषवाक्यैरपि विनयमर्यादामसौ न जहाति, उच्चस्वरेण प्रत्युत्तरमपि न ददाति, अस्मद्वचनं कदापिनोल्लङ्घयति, ईदृग्विधं विनीतपुत्रं विनाऽपराधेनक्षुद्रवचनैर्निर्भर्त्स्यतस्यापयशोविस्तारयसि तद्योग्यं नाचरसि । प्रत्युतस्त्वकीयं मुखं निम्नं जायते । इति निजभार्यावचनं श्रुत्वा मणिचन्द्रेण कथितम्–प्रिये ! एष सूनुर्ममापकर्त्ता नास्ति, मत्प्राणेभ्योऽप्यधिकवल्लभोऽस्ति, अस्मिन्राज्येतस्य प्रतिष्ठासुष्ठुतरा श्रूयते, जनमुखादस्यगुणानां प्रशंसां निशम्य मम मानसं भृशंतुष्यति, किञ्चास्मदीयं परकीयं वाऽपकारं कदापि करोति तादृशाः कुत्सिता गुणास्तस्मिन्नसन्ति, तथाऽपि तस्य प्रशंसामहं न करोमितत्कारणं शृणु–बाल्यावस्थोऽयमधुना वर्त्तते, दुर्बलव्यवहाराणामस्माकं लब्धविद्योयमेकाकीसूनुर्विद्यते । यद्यहंतस्य प्रशंसां करोमितर्हिमदाविलोमत्तेभइवसर्वान् जनांस्तिरस्कृत्यस्वेच्छाचारी भवेत् । अस्मानपि नगणयेत् । लघुज्येष्ठानां मर्यादाचारमुल्लङ्घ्य प्रवर्त्तेत । चिरकालीनभूरिश्रमेण सम्पादितां सद्विद्यांपरित्यज्याऽसन्मार्गोपसेवनेन नीतिविवेकप्रमुखान्सद्गुणाननासेवमानो बहुविधान्दुर्गुणान्स्वीकृत्य स्वकुलंकलङ्कयेत् । अतस्तन्निरोधायप्रतिदिवसंतत्कीर्त्तिवल्लीप्रसाराय भाविगुणसम्पद्वृद्ध्यर्थञ्च तस्यमूर्ध्नि शिक्षावचनाङ्कुशोमया संस्थापितः । न तु तस्याहितेच्छया मदुपक्रमस्त्वया ज्ञातव्यः । किञ्चतस्मिन् शिक्षाङ्कुशनिवेशनेनतद्भार्यापि कुमार्गमपश्यन्ती नीतिमार्गानुचारिणी भविष्यति । यतः– अश्वः शिष्यश्च बालश्च, प्रमदा च विशेषतः । चत्वारस्त्रासदानेन, सिद्ध्यन्ति न तु लालनात् ॥ १ ॥ यथाऽरण्यकाष्ठजन्यो मृदङ्गश्चर्मावगुण्ठितमुखोऽपि करप्रहारमन्तरा मधुरस्वरं न नर्दति, तथैव हे कान्ते ? महाविज्ञं सकलकलासुनिपुणं यं सूनुं मातापितरौ लालयन्तौ स्वमुखेन यदिश्लाघां कुरुतस्तर्हि स्वल्पेन कालेन स गुणहीनो भवत्येव । उक्तश्चान्यत्र–प्रत्यक्षे गुरवःस्तुत्याः, परोक्षे मित्रबान्धवाः ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कर्मान्ते दासभृत्याश्च, । पुत्रो नैव च नैव च ॥ १ ॥ तस्मान्निजापत्यादिषु पित्रादिभिः सदाशिक्षाङ्कुशो नियमेन धर्त्तव्यः । इत्थं निजपतिवचनंनिशम्यमणिसेनमाता मौनमुखी तस्थौ । एवं महानसवर्त्तिनोर्मातापित्रोर्हितवचनानिशृण्वानो मणिसेनो झटिति समवबुद्धः स्वमनसिव्यचिन्तयत्-हा दैव ! मम मातापितरौ मद्धितायसततमुद्योगं कुरुतः, अहन्त्वद्य पितृवधाय-खड्ग गृहीत्वा सज्जीभूतः । कीदृशमेतद्घातकजनोचितं कर्म मयाचिन्तितम् ! रे दैव ! अस्मिन्समये महापापिनो मे जनको हितवचनानि नाकथयिष्यच्चेत्स्वल्पेन कालेन महाऽनर्थोऽभविष्यत् । इतिपश्चात्तापं प्रकुर्वाणो मणिसेनस्तस्मात्स्थाना-च्छनैर्निःसृत्य निजकरस्थितं खड्गं तत्स्वामिनेदत्त्वाव्याघुट्य महानसे समागत्य भोजनंकर्त्तुमुपविष्टः । भोजनानन्तरं पूर्ववन्नि-जविद्याभ्यासं विधाय स्वनियमानुसारेण निजजनकशुश्रूषायां व्यापृतोऽभूत् । चरणसेवां कुर्वाणो मणिसेनः सविनयं पितरं प्रोवाच-जनक ! येन पुरुषेण मानसिकः पितृहननदोषोविहितस्तद्विशुद्ध्यर्थं तेन किं प्रायश्चित्तं विधातव्यम् ! इति मणिसेनप्रश्नं श्रुत्वातत्पितासर्वंतदीयंचेष्टितं ज्ञातवान्, ततस्तमब्रवीत्-सूनो ! एष मानसिकपितृघातदोषस्त्वयैवोपार्जितो नत्वन्येन, तस्मात्सत्यं ब्रूहि, कीदृशं तत्स्वरूपं जातमितिशीघ्रं निवेदय । इति पितृवचनं शृण्वतो मणिसेनस्य नेत्रयुगलान्नि-पतन्त्यश्रुधारा निजतातस्यचरणकमलमसिञ्चत् । ततो विज्ञाततदाशयो मणिचन्द्रस्तमाश्वास्य स्वास्थ्यंनीतवान्, तस्मिन्क्षणे मणिसेनेनहस्तौ नियोज्य विनयवृत्त्याक्षमां याचित्वायथावृत्तं मारणचिन्तनादिसर्वं वृत्तान्तं पितुरग्रे न्यवेदि । अथ विज्ञात-सर्ववृत्तान्तो मणिचन्द्रस्तनयमचीकथत्-नन्दन ! सभार्यस्त्वं प्रभाते तवश्वशुरालयंव्रज, तत्रचैकं हायनं निर्मानतयात्वंतिष्ठ, यतस्त्वंपितृहननचिन्तनदोषान्मुक्तोभविष्यसि । एवं निजपितुर्वचनं स्वीकृत्य प्रभातकाले निजवस्त्रादिकं समादाय भार्या-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





समेतो मणिसेनो मातापितरौ प्रदक्षिणीकृत्य प्रणम्यचगृहीताऽऽशिष्कोगृहान्निरीयाय। सततप्रयाणेन वर्त्मनिव्रजन् सप्तभिर्दिवसैः स निजश्वशुरालयं प्राप। श्वशुरपत्नीयैस्तयोः स्वागतं चक्रे, चत्वारि दिनानिभोजनाच्छादनादिभिरुभयोः सत्कारः सम्यग्विहितः। यतः प्राघूर्णकाविमाविति विज्ञाय तैस्तौ सन्मानितौ। पश्चमे वासरे समागते चेयं लौकिकोक्तिस्तयोः सत्यासमजनि, प्रथमे वासरे प्राघूर्णको द्वितीयस्मिन्दिने पणकतृतीयांशसमानस्तृतीयस्मिंश्च वासरे यस्तिष्ठतितस्यबुद्धिर्विनष्टेति निगद्यते। तथैवानयोः प्रतिदिनंश्ववद्भोजनं कुर्वतोर्दिनानि प्रयान्ति, पराधीनतयागृहाट्टालिकायामुभौदम्पती शयनंकुरुतः। गृहवासिनो जनाश्च निजान्तिकस्थायिनो जनान्पृच्छन्ति–जामातुरत्रागमने को हेतुः? निजदेशगमनवार्त्तामप्यसौ न करोति। तद्वृत्तान्तंतैः श्रेष्ठिसुतासमाचख्ये, तदासा प्रोवाच–अहन्तुकिञ्चिदपि न जानामि। एवं गच्छता कालेन तयोः षण्मासा-व्यतीयुः। ततोऽन्येद्युर्मणिसेनभार्या निशीथसमये गुप्तसञ्चारा तत्समीपंगत्वाऽपृच्छत्–स्वामिन्? अत्र कतिपयदिवसानी-दृशप्रकारेण स्थातुमिच्छा वर्त्तते? नागरिकाः सर्वे गृहवासिनो जनाश्चमां प्रत्यहं पृच्छन्ति, कदागमिष्यथः? इति तेषां किमुत्तरं ददामि! अतः कृपां विधाय प्रयाणसमयं निवेदयतुभवान्। मणिसेनस्तांजगौ–प्रिये! अधुना किं वदामि! प्रयाणकालस्य महान्विलम्बो विद्यते, तस्मात्प्रच्छन्नगमना त्वं गृहवर्त्तिनी भव। अधुना गमनवार्त्ता त्वया न विधेया। यदा गमनावसरो भविष्यति तदाऽहं त्वां ज्ञापयिष्यामि। इत्थं पतिवचनं स्वीकृत्य सा गृहान्तरे जगाम। जामाता सुता च किमर्थमत्र समागाताम्? भूयान्समयो व्यतीतस्तथाऽपि सहागमनकारणमुभौ न ब्रुवाते, इति मणिचन्द्रादिषु चिन्तयत्सु तयोर्दिवसद्वयोनमेकं वर्षं जातम्। तद्दिनस्य निशीथे निजभार्या पूर्ववदागत्यमणिसेनं प्रयाणावसरं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पप्रच्छ—तदासोऽवदत्—वामनयने ! त्वं प्रातर्ममान्तिकमागच्छेः, परेद्युरावयोर्निजदेशे प्रयाणं भविष्यति नूनम् । इति निजस्वामिनोमुखाद्वचनं निशम्य ज्ञातप्रयाणावसरा सा गृहाभ्यन्तरे गत्वा शयनाधीना बभूव । प्रभाते समुत्थाय-स्नानादिकां क्रियां निर्वृत्यविहितनित्यनियमो मणिसेनः स्वस्थीभूय लब्धावकाशः श्लोकमेकंलिलेख—स यथा—प्राप्तव्यमर्थं लभते मनुष्यः, शक्तो न तं नाशयितुं हि देवः । ततो न मे विस्मयशोचनार्त्ति—र्यत्स्वीयमेतन्न परस्यभावि ॥ १ ॥ इत्थं श्लोकाङ्कितं पत्रं निजभार्याहस्ते विमुच्य तामेवं स प्रोक्तवान्—इमं श्लोकं गृहीत्वा त्वं विपणीं व्रज, योहि सपादलक्षं धनं दद्यात्तस्मैनरायायं श्लोकस्त्वयाप्रदातव्यः । इति शिक्षयित्वा तद्विक्रयाय तां विपण्यांप्राहिणोत् । साऽपि स्वभर्त्तृनिदेशात्तं श्लोकं गृहीत्वा राजवर्त्मन्येकस्मिन्स्थाने तस्थौ । इतस्तन्नगरवास्तव्यः कश्चनसिंहनामा कोटीधनपतिरेको व्यवहारी बभूव, तस्य चत्वारः सुता आसन्, तेषाममीचन्द्राख्यो ज्येष्ठनन्दनोमहान्दक्षोऽभूत् । तस्य चैतादृशः स्वभावोऽभवत्, यः कश्चिन्नूतनं पदार्थं विक्रेतुं समागच्छति तस्य यथाभिलषितं धनं दत्त्वा तन्नवीनं वस्तुस्वयं गृह्णाति । अथ तत्रस्थितां श्लोकपत्रहस्तां तां स्त्रियंदृष्ट्वाऽमीचन्द्रस्तत्सन्निधौगत्वाऽपृच्छत्—प्रमदे ! त्वं किं विक्रेतुं संस्थिताऽसि ? तयाभामिन्या निजपतिनोदितं सर्वं श्लोकवृत्तान्तं तदग्रे निवेदितम् । तच्छ्रुत्वाऽमीचन्द्रो निजचेतसि विचारयति—यदसौ नारी श्लोकस्यैकस्य सपादलक्षं धनं मूल्यं वदति तत्सत्यमेव संभाव्यते । गृहीतोऽयं श्लोकः कस्मिन्नपि समये कार्यसाधको भविष्यति, वृथानैव भविष्यतीति निश्चयं विधाय तस्यै सपादलक्षं धनं दत्त्वा स श्लोकस्तेन गृहीतः । ततो धनसमेतां तां स्त्रियं तत्पितुर्गृहं प्रैषीत् । साऽपि प्रमुदिता निजस्वामिनोऽन्तिके गत्वा सर्वमेतद्धनं स्थापयतिस्म । मणिसेनस्तद्धनराशिं निरीक्ष्य निजश्वशुरं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





समाहूय निजगाद—पूज्यपाद ! द्वादशमासान्यावद्युष्माभिर्ममपरिचर्या प्रभूता विहिता, तस्मादियंसमृद्धिर्भवतास्वीक्रियताम्। मह्यश्च प्रयाणाज्ञांदेहि, आगामिनिवासरे मे जिगमिषावर्त्तते। ततः श्वश्रूश्वशुरौ पारवेश्मिका अन्येऽपि जनाश्च जामातुर्महान्तं पराक्रमं समवलोक्य विस्मयंप्रापुः। सभार्यो महेभ्यस्तुपश्चात्तापं कुर्वंश्चिन्तयितुं लग्नः, द्वादशमासान्यावदसौ जामाता परोपजीवीव पराधीनतया जठरपिठरं रोट्टकखण्डैः पूरयतिस्म। पराक्रमशालिनमिमं तर्जयता मया महानपराधो विहितः। अद्यावधि काऽपि निपुणताऽस्य न दृष्टा, क्षणादयं धनराशिः कुतोऽनेनमेलितः? किमेतज्जातम्? कस्याप्यग्रे निजसत्त्ववृत्तान्तमनेन न प्रकटीकृतम्, इत्थंचिन्तयन्तः पौरजना अपि स्वस्वस्थानं जग्मुः। अथ प्रभाते मणिचन्द्रः सभार्यः स्वदुहित्रे विविधानिवस्त्राभरणानिप्रदाय निजजामात्रेचतां सकलां सम्पत्तिं वितीर्यस्वापराधं क्षमयित्वा शुभलग्नवेलायां पुत्रीजामातरौ निजपुरं प्रेषयामास। एवं सभार्येण मणिसेनेन निजजनकाज्ञैकवशंवदेनवर्षमेकं श्वशुरालये स्थित्वा मानसिकपितृहननदोषो निवारितः। इतस्तेनाऽमीचन्द्रेण सपादलक्षमूल्य एकः श्लोको गृहीत इति विदित्वा तस्यत्रयोऽनुजाः परंविषादमवापुः, मिथस्ते प्रोचुः—इमाः सर्वाः सम्पत्तयोऽस्माकं सर्वेषां वर्त्तन्ते, नत्वेकाकिनो ज्येष्ठभ्रातुः। कथमनेनैकाकिनाऽस्मानपृष्ट्वामुधाधनहानिकरमिदं कार्यं विहितम्? अतोऽसौ ज्येष्ठबन्धुरचिरेणास्मान्भिक्षार्थिनः करिष्यति। तस्मात्तं केनाऽपि कूटविधिना व्यापाद्य सर्वं धनमस्माभिः स्वाधीनीकर्त्तव्यमितिमन्त्रयित्वा कतिचित्प्रवहणानि प्रगुणीकृत्यबहुविधैः क्रयाणकैर्भृत्वाचत्वारो भ्रातरो निजपितुराज्ञां समादायदेशान्तरंयियासवः प्रवरं प्रवहणं समारुह्यप्रचेलुः। वर्त्मनिव्रजतां तेषां सप्तवासरा व्यतीयुः। ततोऽन्यस्मिन्दिनेवर्त्मन्येकोमहान्द्वीपः समागतः, तं च विलोक्य तत्रस्थितं जलादिकमाहर्त्तुं तत्र प्रवहणानिस्तम्भयित्वा चतुर्भिर्भृत्यैः सह



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चत्वारो भ्रातर उडुपमेकं समारुह्य तटाभिमुखंप्रतस्थिरे। प्रथमतस्तद्भ्राद्दितसंकेता नाविकादयः क्रोशमात्रं दूरं तटं निरीक्ष्यामीचन्द्रं दृष्टिवञ्चनेन जलधौनिपात्य पुनर्व्याघुट्य पापात्मानस्ते सर्वे निजप्रवहणान्तिकमाययुः। जलादिकमपेक्षितंवस्तु संगृह्य प्रमोदभाजस्तेत्रयोभ्रातरः प्रवहणस्थास्ततोऽग्रेप्रचेलुः! इतोऽमीचन्द्रोवारिधौ पतितस्तस्मिन्क्षणे प्राक्तनपुण्यबलेन कस्यचिद्भग्नप्रवहणस्यैकंफलकंतस्यहस्तगतं बभूव। अहो! यस्य प्रचुरं पुण्यमायुर्बलश्चजागर्त्ति तं नरंनिहन्तुं कः समर्थोभवेत्? उक्तश्च—वने रणे शत्रुजलाग्निमध्ये, महार्णवेपर्वतमस्तके च। सुप्तं प्रमत्तं विषमस्थितं वा, रक्षन्ति पुण्यानि पुराकृतानि॥ १॥ ततोऽमीचन्द्रस्तत्फलकमवलम्ब्य निर्विघ्नतया जलधितीर्त्वापरतटं प्राप। तत्र गतेनामीचन्द्रेण प्राचीनाभिधानं परित्यज्यमणिसेनपत्न्या प्रदत्तस्य श्लोकस्यनित्यस्मरणेन स्मृतिगोचरीभूतस्य प्रथमपदस्यानुसारेण प्राप्तव्य इत्यभिधानं प्रकटीचक्रे। ततस्तत्रदिनद्वयंस्थित्वा निकटवर्त्तिपादपानां फलैराहारं कुर्वाणः प्राप्तव्याभिधेयः स परिभ्रमन्किञ्चिदेकं महानगरमासाद्यतन्नगराधिपतेर्भृत्यत्वेन तत्रैवाऽस्थात्। भूपतिना निजपुत्र्याः संरक्षणार्थं योग्यतमं तं विज्ञाय तत्र स नियोजितः। भूपकन्या प्रत्यहं पाठशालायामध्येतुं प्रयाति, तयासार्द्धं सोऽपि तद्रक्षणार्थं प्रयाति, पुनरध्ययनान्ते तां समानीयराजमन्दिरे मुञ्चति। इत्थं प्रत्यहं राजशासनाधीनः प्राप्तव्यो निजकार्यं विदधाति। अथ भूपकन्यायाः प्रधानन्यायविदुर्गपालानांतिसृभिः कन्याभिर्दृढतरामैत्रीजज्ञे। सर्वदाऽध्ययनेसहचारिण्यः सर्वकर्मस्वप्यभिन्नहृदयाश्चस्तास्ताअभूवन्। अन्येद्युस्ताः संमील्यवार्त्तालापं कुर्वन्ति, तासांमध्येप्रधानपुत्री प्रस्तावमासाद्यबभाण–प्रियसख्यः! सम्प्रत्यस्माकं यादृशो गाढानुरागो वर्त्तते तादृशोऽग्रे किंस्थास्यति! स्वस्वमातापितृभ्यां यस्मै कस्मैदीयमाना वयं पराधीनतया स्वस्वश्वशुरालयं गमिष्यामः। अतोऽविच्छिन्नस्नेहोऽस्माकं यथा भवेत्तथा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कोऽप्युपायोऽस्माभिश्चिन्तितव्यः। तदाकर्ण्य राजसुताऽवादीत्–सहचर्यः ? अस्माभिर्यदि मातापित्रादिसम्बन्धिवर्गमपृष्ट्वा रूपगुणखानिर्योग्योवरो व्रियते तदाऽस्माकमखण्डितस्नेहश्चिरं तिष्ठेत् । इति नृपसुतावचनं निशम्य सर्वाभिस्ताभिस्तद्वचनमङ्गीचक्रे । अथैतस्यामेव पाठशालायां पठन् रूपगुणसंपन्नः सद्विद्याप्रवीणः कश्चिद्व्यवहारिपुत्रः समानवयाः समभूत् । तेन सार्द्धं परिणयनसंकेतस्ताभिश्चक्रे । ततो राजसुतया फलकोपरि परिणयनवृत्तान्तं विलिख्य प्राप्तव्याय प्रदत्तम्, कथितश्च तया–रे दूत ! इदं फलकं त्वया रहसि स्थिताय व्यवहारिसुताय प्रदेयम्, प्राप्तव्योऽपि गृहिताज्ञोवर्त्मनिगच्छन्स्वयं लेखं वाचयित्वा श्रेष्ठिनोगृहंगत्वा तत्सूनवे प्रादात् । तल्लेखार्थं विभाव्य कुमारेण प्रदत्तं लेखं समानीय राजपुत्र्यै प्रदत्तवान् । तत्प्रभृति ताश्चतस्रस्तेन साकं पत्रव्यवहारं कुर्वन्त्यश्चैकस्मिन्दिने पाणिग्रहणसमयं निश्चयामासुः, विवाहस्थलमपि कल्पयामासुः । विज्ञातैतद्वृत्तान्तः प्राप्तव्यः स्वमनसि भृशं प्रमुदितोऽभवत् । ततोऽपरस्मिन्दिने प्रातः समुत्थाय स निजपरिचितस्य महेभ्यस्य गृहं गत्वा राजसुतादीनां विवाहवृत्तान्तं निवेदितवान् । महेभ्यस्तच्छ्रुत्वा भयत्रस्तोऽजनि, रे ! किमिदानीं मया विधेयम् ? इदं वृत्तान्तं नृपतिर्ज्ञास्यति चेत्ससुतस्य मम मरणं शरणं भविष्यति, रे ! दूत ? अस्ति कश्चिदुपायः ? यदस्मादापद्वारिधेर्मदुद्धारः स्याद् ? प्राप्तव्योऽवदत्–महेभ्य ! माभैषीः, तवपुत्रस्याहंप्रतिनिधीभूय प्राणोपघातकमिदमसाध्यं कार्यं भवतः स्नेहवशात्संपादयिष्यामि, भवता निजपुत्रश्चत्वारि दिनानि रहसि रक्षितव्यः । इत्यभिधाय स स्वकीयस्थानमियाय । अथ लग्नदिवसे प्राप्तव्यो वरोचितानलङ्कारान्धृत्वा वर्त्मनिगच्छन्नेकं पण्डितं पुरोहितं सहादाय संकेतितस्थाने राजकन्यादीनामागमनं प्रतीक्षमाणः स्थितस्तावद्गाढान्धकारच्छन्नायां रजन्यां ताः कन्या अपि त्वरितगत्या तत्र समागताः । ततः पुरो-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हितस्तु गाढतमोव्याप्तायां निशि सद्यस्तासां तेन सह पाणिग्रहं कारयित्वा गान्धर्वविधिना विवाहकार्यं संपूर्णयामास। ततो यथेष्टदक्षिणां लब्ध्वा स निजस्थानमवाप। प्राप्तव्यस्तु कन्याभिः सहितस्तत्रैवस्थितः, क्षणाद्विरम्य प्राप्तव्यस्ताः पप्रच्छ-मदिरेक्षणाः ! स्ववाञ्छितं किमद्य सफलं जातम्। इतिं तदुक्तवचनं समाकर्ण्य ताःस्वमनसि बुबुधुः—अहो ! रहश्चिन्तितेऽप्यस्मिन्कार्ये किमपि कपटं जातमस्ति, अन्यथाऽयं प्राप्तव्योऽस्मान्कथं परिणयेत् ! इदानीं विषादेन सृतम्। इत्यभिधाय प्रथमा राजसुता प्रोवाच—"प्राप्तव्यमर्थं लभते मनुष्यः," ततो द्वितीया प्रधानपुत्री जगाद—"शक्तो न तं नाशयितुं हि देवः"। ततस्तृतीया न्यायविदः पुत्री बभाषे—"ततो न मे विस्मयशोचनार्त्तिः," ततश्चतुर्थी दुर्गपालपुत्री प्रावोचत—"यत् स्वीयमेतन्न परस्य जायते" ॥ १ ॥ एवं चतसृणां कन्यानां संभाषणं निशम्य प्राप्तव्यो निजचेतसि व्यचिन्तयत्-अद्यास्य श्लोकस्य सपादलक्षं धनं दत्तमपि सफलमजनि। अथैतस्यामेव रजन्यां तस्मिन्नगरे कश्चिदन्यो वरो ग्रामान्तरात्कस्यचिद्गृहस्थस्य कन्यां परिणेतुं समागतोऽस्ति, तस्यां वरयात्रायां पञ्चाशत्पुरुषा आसन्, ते सर्वे नगरं प्रविशन्ति तस्मिन्समयेऽचिन्त्योपद्रवा मुसलधारा वृष्टिः पपात, तया व्याकुलिता वरप्रमुखाः सर्वे पलाय्य भिन्नं भिन्नं प्रदेशं भेजुः। तदानीं स प्राप्तव्योऽपि कस्मिंश्चिदापणे संकुचितशरीरावयवः समेत्य संस्थितः। तस्मिन्नेवापणे वरजनकोऽन्येपि केचन जनाः समागत्य स्थिताः। तैर्विद्युत्प्रकाशेन तत्र स्थितं वरालङ्कारभूषितं प्राप्तव्यं विलोक्यायं वर इति विज्ञातम्। क्षणाद्वृष्टौ विरतायां तमोव्याप्तायां रजन्यां तमेव वरं मन्यमानाः सर्वे प्राप्तव्यमग्रतोविधाय विवाहमण्डपं जग्मुः। एतस्मिन्समयेऽन्ये जनाः सत्यं वरं परितः शोधयित्वा तेन सहितास्तत्र समागताः। एवमुभौ वरौ मण्डपद्वारि समुपस्थितौ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तस्मिन्क्षणे कन्याया मातापितरौ सम्बन्धिनोऽन्ये जनाश्चतत्रसमागत्यद्वौ वरौ विलोक्य परमं विस्मयं प्रापुः। महान्तं विरोधञ्च निष्पादयामासुः। इत्येतद्वृत्तान्तं भानुसिंहोऽनङ्गसेनाया अग्रे कथयित्वा पुनस्तामपृच्छत्–चारुलोचने! त्वं सर्वकलासु दक्षा श्रूयसे, तस्मात्त्वं ब्रूहि, उभयोर्मध्ये को वरः कन्यामर्हति? मातापितरौ कस्मै स्वकीयां कन्यां दत्त्वा निवृत्तिं भजतः! कश्चवरः कन्यारत्नमप्राप्यप्रयाति! तस्य निर्णयं त्वमेव सद्यः कुरु, तदनन्तरं तुभ्यं सपादलक्षं धनं दत्त्वा त्वया सह भोगविलासान्करिष्यामि। इति क्षत्रियकुमारेण गदितं वृत्तान्तं निशम्याऽनङ्गसेना तदुत्तरं दातुं न शशाक। तदा भानुसिंहेन सा जगदे–अनङ्गसेने? तुभ्यं प्रतिज्ञातं धनं न दास्यामि, स्वस्थानञ्च गमिष्यामीति तिरस्कारगिरं श्रुत्वा क्रुद्धा सा गणिका भानुसिंहसमेता ताभिश्चतसृभिः कन्याभिरधिष्ठितायां न्यायसभायां गत्वा निजवृत्तान्तं कथयितुमाज्ञामयाचत। राजकन्यया साऽभाणि–सुखेन निजाशयं प्रकाशय, लब्धादेशाऽनङ्गसेना तावन्निजगृहव्यवस्थां समाचख्यौ। ततो भानुसिंहेन सार्द्धं यो विवादो जातस्तत्सकलं स्वरूपं तया प्रकाशितम्। ततः कन्याप्रदानविरोधं निरूपयितुं भानुसिंहोक्तां समग्रां प्राग्भव्यवार्त्तां गदितुं सा प्रारभत–तां वार्त्तां कुर्वन्त्या अनङ्गसेनाया मुखाच्चतसृणां कन्यानां गान्धर्वलग्नस्य वृत्तान्तं श्रुत्वा ताः कन्यास्तां वार्त्तां स्वकीयां मन्यमानाः संशयितमानसा जज्ञिरे। परस्परं ता मुखानि विलोकयामासुः, तां वार्त्तां निवेद्य विरतायामनङ्गसेनायां राजसुता विवादनिर्णयमाह–यो हि वरजनको भूत्वा वरं गृहीत्वा विवाहमण्डपं समागतस्तस्मै सा कन्या प्रदेया। तदितरवरस्यतत्कन्यायां कोऽप्यधिकारोनास्त्येव। ततस्ताश्चतस्रोऽपि गणिकां प्रोचुः—अनङ्गसेने! त्वयाप्रतिवादिनोऽग्रे यत्प्रतिज्ञातंतन्निर्णयो नाविहितस्तस्मात्त्वंपराजितैवाऽसि। नात्रमनागपिसन्देहः। अतः प्रतिवाद्यधुनाऽपृष्टव्यो विद्यते,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यतोऽसौ सर्वथाप्राप्तजयोलक्ष्यते। अथ ताः कन्या भानुसिंहमपृच्छन्—भोः पथिक ! त्वं कोऽसि ? कस्मादस्मिन् विवादे त्वं पतितः ? आकृत्याभवान्कोऽपि राजवंश्योविभाव्यते। लब्धप्रतिष्ठस्त्वं गणिकौकसि कथंप्रयातः ? तत्स्वरूपमस्मान्समाचक्ष्व। तदानीं भानुसिंहेनेतिश्लोकोऽपाठि—नभवति यन्नहिभाव्यं, भवतिहिभाव्यं विनाप्रयासेन। करतलगतमपि नश्ये—न्नास्तिहि-भवितव्यता यस्य ॥१॥ अस्यपद्यस्य श्रवणमात्रेणैव सद्योजातप्रत्ययास्ताश्चतस्रो निजवार्त्तामस्मार्षुः। अयमेवास्माकं प्राणप्रियः प्रतिभाति, नाऽन्यः, इति निश्चित्यतमुपलक्ष्यसहसा ताः सिंहासनादुत्तीर्य निजोचितमर्यादयाविहिताञ्जलयस्तत्सन्मुखंतस्थुः, ऊचुश्च—स्वामिन् ! वयंचतस्रोनिर्दोषा निष्कलङ्का भवामस्तस्मादस्मान्किङ्करीसमा गणयित्वास्वीकुरु। प्रियपते ! अस्या अनङ्गसेनाया वार्त्तांश्रुत्वा साशङ्कचेतसामस्माकं मानसं त्वयिसमुत्कण्ठितं जातम्। निजचेतसि च विज्ञातमस्माभिर्यत्पूर्व-वृत्तान्तस्मरणार्थमेव त्वयाऽयंप्रपश्नो विहितः। अस्मिन्कार्येभवताबृहद्बुद्धिचातुर्यं व्ययितम्। यतः—पूर्वं भवान् यदा मत्पितुः सन्निधौ समागत्यभृत्यभावेन संस्थितस्तदानीन्तनवेषस्याधुनिकवेषस्य च भूमिपाषाणवन्महदन्तरंदृश्यते, तथाऽपि विलासोद्याने ऽस्माभिर्भवानेव परिणीतः। भवतोवंशजन्मादेः किमपिज्ञानं नास्त्यस्माकंतथापि चतसृणामस्माकं भर्त्तात्वमे-वाऽसि, न वयंतवजात्यादिकमपेक्षामहे। इत्थं तासांवचनं निशम्य स्वयं कीदृग्जातीयः ! कस्माच्चराज्यवैभवं परित्यज्यात्र समागतः ! इति साद्यन्तं स्वकीयं वृत्तान्तं सविस्तरं तासामग्रे तेन निवेदितम्। तच्छ्रवणमधुरं वृत्तान्तं श्रुत्वा सर्वास्ताः परमानन्दं भेजुः। न्यायागारस्थिताः सर्वेलेखकादयोऽपि विस्मयं प्रापुः। अनङ्गसेनागणिका च चित्रोल्लिखितेवस्तब्ध-मानसा जज्ञे। ततोऽनङ्गसेना स्त्रीमर्यादां पालयन्ती सविनयं हस्तौनियोज्य भानुसिंहं विविधप्रश्नश्रेणीं पृष्ट्वा तन्मनोभिप्राय-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मज्ञासीत्। तेनाऽपिसंक्षेपतो निजवृत्तान्तं तस्या अग्रे समाचख्ये, तदुक्तंवृत्तान्तं समाकर्ण्य सा गणिका स्वचेतसि व्यचिन्तयत्-धिङ्मेजीवितम्, ईदृशं तेजस्विनं सर्वकलादक्षं चतुरं गम्भीरस्वभावं नरोत्तमं परित्यज्य नीचजनैरुपसेव्यां लोकेनिन्द्यतमां पितृकुलकलङ्कदायिनीमिमां गणिकावृत्तिं विधाय परिणामे दुरन्तदुःखभाजनं भविष्यामि। अतोऽयंवेश्याचारः सर्वथा मया परिहर्त्तव्यः। इति निश्चयंविधाय तयाऽपि स भानुसिंहो वव्रे। अथताश्चतस्रः कन्याः स्वस्वमातापित्रोरग्रे स्वकीयमुदन्तं निवेद्य समाचख्युः—अस्माभिरयमेवपतिर्विवक्षितः, इति सत्यसंकल्पोविहितोऽस्ति, तस्मादनेन पुरुषेण साकमस्माकं पाणिग्रहं कारयत। ततस्ताभिः कन्याभिर्भानुसिंहस्य प्राक्तनं सकलमुदन्तं व्यावर्णितम्, किञ्चायं पुरुषः प्रतिष्ठान-पुरपत्तनस्याधिपतिः प्रजापालाभिधो वर्त्तते, सोऽत्र किमपि कार्यं साधयितुं समागत इति कन्यकोक्तं तच्चरित्रं निशम्य भूपति-प्रधानप्रभृतयः सर्वे भृशं प्रमोदमवापुः। ततो नृपादिभिः सर्वैः स्वस्वकन्यानां शुभे मुहूर्त्ते लग्नमहोत्सवं विधायाप्रमितधन-व्ययश्चक्रे। तासां पाणिमोचनावसरे निजपितरोहस्त्यश्वरथादीनां बहुविधानि दानानिवितेनिरे। तच्छुश्रूषणार्थं च दासी-दासगणानदुः, इत्थमनेकविधवसनालङ्करान्प्रदाय कन्याभिः परिकरितं प्रजापालनरेश्वरं निजराजधानीं प्रतिप्रेषयामासुः। एवमजितसेनप्रधानः सुमतिचन्द्रः प्रधानचतुष्टयसमन्वितमरिमर्दनभूपमभिधाय पुनस्तमुवाच-महाराज! अस्या वार्त्तायाः सारस्तुत्वया विज्ञात एव, आसां कन्यानां पतिव्रतात्वं कीदृशं विशुद्धं वर्त्तते! विलोक्यताम्, याभिर्गुप्तवृत्त्या पतिर्विहित-स्तथाऽपि तदतिरिक्तं पतिमनिच्छन्त्यः शीलव्रतपालने तत्परा बभूवुः राजसभायामुपविश्यताः सत्यासत्यस्वरूपं निर्णाया-मासुः। यदा स्वपरिणीतः सत्यपतिर्मिलितस्तदाताभिः स एवाङ्गीकृतः। तस्मात्पृथिव्यां सतीव्रतसेविन्यः काश्चन भवन्ति।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नरपते ! स्वयमेवविचार्यताम्, निजकराङ्गुलयः समानाकाराः सन्ति किम् ? काश्चनह्रस्वाः काश्चनदीर्घा भवन्ति, तथैवजगति सर्वेपुरुषाः समानाचारा नसन्ति, स्त्रियोऽपितुल्यस्वभावाः सर्वा न दृश्यन्ते । केचित्सद्बुद्धयः केचिद्सदाचारा इतिद्विविधो मानववर्गो विद्यते । तस्मादसावजितसेनभार्या शीलवती शीलरत्नैकभूषणा महासती विद्यते, कश्चिदपिदोषलेशोऽस्यां न संभाव्यते, तस्याः सद्गुणैः प्रसन्नीभूयकेनचिद्देवेनेदं मनोहरं सुकोमलं कमलं प्रदत्तमस्ति । अस्य कमलस्य महान्प्रभावो विद्यते । इति सुमतिचन्द्रेण कथितां वार्त्तां समाकर्ण्यारिमर्दनः स्वमनसि व्यचिन्तयत्–अस्मिन्प्रस्तावे मतद्वयं जातम्, इमे प्रधानाः शीलवतीकुलटाऽस्तीति वदन्ति, सुसतीति सुमतिचन्द्रो वदति । तस्मादस्य कार्यस्य सत्यासत्यनिर्णयस्तुमयाऽवश्यं विधातव्यः । इति निश्चित्य तां प्रधानचतुष्टयीं समाहूय रहसि तामब्रवीत्–भो मन्त्रिणः ! यूयं व्रजत, केनाऽप्युपायेन शीलवत्याः कुलटात्वदोषोयदि स्यात्तदा तं प्रकटीकुरुत । इति नृपादेशमधिगम्य चत्वारस्ते कूटकारिणो मन्त्रिणः प्रमुदिता बभूवुः । यतस्ते प्रपञ्चविधानेऽतिदक्षाः परस्त्रीलम्पटाश्चासन्, पुनर्नृपतिनैतस्मिन्कर्मणि समादिष्टाः । पुराऽपियन्निजरुचिकरमासीत्, तदेवभिषजाऽभिहितम् । यथाच–कपिरपि कापिशायन–परिपीतो वृश्चिकेन सन्दष्टः । सोऽपि पिशाचगृहीतः, किंब्रूमस्तस्यचेष्टितं लोके ॥ १ ॥ तथैवजात्यामार्जारस्तदग्रेदुग्धभृतं भाजनं कश्चिद्यदि मुञ्चति तर्हि स सन्तुष्टोभवेत्तत्र किमुवक्तव्यम् ? तद्वच्चत्वारस्ते प्रधानाधमाः प्रसन्नचेतसः शीलवत्याः शीलजलं शोषयितुं साक्षाद्वडवानलकणाइव केनचिन्मिषेण निजगृहमभिययुः । गृहमागत्य तदेव कार्यं चिन्तयन्तः परिहितोद्भटवेषास्ते मन्त्रिणो मोदमानाः शीलवत्या गृहं गत्वा तद्दासीमुखेन निजकामोपभोगभावान् शीलवतीं ज्ञापयामासुः । महामूल्यानि सारवस्तूनि च शीलवत्याः सन्निधौ प्रेषयामासुः । विषयोपभोग-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रार्थनामपिस्पष्टाक्षरैर्निवेदयामासुः। दासीमुखात्प्रधानचेष्टितं विज्ञाय शीलवती व्यचिन्तयत्—रे ! रे ! कामान्धितचेतसोऽमून्मूढानधिगस्तु। ये च मदीयममूल्यं शीलरत्नमपहर्त्तुमिच्छन्ति, किञ्चेमे कृपणाशयाः पापकर्मरता व्याघ्रीदुग्धवदुष्प्रापंमेशीलसर्वस्वंजिघृक्षितुमुद्यमं कुर्वन्ति। नन्विदं ते जानन्ति—कृपणस्यधनं नाग—मणिः सिंहस्य केसराः। जीवतां नैवगृह्यन्ते—ऽमीषां सत्याउरस्तथा ॥ १ ॥ ममस्वामिनः करस्थितमम्लानं कमलं विलोक्य तन्माहिमानमश्रद्दधानस्यारिमर्दनभूपस्यैवायमनर्थमूलः समारम्भो विभाव्यते। अन्यथा निःशङ्कहृदया अमीधृष्टा ईदृशेऽनर्थोत्पादके कर्मणि कथं प्रवर्त्तेरन् ? अस्तु तावदकार्यकरणोद्यतानां दुष्टानाममीषां चित्तं केनाऽपि चमत्कारेणव्यामोहयामि। इति विचार्य तया निजदासी भणिता—सखि ! निःसारोऽयं संसारः सत्कर्मणा सारभूतो भवति, मानुषं भवं लब्ध्वा संसृतिवर्द्धकेऽसद्व्यवहारे सद्भिः स्पृहा न विधेया, शुभं समीहमानैः सज्जनैर्द्रव्यसंसर्गो न चिन्तनीयः, धर्माभिलाषिभिरुत्तमजनैर्मद्यपानरतिर्महानर्थप्रदा कस्मिन्नपि समये न विधातव्या, कुलाङ्गनाभिः सर्वथा निरयाध्वदूती परपुरुषसंगतिस्त्रिधा हेया। सत्यप्येवं घृताक्तभोजनवाञ्छया यथोच्छिष्टमप्यन्नं भक्ष्यते तथा मुखमार्गितं यदिद्रव्यं मिलति तदा परपुरुषसङ्गोऽपि विधेयः। तस्माद्यदीमेचत्वारो लक्षमितान्निष्कान्प्रयच्छन्ति तर्हि सुखेनास्मात्पञ्चमेवासरे निशायां चतुर्षु प्रहरेषु क्रमेणैकैकोमया सह सङ्गतिं करोतु। एवं कथयित्वा तया निजदासी प्रधानान्तिके प्रहिता, साऽपि त्वरितगत्या निजस्वामिन्या निवेदितां वार्त्तां तत्र समेत्य प्रधानेभ्यः कथयामास। इतः शीलवती तच्छिक्षादित्सुर्निजगृहस्यपश्चिमेऽपवर्के महान्तमेकं कूपं खानयतिस्म, तदुपरि केवलवस्त्राच्छादितमेकंपल्यङ्कं स्थापयामास। अथ पञ्चमे वासरे संप्राप्ते रजन्यां स्वात्मानं कृतार्थं मन्यमाना मनोज्ञवसनाभरणैर्विभूषिताङ्गाश्चत्वारस्ते लक्षनिष्कान्गृहीत्वा शील-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वतीनिकेतनं समाजग्मुः । तेषामेकः प्रथमप्रहरे शीलवतीसन्निधौ समागत्य तस्थौ, शीलवत्यपि निकटवर्त्तिनंतं निरीक्ष्य सत्कारपुरःसरमपवर्कंनीत्वा तस्मिन्कूटपल्यङ्के समुपवेशनाय समादिदेश । प्रधानोऽतिरमणीयां भोगशय्यां विलोक्य संजातप्रमोदोयावत्तस्मिन्निषीदति तावत्कामान्धितलोचनः स पापबुद्धिः कूपतलंभेजे । ततः शीलवती वस्त्रान्तरेण तंपर्यङ्कमाच्छादयामास । द्वितीयस्मिन्प्रहरे द्वितीयः प्रधानस्तथैवागत्य संस्थितः, सोऽपि शीलवत्या निर्दिष्टं शयनासनमारोढुं प्रयाति तावत्स्वमित्रवृत्तान्तंजिज्ञासुरिव तत्सन्निधौ स्थितिश्चकार । तथैव तृतीयचतुर्थप्रधानावपि कूपवर्त्तिनौ बभूवतुः । अस्मिँल्लोके ये दुराचाराः पापचेष्टयाऽनुचितं कार्यं विधातुंसमीहन्ते तेषां तादृश्येवशिक्षा प्रदातव्येतियोग्यतममेव । अथैते चत्वारो महागर्त्तेपतिताः स्वचेतसि व्यचिन्तयन्, अहो ! अनया शीलवत्या समीचीनमेतद्विहितम् । यतोऽस्माकमस्थीनि न भग्नानि, अस्मादृशानां दुष्टकर्मविधायिनान्त्ववश्यतयाऽस्थिभङ्गो विधातव्यस्तथाऽपि दयार्द्रभावा सा भामिनी विभाव्यते । यदसौ गुणशालिनी दक्षस्वभावा विद्यतेऽतस्तया निजगुणोल्लङ्घनं नाऽकारि । इत्थं कूपस्थास्ते विकल्पयन्तो नरकोपमां विविधां वेदनामनुभवन्तः स्वकर्मोपार्जितं दुःखं विभावयन्तः स्वचेतसि पश्चात्तापं प्रकुर्वन्तः प्रभूतेनकष्टेनादिनानि निर्वाहयामासुः । अथ शीलवती विहितापराधेष्वपितेषुदुष्टेषु दयां विधाय कोद्रवादि निःसारमन्नंपाचयित्वा निःस्वादेनतेनान्नेन पूरितंमृन्मयमेकैकं पात्रं रज्जुप्रयोगेण तेभ्यः प्रत्यहं ददाति, जलमपि तथैव प्रयच्छति । मन्त्रिणोऽपि तद्दत्तमन्नजलं स्वीकुर्वन्तस्तत्रैव नरकावासदुःखं स्मरन्तस्तस्थुः । यथा भिषग्वर्यः पथ्यभोजनेनसदौषधंदत्त्वा महारोगमुपशमयति, तथा शीलवत्यपि विषयरोगग्रस्तेभ्यः प्रधानेभ्योगर्त्तापातनमहौषधिंदत्वारुक्षनिःस्वादपथ्यान्नदानेन तेषां विषयरुजं निर्मूलां कर्त्तुं समारेभे । एवञ्चषण्मासा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स्तेषां व्यतीयुः। तदानीं जीवमात्रशेषास्ते तस्थुः। अहो ! विषयतृष्णा दुरन्ता, यतश्चोक्तम्–विषस्य विषयाणांहि, दृश्यते महदन्तरम्। उपभुक्तं विषं हन्ति, विषयाः स्मरणादपि ॥ १ ॥ भक्षितेनविषेणैव, हरकण्ठस्थनीलता। चक्रे जह्रे तदर्द्धाङ्गं, विषयैस्तु मनोगतैः ॥ २ ॥ इतोऽरिमर्दनभूपतिर्वैरिवारान्विजित्य निजाज्ञानुवर्त्तिनस्तान्विधाय तेभ्यः सारवस्तूनि स्वीकृत्याजितसेनसमेतः सपरिवारः स्वनगरमियाय। स्ववेश्मनि समायान्तमजितसेनं निरीक्ष्य शीलवती प्रगुणितप्रमोदा यथोचितं सत्कारंविधाय सुस्वादुंरसवतीं स्वयंनिष्पाद्य तंभोजयामास, स्वयञ्चबुभुजे। ततः कुशलवार्त्तां कुर्वन्तीशीलवती मन्त्रिणां दुश्चरित्रं यथावृत्तंसकलं निजस्वामिने कथयामास। ततोऽजितसेनेनाऽपि निजवृत्तान्तं तदग्रेनिवेदितम्। मिथःस्नेहनिबद्धमानसानामुत्तमजनानामियं प्रकृतिर्यन्मिथःसंगमे स्वस्ववृत्तान्तं विनिवेद्यनिवृत्तिपरायणाभवन्ति। इतोऽरिमर्दनभूपेनाऽपि निजप्रहितप्रधानचतुष्टयस्यान्वेषणंकारितं तथाऽपि तेषांप्राप्तिः क्वाऽपिनजाता। अथान्यदातदेवाचिन्तयतानृपेण राजसभागतोऽजितसेनः सोपहासमभाणि–भो ? भवतः सद्मनि भोजनार्थमपि मां किं न नयसि ? अजितसेनस्तदेव नृपतिवचनं चिन्तयन्निजगृहं समेत्य शीलवत्यैतद्वृत्तान्तं न्यवेदयत्। सा प्रोवाच–स्वामिन् ? भवान् तत्रगच्छतु, भोजनार्थं नरपतिं सुखेनाऽत्रसमानय, यतोऽस्मिन्कूपे विषयफलमनुभवतइमान्मन्त्रिणस्तंदर्शयामि। इत्थं शीलवतीवचनं निशम्य सद्योऽजितसेनो नृपमन्दिरं समागत्य भोजनार्थं महताग्रहेण भूपतिं न्यमन्त्रयत्। भूपतिः स्वचेतसि मोदमानो व्यचिन्तयत्–अद्य खलु प्रधानचतुष्टयस्य शुद्धिर्मयालप्स्यते, अजितसेनेन भोजननिमन्त्रणं प्रदत्तमतस्तद्गृहे मया गन्तव्यम्। परंत्वन्यपरिवारः कियांस्तत्रनेतव्यः ! यदि स्वल्पपरिवारं गृहीत्वा व्रजामि तर्हि मम लघुतास्यात्, बृहत्परिजन-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समेतोऽहं तत्र गत्वा किं करोमि ? रसवती परिमितास्याचेदुभयोरुपहास्यं भवेद् । इति विचार्य भूपतिना निजपार्श्वानुचरस्तत्र रसवत्यवेक्षणार्थं प्रहितः । गृहीताज्ञः सदूतोऽजितसेनगृहं गत्वा परितोवीक्ष्य पुनर्नृपान्तिकमागत्य दीर्घस्वरेण प्रोवाच–स्वामिन् ! तद्वेश्मनि रसवत्याः समारम्भः कोऽपि न विद्यते, धूमदर्शनमपि तत्र न जायतेऽन्यस्यतुकावार्त्ता ? इति दूतवचनं निशम्य विस्मितो भूपतिश्चिन्तयितुं लग्नः, अहो ! किमयं दूतो वदति ? मां निमन्त्र्य निश्चिन्तः स कथं स्थितः ? भोजनावसरस्तुसाम्प्रतं भविष्यति, स भूरिपरिजनसमेतं मां किं भोजयिष्यति ? अस्तु किमेतच्चिन्तयामेभोक्तुकामस्य ! । इतः शीलवती महातपस्विन इवास्थिचर्मावशेषांस्तान्प्रधानानब्रवीत्–यदिमदुक्तं वचनं यूयं स्वीकुरुत, तदाऽस्मात्कूपाद्वो बहिर्निष्कासयामि। बहिरागत्य कदाचिदन्यथा प्रवृत्तिं करिष्यथ तदास्मिन्कूपे युष्मान् पुनर्निक्षेप्स्यामि। तस्मिन्नवसरे स्वप्राणरिरक्षवस्ते शीलवतीवचनंमेनिरे । ततः सा कूपात्तानुध्धृत्य वारिणा संस्नाप्य रक्तचन्दनेन विलिप्ताङ्गान्यक्षानिवगृहाभ्यन्तरे रहसि स्थापयामास । पुनस्तान्प्रति सा जगौ–भो मन्त्रिणः ! यद्यद्वस्त्वहं कथयामि तत्तत्समानीय युष्माभिर्मह्यं देयं परं निर्निमेषनयनैर्भवद्भिर्भाव्यम् । नोचेत्पुनस्तस्मिन्नेवकूपे भवतां निवासो भविष्यति । इत्थं तान्कथयित्वा गृहाभ्यन्तरे प्रच्छन्नतया विविधपक्वान्नादिपदार्थान्प्रगुणीकृत्य प्रभूतभक्ष्यभोज्यादिभिः स्थालान्संभृत्य यक्षानुकारिणस्तांतत्र स्थापयित्वा शीलवतीप्रेरितोऽजितसेनः प्रमुदितो नृपाह्वानकृते तद्भवनं जगाम । तदानीमजितसेननिकेतनं नृपतिः सपरिवारः प्रययौ । तस्मिन्समये स्नानजलादिकां सकलां सामग्रीं समानीय यथावसरं यक्षरूपा मन्त्रिणो वितरन्ति । यथेष्टं भुञ्जानोभूजानिः स्वचेतसि व्यचिन्तयत्–इदं सर्वं भोजनादिकं भव्यं वस्तु गृहमध्यात्केचन यक्षाः समानीय ददति, परन्तु तमोव्याप्त्या किञ्चि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





द्वस्तु स्पष्टं न विलोक्यते, मन्येऽहं साक्षात्कल्पपादपा इव केचन यक्षा अस्यवेश्मनि वसन्ति । यतो यदपेक्ष्यते तद्वस्तु सद्यस्ते समानीय प्रयच्छन्ति, अस्य सद्मनि किमपि वस्तु दृष्टिगोचरं न जायते, तथाऽपि सर्वमपेक्षितं वस्तु कुतोऽपि समानीय समर्पयन्ति । अतोऽयं सकलः प्रभावोयक्षाणामेवविभाव्यते । एते यक्षा मद्वेश्मनि भवन्ति चेदहं कृतार्थोभवामि, अन्यथा किमेतेन राज्यादिविभवेन ? एवं यक्षैकदत्तलक्षोनृपतिर्विस्मृतप्रधानवृत्तान्तः शून्यचेतसा भोजनं समाप्य समुत्तस्थौ । ताम्बूलादिमुखवासं दत्त्वाऽजितसेनः स्वयमेवानर्घ्यवसनाभरणैर्नृपतिंप्रीणयामास । ततोनृपतिर्लज्जां शिथिलीकृत्य दीनवदनः प्रभूतेनाग्रहेणाजितसेनं तान्यक्षान्ययाचे । शीलवतीवचनानुसारेणाजितसेनोभूधवं बभाषे–राजन् ! त्वदन्यो यद्यमून्यक्षन्याचते तर्हि प्राणान्तेऽपि न ददामि, परन्तु भवदीयं वचनं मया न निषिध्यते । युष्मदीयं कार्यमकृत्वा न मे सिद्धिः । भूपते ! किंबहुजल्पनेन ! इदं गृहादिकमपि सर्वं भवदीयमेव विभाव्यताम् । यतः—निगद्यते पञ्चमलोकपालो–धराधिपोथः प्रथितप्रभावः । किमस्त्यदेयं भुवि वस्तु तस्य, सर्वस्य भोक्ता नरनाथ एव ॥ १ ॥ भवान् सुखेन स्वमन्दिरं प्रयातु, अधुनैवतान्यक्षान्भवदन्तिके प्रेषयिष्यामि । यतस्ते चत्वारः सन्ति, अतस्तान्पृथक् पृथक् मञ्जूषागतान्विधाय भवन्तं प्राभृतीकरिष्यामि । ततस्त्वया महतोत्सवेन सभामध्ये ता मञ्जूषा उद्घाट्य ते यक्षा बहिर्निष्कासनीयाः । इत्यजितसेनवचनेन प्रमुदितस्वान्तो नृपतिः सपरिवारः स्वनिकेतनमियाय । ततोऽजितसेनः प्रगुणीकृताश्चतस्रः पेटाः समानाय्य तासु तान्प्रधानान्पृथक् पृथक् प्रपूर्य भृत्यैरुद्वाह्य ता राजसदसिप्राहिणोत् । राजपर्षदि सिंहासनोपविष्टो यक्षदिदृक्षोत्कण्ठितमानसो भूपतिर्बहून्सभ्यजनान्मेलयित्वा महताडम्बरेण ता मञ्जूषा उद्घाटयतिस्म । ताभ्योनिर्गताश्चत्वारो मन्त्रिणो विकृतवेषा वैताला इव



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निर्निमेषनयना मनाग्भयविस्मयाविष्टचेष्टा भूपतिं प्रेमदृष्ट्या विलोकयामासुः । भूपतिरपि विस्मयमापन्नस्तानतृप्तलोचनाभ्यां निरीक्षतेस्म । चञ्चलाङ्गान्मानवसदृशांस्तान्विलोकमानो मानवपतिः कौतुकेनोल्लसितस्तानुवाच–यूयं केस्थ ? कुतोऽत्र समागताः ! शीलवतीभयेन व्रीडयाचाधोमुखास्ते तुष्णींतस्थुः । ततश्चिरं वीक्षमाणः क्ष्मापतिस्तानुपलक्षितवान् । रे ! इमेतुमदीया मन्त्रिणः सन्ति, इति विज्ञाय विस्मितमानसो व्रीडां विषादं च दधानो महीपतिः प्रीत्यातानपृच्छत्–किमिदं वैपरीत्यं जातम् ? त्रपात्रस्तमानसा अपि ते यथातथं स्वकीयं सर्ववृत्तान्तं मेदिनीपं समाचख्युः । पुनस्ते प्रोचुः—राजन् यः ! कश्चित्क्षुद्रमतिः सहस्ररश्मिं विच्छायं विधातुकामः पवनाभिमुखं स्थित्वाधूलिं प्रक्षिपति, सा तिग्मांशुमस्पृष्ट्वा तस्यैवनयनयोः प्रशाम्यति । तथैव वयंशीलवत्याः शीलधनमपहर्त्तुं जग्मिवांसः, परं सात्वक्षतशीलैव तिष्ठति, वयमेव लुण्टिताः सन्त ईदृशीमवस्थामनुभवामः । इत्यभिधाय चत्वारस्ते मन्त्रिणः शीलवत्याः शीलमहिमानममानं प्रशशंसुः । येन तस्याः सुसतीत्वं सर्वत्र पप्रथे । सकलजनश्लाघनीयशीला सा समजनि जनसमाजे । किञ्चास्मिन्विष्टपे नैतादृशः कश्चित्पुमान्विद्यते, यः शीलवत्याःशीलं प्रशंसितुं विरमेत् ? यतः कायिकशीलपालनाद्वाचिकशीलरक्षणमतिदुःसहंविद्यते, तस्मादपि मानसिक शीलपालनं सर्वथा दुःसहतमंप्रतीयते । तथाऽप्यस्याःशीलवत्याः शीलन्तु त्रिधाशुद्धतरमेव विभाति । भो भव्याः ! शीलवतीनां शीलपालनमतिदुष्करंविद्यते । दीक्षितस्य परीक्षणं परिषहोदयसमये भवति, सुवर्णपरीक्षा च धनञ्जयेभवति । तथैव शीलवत्याःशीलं परीक्षितुं क्षितिपतिना निजमन्त्रिणः प्रहितास्तेन सा सकलसभायां भूरिप्रशंसास्पदंजज्ञे । ततो भूपतिर्मन्त्रिचतुष्टयसमन्वितः शीलरत्नधनांशीलवतीं सविनयंनमस्कृत्य शीलप्रभावंश्लाघमानः निजापराधं क्षमयामास । ततः शील-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वत्यपि तेभ्योमन्त्रिभ्योलक्षमितं धनंप्रत्यर्प्यपुनस्तान्विविधवचनैः प्रतिबोध्यपरदारगमनमत्याजयत् । अहो ? विलोक्यताम् ? सतीनामपूर्वःपन्थाः केनप्रथितः ? एवंतत्प्रशंसांकुर्वन्तः सर्वेसभ्यजनाः स्वस्वसदनमासेदुः । सर्वेन्द्रियार्थैरजितोऽजितसेनोऽपि निजभार्यासमेतोनिजालयमियाय । प्रशान्तवृत्तिः स प्रत्यहं ज्ञानदर्शनसमाराधनासहितं प्रभुपूजनं प्रशस्तस्तुतिभावनादिकञ्चसमाचरन्निजजन्म सफलयामास । ततोन्यदा चिरन्तनातनुपुण्यप्राग्भारेणसमाकृष्ट इवविहरन्, तीव्रतरविशुद्धमहाव्रतधारकः सप्तदशभेदात्मकसंयमसमाराधको द्वादशधातपश्चर्योपासकस्त्यक्तकनककामिनीसङ्गो दृढतरवैराग्यवासनः परित्यक्तविद्यमानामानसम्पद्गणः सम्यग्विजितक्रोधरथोनिर्मानलोभमायो विज्ञातभावो दमघोषनामामुनिस्तत्रोपवने समवासार्षीत् । वनपालः प्रमोदपूरितोराजानमभ्येत्य विहिताञ्जलिपुटःसविनयं मुनेरागमनंन्यवेदयत् । तच्छ्रुत्वा परमानन्दमादधानो वसुधाधवस्तस्मै वनपालाय दलितदारिद्र्यं तुष्टिदानमयच्छत् । ततः पौरजनपरिवारितः सपरिवारोनिर्जितवैरिवारो वारिधिवसनाधिपो निजविभवानुसारेण मुनीश्वरंवन्दितुंनिरगात् । धर्मरुचिरुचितावसरज्ञोऽजितसेनोऽपि निजपत्नीसनाथस्तं मुनिनाथं प्रणन्तुंप्रतस्थे । वर्त्मनिमहता महेनव्रजन्तः सर्वेकिञ्चिद्दूरतः पादचारिणो भूत्वा तत्र गत्वा त्रिशुद्धभावेन विगतवेदनं गुरुमभिवन्द्य यथोचितस्थानेषुनिषेदुः । ततो गुरुणाधर्मलाभाशिषं वितीर्यक्लिष्टकर्मारिघातिनी धर्मदेशना प्रारेभे । भो भव्याः ?–दुःखाङ्गारकतीव्रे, संसारेऽस्मिन्महानसेगहने । निपतन्तं चित्तोतुं, विषयामृतलालसं निवारयत ॥ १ ॥ अयमविचारितचारु–तयासंसारोभाति रमणीयः । अत्रपुनःपरमार्थ–दृशानकिमपि सारमणीयः ॥ २ ॥ किञ्च–क्वचिद्विद्वद्गोष्ठी, क्वचिदपि सुरामत्तकलहः, क्वचिद्वीणावादः, क्वचिदपि च हाहेतिरुदितम् । क्वचिद्रम्यारामा, क्वचिदपिजराजर्जरतनु–र्नजानेसंसारः, किममृतमयः किं विषमयः ॥३॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कृच्छ्रेणामेध्यमध्ये नियमिततनुभिः स्थीयते गर्भगर्त्ते, कान्ताविश्लेषदुःखव्यतिकरविषमेयौवने विप्रयोगः । नारीणामप्यवज्ञा विलसति नियतंवृद्धभावोऽप्यसाधुः, संसारे रे मनुष्याः ? वदत यदि सुखं स्तोकमप्यस्ति किञ्चित् ॥ ४ ॥ तस्मात्–संसार विषवृक्षस्य, द्वे फलेह्यमृतोपमे । शास्त्रामृतरसास्वादः, सङ्गमः सज्जनैः सह ॥ ५ ॥ अवश्यमेव भोक्तव्यं, कृतं कर्म शुभाऽशुभम् । कृतकर्मक्षयोनास्ति, कोटिजन्मशतैरपि ॥ ६ ॥ पत्रंनैव यदाकरीरविटपेदोषो वसन्तस्य किं, नोलूकोऽप्यवलोकते यदि दिवा सूर्यस्य किं दूषणम् । धारा नैवपतन्ति चातकमुखे मेघस्य किं दूषणं, यःपूर्वार्जितशर्मदुःखविभवः सैवोपभोग्योजनैः ॥ ७ ॥ कर्मणाबाध्यते बुद्धि–र्नबुद्ध्या कर्मबाध्यते । सुबुद्धिरपि यद्रामो–हैमंहरिणमन्वगात् ॥ ८ ॥ अवश्यं भाविनो भावा–भवन्ति महतामपि । नग्नत्वं नीलकण्ठस्य, महाहिशयनं हरेः ॥९॥ कर्मणा जायते दुःखं, कर्मणोत्पद्यते सुखम् । सुखदुःखनिपाते हि, कर्म कारणमुच्यते ॥ १० ॥ धनानि भूमौ पशवश्चगोष्ठे, भार्या गृहद्वारि जनाःस्मशाने । देहश्चितायां परलोकमार्गे, धर्मानुगो गच्छति जीव एकः ॥ ११ ॥ किञ्चज्ञानदाने विशेषतो यतितव्यम् । यतः–अपूर्वः कोऽपि कोशोऽयं, विद्यते ज्ञान ? तेऽनघ ! । व्ययतो वृद्धिमायाति, क्षयमायाति संचयात् ॥ १२ ॥ अनेकसंशयोच्छेदि, परोक्षार्थस्य दर्शकम् । सर्वस्यलोचनं ज्ञानं, यस्य-नास्त्यन्ध एवसः ॥१३॥ हर्तुर्न गोचरंयाति, दत्तं भवति चाक्षयम् । कल्पान्तेऽपि न यन्नश्ये–त्किमन्यज्ज्ञानसंमितम् ॥ १४ ॥ कान्पृच्छामः सुराः स्वर्गे, निवसामोवयंभुवि । किंवा ज्ञानरसः स्वादुः, किं वा स्वादीयसी सुधा ॥ १५ ॥ दर्शनेन समं नास्ति, त्रिलोक्यां सुखदायकम् । तस्मात्तदेतद्विज्ञाय, यतितव्यं सदाबुधैः ॥ १६ ॥ दर्शनं ज्ञानमूलं हि, धर्ममूलं चदर्शनम् । वैराग्य-भावनाहेतु–स्तदेवाहुर्जिनेश्वराः ॥ १७ ॥ नास्तिशास्त्रसमं लोके, शिवदंजन्मिनां पुनः । अपरं साधनं तस्मा–त्तदेवाद्यं समा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





श्रयेत् ॥ १८ ॥ चारित्रचक्रेण हि पापमूला-न्युच्छेद्य तीव्रेण सुबुद्धिमद्भिः । क्रोधादिकान्वैरिगणान्विधूय, संप्राप्यतां मोक्षसुखस्यलक्ष्मीः ॥ १९ ॥ पुरापि चारित्रसहायशालिनो-बभूवुरेकान्तसुखस्य भाजनम् । जिनेश्वरास्तीर्थविधानसंकुला-दुःखानिचात्रैव महान्तिसेहिरे ॥ २० ॥ चारित्ररत्नं जगतीतलेऽस्मि-न्विभाति तद्ग्राह्यमपोह्यसर्वम् । न चोरहार्यं न च वन्हिदाह्यं, बुद्धिप्रसाध्यं भवभीरुलोकाः ! ॥२१॥ दानंसुपात्रे विशदश्चशीलं, तपोविचित्रं शुभभावना च । भवार्णवोत्तारणयानपात्रं, धर्मं चतुर्धामुनयो वदन्ति ॥ २२ ॥ दानानिपुण्यानि दयान्वितानि, भवन्तिनूनं फलभाञ्जितानि । विना दयां तानितुनिष्फलानि, सैन्यानियद्वद्धतनायकानि ॥ २३ ॥ सुदर्शनः शीलगुणेन सिद्धः, शीलेनविघ्नानि जिगाय सीता, नलप्रिया दुःखभरंचतीर्णा, दुष्टानि कर्माणि हि यान्ति नाशम् ॥२४॥ अष्टापिकर्माणि तपःक्षिणोति, तपःकरोतीन्द्रियनिग्रहञ्च । सद्धर्मसिद्धेस्तप एवहेतु-स्तस्मात्सदाराध्यमिदं प्रदिष्टम् ॥२५॥ चिच्छेदहत्यां कृतदुष्प्रधर्षां, दृढप्रहारी तपसोबलेन । रूपं परंप्राप्यसनत्कुमारः, सिद्धिंपरां प्राप तपःप्रभावात् ॥ २६ ॥ सद्धर्मवृक्षः शुभभावनीर-सिक्तःफलेस्यादफलोऽन्यथा तु । भावः शुभोऽतः सुधियाविधेयो-हृदीच्छता धर्मफलं विशालम् ॥ २७ ॥ मूलंगुणानां विनयोयथाऽत्र, तुर्यःकषायः किलपापमूलः । मोक्षस्यमूलंहि विरागताच, दयाहि धर्मस्य तथैव मूलम् ॥ २८ ॥ सम्प्राप्तसम्यक्त्वगुणोऽत्रवेत्ति, सम्यग्दयां पालयितुं परो नो । सञ्जायतेसोऽपि गुरूपदेशा-ज्जीवादितत्त्वाधिगमेन स स्यात् ॥ २९ ॥ विना गुरुभ्योगुणनीरधिभ्य-स्तत्त्वं न जानाति विचक्षणोऽपि । आकर्णदीर्घायतलोचनोऽपि, दीपं विनापश्यति नान्धकारे ॥३०॥ पापान्धकारोद्धरणेऽतिमित्रं, संसारसिन्धूत्तरणे वहित्रम् । मायालतासन्ततितीक्ष्णदात्रं, सम्यक्त्वमाहुःसुकृतैकपात्रम् ॥ ३१ ॥ अगारिधर्मोऽप्यनगारिधर्मो-निर्वाणमार्गौ गदिताविमौद्वौ । समाश्रयन्भूजल-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मार्गवद्वै, भव्यः शनैः स्राक् शिवशर्म यायात् ॥ ३२ ॥ सद्वंशजन्मगृहिणी स्पृहणीयशीला, पुत्राः पवित्रचरिताः सुहृदोऽपदोषाः । लीलायितं वपुषिपौरुषभूषणा श्रीः, सद्धर्मतः किलफलानि पचेलिमानि ॥ ३३ ॥ धर्मस्य दुर्लभोज्ञाता, सम्यग्वक्ता ततोऽपि च । श्रोता ततोऽपि श्रद्धावा-न्कर्त्ताकोऽपि ततः सुधीः ॥ ३४ ॥ यस्य जीवन्ति धर्मेण, पुत्रा मित्राणि बान्धवाः । सफलं जीवितं तस्य, नात्मार्थे कोहि जीवति ॥ ३५ ॥ वाणी रसवती यस्य, भार्या पुत्रवती सती । लक्ष्मीर्दानवती यस्य, सफलं तस्य जीवितम् ॥ ३६ ॥ इत्थं सुगतिप्रदेशिनीं धर्मदेशनां समाकर्ण्य बहवोजनाः प्रतिबोधमवापुः । केचित्सम्यक्त्वधारिणो बभूवुः । केचिच्छ्रद्धालवः श्राद्धधर्मस्वीचक्रुः । केचिच्च संसारस्याऽसारतां विज्ञाय वैराग्यपरायणा जज्ञिरे । ततः प्राप्तावसरोऽजितसेनो नियोजिताञ्जलिः समुत्थाय गुरुंपप्रच्छ-मुनीन्द्र ? मयामत्पत्न्या च पूर्वस्मिन्भवे किं सुकृतं विहितम् ? येनाऽस्मिन् जन्मनि विपुला सम्पत्तिरद्भुता कीर्त्तिश्च नौ सञ्जाता । ततश्चतुर्ज्ञाननिधिः श्रीमान् दमघोषमुनीश्वरः प्रोवाच-अजितसेन ? शृणुष्व स्वपूर्वभवस्वरूपम् । सकलसमृद्धिभाजनं प्रभाविजनसंकुलं पुष्पपुराभिधंनगरमस्ति । तस्मिन्नतिविभवशाली सम्यग्धर्मतत्त्व-समाराधनैकवीरोल्लसत्प्रभावः सुलसनामा महेभ्योन्यवात्सीत् । तस्य धर्मपत्नी सुयशा नाम बभूव । तस्यसद्मनि दुर्गाख्ययाऽनयाधत्न्यासहितो दुर्गनामात्वं भद्रपरिणामी दासत्वेन तस्थिवान् । अथैकदा शुक्लपञ्चम्यां सुयशाः प्रातः साध्वीनामुपाश्रयं ज्ञानं समाराधितुं जगाम, तदानीं सादुर्गाऽपि ज्ञानपूजोपकरणानि गृहीत्वा तामनुययौ । तत्र निजस्वामिनीप्रमुखेन प्रमोद पूरितेननारीवृन्देन संपूज्यमानं ज्ञानं विलोक्य प्रशस्तभावा दुर्गादासी साध्वीसमीपं गत्वाऽपृच्छत्-आर्यिके ? अद्य का तिथिर्वर्त्तते ? साध्वी प्रोवाच-अद्य शुक्लपञ्चमी विद्यते, दुर्गाबभाषे-किमस्यांतिथौ विधेयम् ? साध्वी जगौ-अद्यखलु ज्ञानपुस्त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कानि स्वयंविलिख्यथवाऽन्यैर्लेखयित्वा चोत्तमवसनादिभिर्वेष्टयित्वा सुगन्धितैर्धूपपुष्पादिभिः पूज्यन्ते, तथैव ज्ञानपुस्तकानि प्रोन्नतस्थानेषु स्थापयित्वा तदग्रे सुस्वादूनि मनोहराणि विविधानि फलानि दीपप्रमुखानि पक्वान्नादीनि भावतोढौकनीयानि। यथाशक्ति तपश्चर्या च विधीयते इति साध्वीवचनं श्रुत्वा विनयावनता दुर्गा तां पुनरब्रवीत्–पूज्यतमे ? ज्ञानसमाराधनतः किंफलमवाप्यते ? तद्ब्रूहि कृपांविधाय। साऽवदत्–दुर्गे ? ज्ञानस्यसमाराधनेन निर्मलमतिविधायकं विशुद्धज्ञानं समासाद्यते, शाश्वतं सौभाग्यश्चप्राप्यते। सार्वज्ञं पदमपितेनैवलभ्यते। तन्निशम्यदुर्गाबभाषे–भगवति ? ये धनाढ्या भाग्यवन्तोभवन्ति त एव जनाः सकलसामग्रीसत्त्वाद्धर्मकार्याणि साधयितुं समर्था भवन्ति, ज्ञानाराधनामपि त एव साधयितुं समर्था भवन्ति मादृशा धनहीनाः सदादास्यपदभाजः परान्नभोजिनः सामग्रीशून्यत्वात्कुतोज्ञानमाराधयन्ति ? ततः साध्वी प्रोवाच–दुर्गे ? निजशक्त्यनुसारेणदानं विधेयम्, तपश्चर्याऽपि यथाशक्ति विधेया, शीलव्रतमपि निजशक्तिबलेनैवानुष्ठेयम्, यदस्मिन्धर्मकर्मणि धनसाध्यसामग्र्याः किञ्चिदपि प्रयोजनं न विद्यते, निजशक्तिसाध्यं चैतत्स्वाधीनं वर्त्तते। तस्मादस्मिन्व्रताचरणेकाऽपि क्षतिस्तवनास्ति, निजपरिणीतपुरुषमन्तराऽपरपुरुषसमागमः सर्वदा त्रिकरणशुद्ध्या हेयः। पर्ववासरेषु स्वपतिना सार्द्धमपि संगमो न विधेयः। एवंशीलव्रतपालनेतु दीनाऽदीनयोर्नास्ति विशेषः। केवलं मनःसाध्यमेतद्वर्त्तते, इत्येतद्वचनं समाकर्ण्य सादुर्गा दुर्गतिदायकः सर्वथा परपुरुषसंगमः पर्वातिथिषु स्वभर्तृसमागमश्च मयानविधेय इति साध्व्याः सन्निधौ प्रत्याख्यानं जग्राह। ततः सा शुद्धशीलव्रतं सम्यक्त्वञ्च स्वीकृत्य साध्वींवान्दित्वा निजगृहं समाययौ। वेश्मगता सा चिन्तयितुं लग्ना–बताद्यमेऽपूर्ववस्तुनः प्राप्तिः समजनि। तद्वृत्तान्तमभिन्नहृदयस्य भर्त्तुरग्रेमयाऽवश्यमेवनिवेदनीयमितिविज्ञाय तया



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निजस्वामिनोऽन्तिकेगत्वा साध्वीगदितः शीलव्रतादिमहिमा न्यवेदि । पुनः सा प्रोवाच–स्वामिन्? मया साध्व्याः समक्षं शीलव्रतं गृहीतमस्ति, तच्छ्रुत्वा सरलस्वभावः प्रमुदितमानसोदुर्गोऽपि निजपत्नीवच्छीलव्रतमङ्गीचक्रे । तदारभ्य शीलव्रतप्रभावेणसोऽपि लब्धसम्यक्त्वगुणोऽजनि । यथैकस्माद्दीपादपरःप्रदीपःप्रकाश्यते, तद्वदत्रापि सञ्जातम् । ततोधिकाऽधिकधर्मरुचिः सभार्योदुर्गो ज्ञानपञ्चमीदिवसे ज्ञानपूजां कर्त्तुं लग्नः, शीलव्रतं च पालयतिस्म, यथाशक्ति तपश्चर्या विदधे, शुभां भावनाश्च प्रत्यहंभावयतिस्म । एवं यथाविधिज्ञानधर्माराधनं विधाय स्वायुषः प्रान्ते कालं कृत्वा तावुभौ सौधर्मदेवलोकं प्रापतुः । तत्र च सर्वायुः परिभुज्य ततश्च्युत्वाऽस्मिन्भवे दुर्गजीवस्त्वमजितसेनकुमारोजातोऽसि, दुर्गाजीवश्चत्वदीयभार्याऽसौशीलवतीजाता । यतस्तयास्त्रिया पूर्वस्मिन्भवे भावतोभृशं ज्ञानसमाराधनं चक्रे, तस्मादस्मिन्भवेऽनया शुद्धमतिज्ञानं प्राप्य पूर्वभवाभ्यासवशेन विशुद्धंशीलं समाराधितम् । निजभार्यावचनेनत्वयाऽपि धर्माराधनं चक्रे, तत्प्रभावेणैवाऽस्मिञ्जन्मनि प्रभूता लक्ष्मीस्तव संप्राप्ता, सर्वत्रलोके प्रतिष्ठा च सञ्जाता, राज्यादिषुमाननीयस्त्वमभूरिति सविस्तरं पूर्वजन्मवृत्तान्तं दमितेन्द्रिय दमघोषमुनिमुखात्समाकर्ण्य तदनुचिन्तयतोस्तयोर्दम्पत्योर्जातिस्मरणज्ञानमुत्पेदे । तेन ज्ञानेन तावुभौ गुरुणा यदुक्तं तत्सत्यमेवाऽस्तीतिविविदतुः । ततस्तौ ज्ञानिगुरुं प्रोचतुः–मुनीन्द्र ? ज्ञानबलेन भवता यदवोचि, तत्सर्वं भवत्कृपयाऽऽवाभ्यां ज्ञानचक्षुषा साक्षाद्व्यलोकि । तदागुरुणाऽवादि–महाभाग ? पूर्वस्मिन्भवे गृहस्थ–श्राद्धधर्मं पालयतात्वया शीलव्रतप्रभावेणैतावत्फलमुपार्जितमस्ति । परन्त्वधुना कारागारसमं संसारवासंपरित्यज्य शुद्धसाधुधर्मं स्वीकृत्य सर्वोत्तमं ब्रह्मचर्यव्रतं मनःकायवचनैर्निर्मलं प्रसाध्याष्टादशसहस्रदोषविरहितं चारित्रं यद्यङ्गीकरोषि तर्हि पुनर्जननीगर्भगमनमनेकधा संसारदुःखवेदना



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





च तव नो भवेत्। इति गुरुवचनं सादरंहृदि निधाय सभार्योऽजितसेनकुमार स्तस्मिन्नेवक्षणे दीक्षांजग्राह। ततो निर्मलभावेन निरतिचारं चारित्रं पालयित्वा निजायुषःक्षये कालं कृत्वा तावुभौ पञ्चमे ब्रह्मदेवलोके देवत्वेन समुत्पन्नौ । तत्राऽपि देवायुः सम्पूर्णं प्रपाल्य तदन्ते मनुष्यभवं प्राप्य विशुद्धज्ञानधर्माराधनेन तौदम्पती मोक्षंगमिष्यतः। श्रीमतोऽजितसेनस्य, शीलवत्या स्तथैव च। चरित्रमेतदाख्यातं, पवित्रं शीलवर्द्धनम् ॥१॥ श्रुत्वैतत्पालयिष्यन्ति, शीलं ये भव्यदेहिनः। ऐहिकं शर्म ते प्राप्य, गमिष्यन्ति शिवंपदम् ॥ २ ॥ पूर्वाचार्यकृतग्रन्थ–संग्रहस्यानुसारतः। रचितं चरितंह्येत,–त्सूरिणाऽजितवार्द्धिना ॥ ३ ॥ क्काऽपिप्रसङ्गवशतोऽ–धिकदृष्टान्तयोजना। मूलार्थसङ्गतिं कर्त्तुं, विहिताऽवहितार्थिना ॥ ४ ॥ छद्मस्थदोषतःक्काऽपि, प्रमादेनाऽथवा यदि। अर्हदाज्ञाविरुद्धं वा, लिखितं किञ्चिदत्रवै ॥ ५ ॥ मनोवाक्कायतः पञ्च,–परमेष्ठिपदान्तिके। मिथ्यादुष्कृतमेवास्तु, निजात्मशुद्धिहेतवे ॥ ६ ॥ द्वीपरसग्रहधरणी(१९६७)प्रमितेऽथंवत्सरे मधौ मासे । कृष्णाष्टम्यां भानौ, मुम्बापुर्यां समापितो ग्रन्थः ॥ ७ ॥ यावद्भूमण्डलं धत्ते, यावच्चन्द्रदिवाकरौ। तावत्तिष्ठतु मेदिन्यां, चरित्रमिदमंद्भुतम् ॥ ७ ॥

इतिश्रीजगद्विभूषणशासनमहोदधिशीतरश्मिस्वपरसमयपारदर्शि तपोगच्छदिवाकरभव्यजनतारकप्रातःस्मरणीययोगनिष्ठाध्यात्मज्ञानविभाकर-श्रीमद्बुद्धिसागरसूरीश्वरशिष्यरत्नश्रीमद्–अजितसागरसूरिविरचितेऽजितसेनशीलवतीचरिते सुमतिचन्द्रोक्तसुसतीविषयकनृपति-प्रधानप्रभृति कन्याचतुष्टयीसुरक्षितशीलवृत्तान्तश्रवणजन्यद्वैविध्यं समाश्रयताऽरिमर्दनेन तन्निर्णयार्थं समादिष्टप्रधानकृत-कूटरचना तज्जन्यविविधयातना दमघोषसूरिवर्यागमन तत्कृतदेशनाश्रवणसञ्जातजातिस्मरणपूर्वक गृहीतदीक्षाधि-काराजितसेनशीलवतीमोक्षप्राप्तिवर्णनाधिकारे चतुर्थः प्रस्तावः समाप्तिमगमत् ॥

ॐ शान्तिः शान्तिः सुशान्तिः ॥ सर्वमङ्गलमाङ्गल्यं, सर्वकल्याणकारणम्। प्रधानं सर्वधर्माणां, जैनं जयति शासनम् ॥१॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# ॥ ग्रन्थकारप्रशस्तिः ॥

कल्याणप्रभवं प्रतापतरणिं सत्प्रेमवारांनिधिं, श्रीमज्जैनमतप्रकाशनविधुं सिद्धार्थभूपाङ्गजम् ।
सर्वानन्दविधानदक्षविभवं सद्भावनोल्लासितं, वन्देऽहं ललिताकृतिं जिनवरं श्रीवर्द्धमानं प्रभुम् ॥ १ ॥
यत्पादाम्बुजसेवनैकरसिकः सत्यार्थसंशोधकः, सत्संपत्तिपयोजतिग्मकिरणः स्वामी सुधर्माऽभवत् ।
यद्वाचांविभवो जनेषुविलसत्यद्यापि सिद्धिप्रदो, दुर्वादावनिभृद्विभेदनपविः सन्मार्गसंदीपकः ॥ २ ॥
तत्पट्टक्रमतो बभूव जगति ख्यातो जगच्चन्द्रकः, सूरीशः शिवदः प्रसाधितसदाचाम्लक्रियः कर्मठः ।
सिद्धान्तार्थविचक्षणो निजगुरोर्लब्धप्रतापोज्ज्वल-स्तस्मादेवशुभा तपोगणजनिर्जज्ञे जनानन्ददा ॥ ३ ॥
तत्पट्टागतसन्ततिक्रमतया प्रौढप्रतापाश्रयः, सूरिः श्रीमुनिसुन्दरः समभवद्भव्यात्मनां भावितः ।
येन ग्रन्थततिः कृताऽतिरुचिरा नानार्थरत्नाकरो-योगाङ्गप्रथितोरुबुद्धिविभवेनोल्लासिते भूतले ॥ ४ ॥
तत्पट्टक्रमतोऽजनिष्ट जनतोद्धर्त्ताऽतिभास्वद्विभो-लक्ष्मीसागरसूरिरुन्नतमतिर्विद्वज्जनश्लाघितः ।
यद्वाक्यामृतपानतो नतजना दीव्यश्रियं लेभिरे, दीव्यं चित्रचरित्रमुन्नतिकरं यस्य त्रिलोकश्रुतम् ॥ ५ ॥
तत्पट्टक्रमसेवकः शिवरमासंसर्गसंसक्तधी,-र्धीरोर्वीधरबोधकः समजनि श्रीहीरसूरीश्वरः ।
येनेदं पृथिवीतलं विरचितं सार्वज्ञधर्माश्रितं, सत्त्वानामभयप्रदश्चविहितो धर्मोऽतिकम्पामयः ॥ ६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततस्तत्पट्टप्रागवनिधरतिग्मांशुरनघः, विशुद्धार्थान्वेषी विशदजिनधर्मप्रथयिता ।
उपाध्यायः श्रीमान् सहजजलधिस्तीव्रतपसां, निधिर्जज्ञे सर्वा-ऽमरनरगणैः सेव्यचरणः ॥ ७ ॥
तत्पट्टपूर्वाचलभानुमाली, श्रीवाचकेन्द्रो जयसागराख्यः। बभूव संतर्जितपञ्चबाणः, सिद्धान्ततत्त्वोदधिपारगामी ॥८॥
तत्पट्टप्रथितप्रभावनिकरो रम्यक्षमासेवधिः, सद्ध्यानेन जितात्मवैरिनिचयः सत्त्वानुकम्पारतः ।
श्रीमद्वाचकमानसागरगणी रेजे विराजद्यशाः, सद्धर्मप्रथनैकलब्धविजयो दुर्वादिदन्त्यङ्कुशः ॥ ९ ॥

तत्पट्टमेरुशिखरं जितसागराख्यः, प्रद्योतयन् गणिवरो वरदानदक्षः ।
बभ्राज भूमितिलकः श्रुतवद्वरेण्यो-धर्माध्वनिस्थितिमतां विदुषां शरण्यः ॥ १० ॥

तत्पट्टोदयभूधरे दिनमणिर्दीव्यर्द्धिसद्भाजनं, श्रीमन्मङ्गलसागरो गणिवरो निःशेषितापद्गणः ।
जातोऽनल्पगुणैः समाश्रिततनुः सम्यक्क्रियाराजित,-स्तत्त्वाऽतत्त्वविवेचनैकविदुरः संपन्नसर्वागमः ॥ ११ ॥
तत्पट्टे प्रथिते प्रकाशितमतिः संसत्सुजातस्मृतिः, श्रेयः सन्निधिपद्मसागरगणिर्जज्ञे तपोनायकः ।
येनेदं भुवनं विशुद्धमनसा चक्रे स्वधर्मान्वितं, जैनेन्द्रप्रथितानुशासनगतिः सर्वत्र विख्यापिता ॥ १२ ॥

तत्पट्टपूर्वगिरिराजदिनेशलक्ष्मीं, दध्रे दयासुभगधर्मधुरन्धरश्रीः ।
सुज्ञानसागरमुनिर्मुनिमाननीयो-ज्ञानक्रियोभयसमानमतिप्रसारः ॥ १३ ॥
यस्याऽभवच्छिष्यधुरन्धरश्री-र्भूरिप्रभावोमुनिभावसागरः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यद्बोधमासाद्य जिनोक्तधर्मं, श्रीमेदपाटाधिपतिः समाचरत् ॥ १४ ॥
सभीमसिंहोनृपतिः स्वभक्त्या, श्रीजैनसंघस्यगुरुप्रतापात् । कार्याणिभूयांसिमहोपकृत्यै, संपादयामासविनीतभावः ॥१५॥
तत्रत्यसंघस्य महाग्रहेण, पद्मप्रभोस्तेनमुनीश्वरेण । चक्रे प्रतिष्ठाऽञ्जनरेखयान्विता, महामहेनोन्नतिहेतुभूता ॥ १६ ॥
तत्रैवतेनाजितनाथमर्चुस्त्रिलोकनाथस्य सुरम्यबिम्बम् । प्रतिष्ठितं लोकसुखाय साञ्जन–रेखं धरानाथविबोधकेन ॥ १७ ॥
तत्पट्टश्रियमाबभार विकसद्बुद्धिर्जिनोक्तागमे, भूविख्यातसरूपसागरमुनिर्भव्याङ्गिनां भव्यवाक् ।
निर्दोषश्रमणार्हधर्मसरणीं प्रख्यापयद्भिर्निजैः, शिष्यैः सेवितपादपद्मयुगलः शुद्धक्रियाराधकः ॥ १८ ॥
तत्पदश्रियमनुत्तमोर्जितां, ज्ञानसागरमुनीश्वरो दधौ । यद्विशुद्धगुणराशिराजितं, राजतेस्म ककुभांहि मण्डलम् ॥१६॥
तत्पट्टश्रियमद्भुतां मुनिवरः प्रद्योतयामासिवान् , सद्वैराग्यसुरङ्गरञ्जितमनाः श्रीमन्मयासागरः ।
माया येनतपस्विना परिहृता नागप्रियेवद्रुणा–त्सद्बोधामृतसिञ्चनेन जनतां जातप्रमोदां व्यधात् ॥ २० ॥
तत्पट्टदेवगिरिसानुनि भासमानः, श्रीनेमिसागरमुनिः कलितामरश्रीः ।
सावद्यपत्तमनिशं परिभूयभव्या–न्सर्वातिशायिविभवान्सुतरां चकार ॥ २१ ॥
योलब्धलब्धिरनघश्रमणाग्रगामी, सद्बोधवृष्टिवशतो वशिनां वरेण्यः ।
भूमीतलं जिनवृषाङ्कुरितं विहारं, कृत्वाऽतिरम्यचरितः सुतरांचकार २२ ॥
तत्पट्टश्रियमाततान विबुधश्चारित्रचूडामणिः, श्रीजुष्टो रविसागरो रविरिव प्राप्तप्रतापोत्करः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





यो धर्मं शिथिलं निवार्य विधिना सत्यात्मकं चाक्रिवान्, धर्मोद्योतकरीं क्रियाञ्च विशदां संदर्शयामासिवान् ॥२३॥
योग्याहारविहारकर्मकुशलो योध्याननिष्ठक्रियः, सारासारविशेषवेदनपटुः शुद्धात्मधर्मप्रियः।
सार्वज्ञप्रथिताध्वबोधनरतिर्निर्भिन्नविघ्नावलिः, संघानां समतालयः समभवद्भव्यप्रभावाश्रितः ॥ २४ ॥
तत्पट्टामरशैलसानुविलसल्लक्ष्मीः क्षमासेवधिः, सुज्ञानः सुखसागरो मुनिवरो जज्ञे कृपासागरः।
यत्पादाम्बुजसेवनेन सकलाः संपत्तयो देहिनां, हस्ताब्जोदरसंगताः समभवंश्चिन्तातिगाः सर्वदा ॥ २५ ॥
योनिर्वाणरमाप्रियः पृथुमतिः पञ्चप्रमादोज्झितः, प्रत्यक्षीकृतदेवतत्त्वमहिमा भूयस्तपःसन्ततिः।
कल्याणाकलितस्वभावविभवः शुद्धक्रियादेशको–दिक्चक्रं विशदीचकार विशदैश्चारित्रचन्द्रांशुभिः ॥ २६ ॥
तत्पट्टाचलचक्रवर्त्तितरणिः कारुण्यसिद्धापणः, सर्वस्वार्पणनिःस्पृहः श्रितवतां सत्यश्रिया भूषितः।
शान्ताकारतयाऽधरीकृतधरादेशो गिरा वाक्पतिः, सूरिः श्रीमद्बुद्धिसागरगुरूरेजे जगद्दीपकः ॥ २७ ॥
यः सर्वागमशास्त्रवारिधितलस्पर्शैकदक्षक्षणः, क्षीणक्लिष्टविशिष्टकर्मनिवहः सर्वार्थविद्विश्रुतः।
ग्रन्थाननैकविधान्विचाररुचिराँल्लोकोपकारक्षमान्, चक्रे भूरिभवार्त्तिनाशनपरो माधुर्यवारांनिधीन् ॥ २८ ॥
यत्पादाम्बुजसेविनो विनयिनः शिष्यप्रशिष्यव्रजा–भ्राजन्ते श्रुतधारकाः कृतधियो धर्माध्वनि प्रोद्धताः।
गाम्भीर्यादिगुणालयाः सुचरितैः संरञ्जितप्राणिनः, संरुद्धाश्रवपापकर्मगतयो भूपीठसंपावकाः ॥ २९ ॥
तत्पट्टप्रथुसंपदाश्रितवपुर्भास्वत्प्रभाभासुरः, सूरीशोऽजितसागरः शुचिमतिः सिद्धान्तसारोदधिः।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सम्यक्संस्कृतबुद्धिसिद्धिसदनं सर्वोन्नतेः साधनं, सच्छास्त्रागमतत्त्वविद्विजयते वक्ताप्रसिद्धः सदा ॥ ३० ॥
अजितसेनचरित्रमिदंशुभं, शुभरसोर्जितमात्महितावहम् । विरचितंविरातिप्रियसूरिणा, अजितसागरसद्गुरुणामुदे ॥ ३१ ॥
श्रीमद्विक्रमतोऽग्निसिद्धिनिधिभूसंक्रामिते ( १९८३ ) वत्सरे, चातुर्मास्यकृते स्थितेन मुनिना हेमेन्द्रशिष्याणुना ।
संदृब्धाऽऽश्विनपूर्णिमाशशधरे विद्यापुरे पूर्वरे, सम्पूर्णाविहिता प्रशस्तिरनघा ग्रन्थप्रणेतुः शुभा ॥ ३२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# ॥ अथाजितसेन-शीलवतीकथासारः ॥

प्रणम्य श्रीमहावीरं, जगदानन्ददायकम् । शीलवत्याश्चरित्रस्य, सारं वक्ष्ये समासतः ॥ १ ॥
दयाधर्मं समिच्छद्भिः, शीलं पाल्यं सदाबुधैः । यतो मैथुनतो जीव-वधः प्रोक्तो जिनेश्वरैः ॥ १ ॥
मैथुनं वनितासंगाज्जायते तद्धनं विना । नैव सम्पद्यते जातु, तच्चाऽऽरम्भसमुद्भवम् ॥ २ ॥
आरम्भे नाऽस्ति जीवानां, दयाश्रेस्करी नृणाम् । मैथुनासक्तजीवानां, कार्याऽकार्यज्ञता नवै ॥ ३ ॥
निरङ्कुशतया चैते, न जानन्ति जगद्वयम् । यत्पापं मैथुनासक्ताः, कुर्वन्ति तत्र भूतले ॥ ४ ॥
शीलं शीलयतां नृणां जलनिधिर्गर्त्तायते सर्वदा, वह्निर्वारिकणायते गिरिगणः संजायते भूमिवत् ।
क्रोधध्मातभुजङ्गमोऽपि कुसुमश्रेणीयते वक्षसि, तीव्रोद्वेगकरं विषं परिचितं पीयूषवज्जायते ॥ ५ ॥
"[1]आणं ताण कुणंति, जोडिय करा दासव्व सव्वे सुरा, मायंगाहि जलग्गि सीह पमुहा वट्टंति ताणंवसे ।
हुज्जा ताण कुओवि नो परिभवो सग्गापवग्गासिरी, ताणं पाणितलं उवेइविमलं सीलं न लुंपंतिजे " ॥ ६ ॥
किञ्च-ये जनाश्चन्द्रवच्छीलं, निर्मलं पालयन्ति ते । शीलवतीव संयान्ति, सुखं स्वर्गाऽपवर्गयोः ॥ ७ ॥

---

१ आज्ञां तेषां कुर्वन्तियोजितकरा दासवत्सर्वेसुराः, मातङ्गाऽहि जलाग्निसिंहप्रमुखा वर्तन्ते तेषां वशे ।
भवेत्तेषां कुतोऽपिनो परिभवः स्वर्गाऽपवर्गश्री-स्तेषां पाणितलमुपैति विमलं शीलं नलुम्पन्ति ये ॥ ६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तद्यथा—अस्ति जम्बूद्वीपगते भरतक्षेत्रे स्वर्गपुरीसमानं विबुधविराजितं जनाऽऽनन्दप्रदं नन्दनपुरनाम प्रसिद्धं नगरम्। तत्रप्रतिहतप्रतिपक्षबलोऽरिमर्द्दनो नाम नृपतिरासीत्, तस्मिँश्च गुणरूपरत्ननिधानो रत्नाकराऽभिधेयः श्रेष्ठीन्यवसत्, रूपगुणविभवैः साक्षाल्लक्ष्मीरिवलक्ष्मीर्नामतस्य भार्याचासीत्, अनपत्यत्वाच्छ्रेष्ठीमनासिभूरिसंतापमकरोत्।

अन्यदा लक्ष्मीः श्रेष्ठिनमुवाच, भर्त्तः! अत्रैव नगरोद्यानेश्रीमदजितनाथमन्दिरद्वारे, अजितबलादेवीतिष्ठति, साऽपुत्रस्य पुत्रं, निर्धनस्य धनं, राज्यहीनस्य राज्यं, मूर्खस्य विद्यां, दुःखितस्य सुखं, अन्धस्य नेत्रं, रोगिणश्चारोग्यं प्रयच्छति, तच्छ्रुत्वा श्रेष्ठिना—देव्या आराधनं विहितम्, तेन तस्य पुत्रलाभोऽजनि, तस्याऽजितसेनेत्यभिधानं तेन विनिर्मितम्।, ततः श्रेष्ठी जिनधर्मे विशेषतो भक्तिबभार, निजपितुर्मनोरथैः सहाऽजितसेनः प्रतिदिनं ववृधे, सच सर्वकलासु प्रवीणोऽभूत्, क्रमेण लावण्य सम्पदाऽऽढ्यो यौवनाऽवस्थां जगाम, तस्य समग्रलोकाऽधिकरूपादिगुणविभवान्विलोक्य श्रेष्ठी व्यचिन्तयत्, यद्यस्मत्पुत्रस्य गुणयोग्याभार्या न मिलिष्यति तदा सर्वेगुणानिरर्थका भविष्यन्ति

यतः— [1]सामी अविसेसन्नू, अविणीओ परियणोपरवसत्तं। भज्जाय अणणुरूवा, चत्तारि मणस्स सल्लाइं॥ १॥

तदानीमेकोवणिक्पुत्रस्तत्रसमाऽऽगतः श्रेष्ठिनं प्रणम्य तदन्तिके सउपविष्टः श्रेष्ठिनाव्यापारवार्तापृष्टा, तेन सर्वं वृत्तान्तं तदग्रे निवेदितम्, विशेषतस्तेन कथितं भवदाज्ञया कृतमङ्गलां नगरीमहं प्रयातस्तत्र जिनदत्तश्रेष्ठिना सार्धं ममपरिचयो जातः, तेन भोजनायाऽहं निमन्त्रितः, तद्गृहे भोक्तुं गतेन मया तस्यैका कन्यका दृष्टा, चन्द्रवदना, पद्मरागहस्तचरणा,

---

१ अविशेषज्ञः स्वामी, अविनीतः परिजनः परवशत्वम्। भार्याचाननुरूपा, चत्वारि मनसः शल्यानि॥ १॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





विद्रुमाऽधरा दीव्यरत्नलोचना, रजतसमाननितंबबिम्बा, सुवर्णसमानसर्वाङ्गी मदनराजनिधानस्य जङ्गमा मञ्जूषेवसा बभौ, तां विलोक्य श्रेष्ठिनमपृच्छम् । इयं कन्या कस्यास्ति ? श्रेष्ठिना कथितं भद्र ! इयं ममपुत्री मूर्त्तिमतीचिन्ताऽस्ति.

[२]किंलट्ठं लहिहीवरं पिययमं किं तस्ससंपज्जिही, किं लोयं ससुरा इयं नियगुणग्गामेणरंजिस्सए ।

किं सीलं परिपालिही पसविही किं पुत्तमेवं धुवं, चिंतामुत्तिमई पिऊणभवणे संवट्टए कन्नगा ॥ १ ॥

किश्चेयं कन्या स्वशरीरसौन्दर्येण देवाङ्गनानां दर्पं दलयति, अनेकगुणैर्विभूषिता, हिताऽहितपण्डिता, सदाचार विचारेषु श्लाघनीया चाऽस्ति, तस्माच्छीलवत्यभिधानं तस्या अस्ति, आबाल्यादेव सा प्राक्तनसुकृतोदयेन सखीनामिव शकुनादीनां भाषासु प्रवीणाऽस्ति, तस्या योग्यवराऽलाभे महती चिन्ता जाता, तस्मादियं साक्षाच्चिन्तेति मया कथितम्' एवं शृण्वता मया तस्मै कथितं, श्रेष्ठिन् ! संतापं माकुरु ! नन्दनपुरवास्तव्यस्य रत्नाकरश्रेष्ठिनोऽजितसेननामा सूनु विंशिष्टरूपादिगुणसंपन्नोऽस्ति, तवपुत्र्या वरः सएवोचितोऽस्ति, तदा जिनदत्तेनाऽभाणि-भद्र ? महाचिन्तासागर निमग्नोऽहमनुकूलवरोपदेशप्रवहणेन त्वयासमुध्धृतोऽस्मि, एवमभिधाय तेनाऽजितसेनाय शीलवतीं दातुं मयासह निज पुत्रो जिनशेखरः प्रेषितः, सचाऽत्रसमागत्योपविष्टोऽस्ति, इदानीं भवते यद्रोचते तद्विधीयताम्, इत्याकर्ण्य मोदमानेन रत्नाकरश्रेष्ठिना त्वयैतच्छोभनं विहितमित्याख्याय जिनशेखरः समाहूतः, तेनाऽपि सादरं निजभगिनीं शीलवतीम-

२ किं श्रेष्ठं लप्स्यते वरो प्रियतमः किं तस्याःसंपत्स्यते, किं लोकं श्वसुरादिकं निजगुणग्रामेण रञ्जिष्यते ।

किं शीलं परिपास्यति प्रसविष्यते किं पुत्रमेवं ध्रुवं, चिन्तामूर्तिमतीपितुर्हि भवने संवर्त्तते कन्यका ॥ १ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जितसेनायप्रदत्ता, ततोऽजितसेनस्तेन सार्धं कृतमङ्गलायामागत्य शीलवतीं परिणीतवान्, ताश्चादाय सस्वकीयं नगरं समागतः, तत्र स निश्चिन्तीभूय विलासं कृतवान्।, ततोऽन्यदा निशीथे घटं गृहीत्वा शीलवती गृहान्निःससार। किञ्चित् कालानन्तरं सा पश्चात् समागता, तदा कुमारकथितं रत्नाकरः श्रेष्ठी तच्चेष्टितं विज्ञाय व्यचिन्तयत्, यदियं नूनं कुशीलाऽस्ति, यतोऽद्य मध्यरात्रे गृहान्निर्गत्य कुत्रचित्सा गतवती। तेनेयं गृहे न रक्षणीया, यतः—

"[१]धण-रस-वसओ-उम्मग्ग-गामिणी भग्ग-गुण-दुमा कलुसा। महिला दो वि कुलाइं, कूलाइं नइव्व पाडेइ" ॥१॥

तस्मात्सा निजपितृगृहे प्रेषितव्या, तदाऽजितसेनोऽब्रवीत्, तात! यदुचितं तद्भवता विधीयताम्। ततः श्रेष्ठिना शीलवती कथिता—भद्रे! तवजनकेन सन्देशः प्रहितः, शीलवती सद्योमद्गृहे प्रेषितव्येति, तस्माच्वं सज्जीभव, स्वयमेवाऽहं त्वां तत्र मोक्तुमागच्छामि, तदासाऽपि मनसि ज्ञातवती, रात्रावहं गृहान्निर्गता तस्मान्मां कुलटां शंकमानः श्वशुरो मामेवमाज्ञापयति। तदपि मया विलोकनीयमिदानीं किं जायते, इति विचिन्त्य शीलवती रथमारुह्य श्रेष्ठिना सार्धमचालीत्। अग्रतो गच्छतोस्तयोरेकानदी समागता, श्रेष्ठी वधूमवोचत्, उपानहौ निष्कास्य त्वया सरिदुत्तरितव्या, इति श्वशुरवचनमवगणय्य सोपानत्कचरणा सा नदीमुत्ततार, तदा श्रेष्ठी व्यचिन्तयत्, एषाऽविनीताऽस्ति, ततोग्रेप्रचलतोस्तयोः प्रावृडारम्भेऽत्यन्तं फलितमेकं मुद्गक्षेत्रं समागतम्, तद्विलोक्य श्रेष्ठी जगाद, अहो! मुद्गक्षेत्रं बहुफलितम्, तस्मात्तदधिपतेर्भूरिलाभो भविष्यति, शीलवत्यप्यवदत्—यदि क्षेत्रपतिरेतद्भक्षणंनाकरिष्यत्तदातस्य महान्लाभोऽभविष्यत्, एवंश्रुत्वा श्रेष्ठिना चिन्तितम्, अक्षतं क्षेत्रं विलोकमा-

१ धनरसवशत उन्मार्गगामिनी भग्नगुणद्रुमा कलुषा। महिला द्वेअपि कुले, कूले नदीव पातयति ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाऽपीयं भद्वितमेतत्कथयति, तस्मादियं वितथवादिनी विद्यते, ततोऽग्रे व्रजतोस्तयोरेकं सम्पदाढ्यं सुखिजनसम्भृतं नगरं समागतं तद्दृष्ट्वा श्रेष्ठी बभाषे, अहो ! अस्य नगरस्य रमणीयता ? शीलवती जगौ, यदिदं नोद्वसितं तदारमणीयम् ! तदानीं श्रेष्ठिना स्वचेतसि विचिन्तितं मदोन्मत्तैषाऽसमञ्जसवादिनी वर्त्तते, ततोऽग्रेऽनेकप्रहारैर्जर्जरिताङ्गः शस्त्रकरः कश्चिदा गच्छन्नेककुलपुत्रकः श्रेष्ठिनाव्यलोकि ? ततस्तेनोक्तम्, अहो ? अयं कश्चिद्वीरपुरुषो विद्यते । तदाशीलवत्या कथितम् । अयं कुत्राऽपि कुट्टितोऽस्ति, श्रेष्ठिना चिन्तितं किं वीरस्य शस्त्रप्रहारा न लगन्ति !, किन्त्वेषा वधूरेवायुक्तवादिनी, ततोऽग्रे-व्रजन् श्रेष्ठी वटतरोरधो विश्रामायोपविष्टः, शीलवती च वटच्छायां विमुच्य दूरत उपाविशत्, तदा श्रेष्ठ्यवोचद्-भद्रे ! छायायामुपविश, तथाऽपि सा नोपविष्टा, ततः श्रेष्ठिना निश्चिक्ये, एषा सर्वथा विपरीतवर्त्तिनी विद्यते, ततोऽग्रे कश्चिद् ग्रामः समागतः, तदानीं वधूः श्रेष्ठिनमकथयत्, अत्र ममभातुलस्य गृहं विद्यते, तस्मात्तस्यशुद्धिं करोमि तावत्त्वमत्र निषीद, एवमुक्त्वा सा ग्रामं प्राविशत्,-तस्या मातुलस्तामचिन्त्यागमनां विलोक्य पप्रच्छ, वत्से ! क्व गच्छसि ? साऽवदत्-मच्छ्वशुरेण साकं पितृगृहं व्रजामि, मातुलेन प्रोक्तं-तव श्वशुरः क्वाऽस्ति ? सा प्रोवाच-सतु बहिः स्थितः । ततस्तत्र गत्वा मातुलः स्वागतपूर्वकं श्रेष्ठिनमाजुहाव, स च प्रागेव क्रुद्ध्यमानस्तद्गृहं प्रयातुं नैच्छित्, तथाऽपि बहुशः प्रार्थयित्वा श्रेष्ठिनं स निजगृहमानिनाय, तत्र भोजनं विधाय श्रेष्ठी बहिरागत्य मध्याह्ने जाते सति रथे विश्रामायाऽवतस्थे, तदाशीलवत्यपि रथस्य छायायामुपविष्टा, तदानीं करीरस्थोवायसो मुहुर्मुहुरारटत्, तदाशीलवत्या कथितं रे वायस ! कटु रटन् किं न विरमसि ?,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यतः—ऍक्के दुन्नय जे कया, तेहिं नीहरिय घरस्स । बीजादुन्नय जइ करउं, तो न मिलउं पियरस्स ॥ १ ॥

एतत्सर्वं रत्नाकरश्रेष्ठिना श्रुत्वा शीलवती भणिता वत्से ? कथमेवंब्रूषे ? साऽवदत्, किमपिनाऽस्ति, श्रेष्ठिना गदितं नाऽस्तीति किं ब्रवीषि, वायसमुदिश्य यद्दुर्न्यायमवादि तस्मिन् किञ्चदपि कारणं तु भविष्यत्येव, तदा शीलवती प्रोवाच, यद्येवं तर्हि तात ? शृणुष्व,

" सौरंभ–गुणेणं छेय–घरिसणाईणि चंदणं लहइ । राग–गुणेणं पावइ, खंडण कढणाइं मंजिट्ठा ॥ १ ॥ "

तात ! इत्थं ममाऽपि गुणः शत्रूभूतोजातः, यतः सर्वकलासुमुख्यं शकुनंविहगादीनां भाषांचाहं जानामि, तस्माद् ह्यस्तन निशायां रटन्त्या शिवयाज्ञापितं सरितः पूरेणवह्यमानं शवं बहिर्निष्कास्य कश्चिद्रत्नानि गृह्णातु, तद्भक्ष्यंञ्च मह्यंददातु, एवं श्रुत्वा घटं गृहीत्वाऽहं बहिर्गता, घटं च वक्षसि निबध्य नद्यां प्रविष्टा, जलप्रवाहाच्छवं निष्कास्यतद्वस्त्रग्रन्थिगतानिरत्नानि मयागृहीतानि, मृतकश्चक्रोष्ट्र्यै प्रदत्तम् । गृहं समेत्य मया तानि रत्नानि घटे निक्षिप्य भूमौनिखातानि, इत्येकदुर्न्यायप्रभावा दहमेतादृशीमवस्थां प्राप्ताऽस्मि, अधुनाऽयंवायसोवदन् ज्ञापयति, अस्यकरीरस्यमूले दशलक्षनिष्काणां निधानमस्ति, तद् गृहीत्वा मह्यं करंबकंदेहि, एवं निशम्य श्रेष्ठी सद्यः समुत्थायाऽवदत्, वत्से ! एतत्सर्वं सत्यमस्ति ?, शीलवती जगाद, भवतामग्रे किमहमसत्यं वदामि ? किंवा, " करस्थिते कङ्कणे दर्पणस्य किं प्रयोजनम् " स्वयमेवत्वंविलोकय ! ततःश्रेष्ठी तत्रैव-

१ एको दुर्नयो यः कृत–स्तेननिरगमं गृहात् । द्वितीयं दुर्नयं यदि करोमि, तदा न लभे पितृगृहम् ॥ १ ॥

२ सौरभ्यगुणेन छेद–घर्षणादीनि चन्दनं लभते । रागगुणेन प्राप्नोति, खण्डनकथनानि मञ्जिष्ठा ॥ १ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स्थितः, निशायां च तन्निधानं तेनगृहीतम्, अनेन व्यतिकरेण चमत्कृतः अहो ! इयं तु साक्षाल्लक्ष्मीरस्तीतिवदन् बहुमान पूर्वकं तां रथे चोपविश्य श्रेष्ठी तस्मादेवस्थानान्निर्वृत्य तस्यैव वटतरोः सन्निधौ समागतः, तत्र तेनवधूः प्रष्टा–कथंत्वमस्य वटवृक्षस्य छायायां नोपविष्टा ! तदासाऽवदत्, वृक्षस्याऽधः सर्पदंशादिकभयं वर्तते, किञ्च चिरं तत्रोपवेशनाच्चौरादिकभयं जायते, तथैव तदधोभागस्थितानां वायसबकादीनां विष्ठापतनस्यभयं वर्त्तते, किन्तु दूरदेशस्थितानां पूर्वोक्तं किमपि भयं न जायते, तदा तं शूरमुद्दिश्य पुनः श्रेष्ठिना पृष्टम्, वत्से स वीरपुरुषः कुट्टितः, इति त्वया प्रोक्तं तस्यकोहेतुः ? शीलवती जगाद–योजर्जरिताङ्गः स नैवशूरः परन्तु यः प्रथमं न प्रहरति सशूरः, ततस्तन्नगरमागतं विलोक्य श्रेष्ठी तां बभाषे, इदं नगरं त्वयोद्वसितं कथं ज्ञापितम्, साऽवोचत्, यत्रस्वागतकारकः स्वजनो न तिष्ठति तत्स्थानं जनाकीर्णमपि शून्यमिव ज्ञेयम् ॥ ततोमुद्गक्षेत्रं विलोकमानः श्रेष्ठी तां प्रोवाच, इदं क्षेत्रं भक्षितं त्वयाकथमुक्तम्, शीलवती जगौ, धनिकाद्धनं गृहीत्वा क्षेत्रपतिना कुसीदेन तद्धनं भक्षितं चेत्तत्क्षेत्रं भक्षितं कथ्यते, तस्मिन् समये नदीं विलोक्य श्रेष्ठिना सा जगादे, नदीमुत्तरन्त्या त्वया पद्भ्यामुपानहौ कथं न निष्कासिते ? साऽब्रवीत्, वारिणि कीटकंटकादयो न दृश्यन्ते, तस्मादनुपानत्कचरणाभ्यां गमने क्षतिर्भवेत्, ततोगृहमागता शीलवती श्रेष्ठिनं भूमिसात्कृतानिरत्नानि दर्शयामास, तेन प्रमुदितो रत्नाकरःश्रेष्ठी तत्सर्ववृत्तान्तं निजभार्यां पुत्रं च विज्ञाप्य शीलवतीं गृहस्वामिनीं चकार, कियत्कालाऽनन्तरं जीवितव्यस्य चाञ्चल्याद्रत्नाकरश्रेष्ठी मृत्युमवाप, तद्विरहाच्च छायेव तस्यभार्या लक्ष्मीरपि पञ्चत्वमियाय, ततोऽजितसेनोऽपि जिनधर्मेरक्तः कालंगमयामास, अन्यदाऽरिमर्दननरेश एकोनषट्शतेषु मन्त्रिषु मुख्यमेकं मन्त्रिणं विधातुं व्यचिन्तयत्, प्रत्येकं च पौरजनानपृच्छत्, पौराः ?



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यः पादेनमां प्रहरति स कीदृशं दण्डमर्हति ? तत्त्वार्थमजानानास्ते प्राहुः देव ! अन्यत् किं ? तस्य शारीरिकोदण्डो विधेयः, ततोनृपेणाऽजितसेनः पृष्टः, तदातेन प्रोक्तं देव ? विचार्य प्रत्युत्तरं दास्यामि, अथ गृहंगत्वा तेन शीलवती तद्वृतान्तं पृष्टा, चतुर्विधबुद्धिप्रवीणा शीलवती विचिन्त्य कथयामास, भर्तः ! पादप्रहारकर्त्तुर्महान्सत्कारो विधातव्यः, तदा तेन सा पृष्टा, प्रहर्तुः सत्कारः कथं युज्यते, सा जगौ–भार्यां विनानृपतिंपादेन प्रहरामीति संकल्पमपि कर्तुमन्यस्याऽधिकारो नाऽस्ति, तर्हि प्रहारस्य का वार्ता ? ततोऽजितसेनो राजसभायामागत्य पूर्वोक्तवृत्तान्तं राज्ञेनिवेदितवान्, तन्निशम्य नृपतिः सन्तोषमवाप्यतं सर्वमन्त्रिषु मुख्यंमन्त्रिणं चकार, ततः कस्मिंश्चित् समये सिंहरथनामा सिमान्तनृपतिररिमर्द्दनभूपमभिषेणयितुं निर्गतः । तदानीं व्रजतां मत्तगजानां मदवारिवृष्ट्यामहीतलं सिञ्चन्, तरलगतीनां वाजीनां खुराघातैरुद्धतरजो मेघपटलेन गगनाङ्गणं पूरयन्, प्रचलद्रथानां धवलध्वजपताकाबलाकाश्रेण्या शोभमानः, तूर्याणां गभीरनादगर्जारवेण ब्रह्माण्डभाण्डोदरं जीर्णयन् अरिमर्द्दनभूपोऽपि नूतनोजलधरसम्भ्रम इव सिंहरथनृपमभियर्यौ, तस्मिन् समये शीलवती निजभर्तारं सचिन्तं विलोक्य चिन्ताकारणमपृच्छत् । अजितसेनेन कथितम्–नृपतिना सार्धमहं गच्छामि, त्वां गृहीत्वा यदि व्रजामि तर्हि मदीयंगृहं शून्यं जायते, किञ्चत्वमखण्डितशीलाविद्यसे, तथाऽपि त्वामेकाकिनीं गृहेविमुच्य व्रजतो मेमनोऽसंन्तुष्टं जायते, तस्मादहं चिन्तातुरोजातः, इति निशम्य शीलवती प्रोवाच, प्राणेश !

अग्निः शीतलतां प्रयाति रविरप्याशां कुबेराश्रितां, प्रत्युद्द्योतयते सुमेरुरचलः क्काऽपि प्रकम्पं भजेत् ।
भूपीठं च नभस्तलं मरुदपि स्थैर्यं भजेदर्णवो,–मर्यादां त्यजति क्षमं तदपि नो सत्या विभङ्क्तुं व्रतम् ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथाऽपि प्रियतम ! भवतश्चित्तशान्तये पुष्पमालामिमां गृहाण, ममशीलप्रभावादियं सर्वदाऽम्लानैव स्थास्यति, कदाचिदियं म्लायति तदामेशीलं खण्डितमिति ज्ञातव्यम्, एवं ब्रुवाणा सा स्वहस्तेन निजभर्तुः कण्ठेपुष्पमालामार्पयत्, ततोऽजितसेनो मन्त्रिप्रवरः शीलवतीं सद्मनि विमुच्य निर्वृत्तचेता अरिमर्दनभूपेन सार्धं निरगमत्, निरन्तरं प्रयाणं कुर्वन् भूपतिस्तथाविधं प्रदेशं प्रयातः, यत्रजातिशतपत्रादिपुष्पाणां सर्वथाऽभावः, तदानीमजितसेनकण्ठस्थितां विकस्वरां पुष्पमालां प्रेक्ष्य भूपेनाऽभाणि, मन्त्रिन् ? तव कण्ठेऽम्लाना पुष्पमाला कुतः ?, इदं महदाश्चर्यं मे प्रतिभाति, मयानिजपुरुषाः प्रेषिताः सर्वत्र तैर्विशोधनं विहितं तथाऽपि कुत्राऽपि पुष्पाणि नमिलितानि। तदामन्त्रिणा कथितं, प्रयाणदिवसे मत्पत्न्येयं पुष्पमाला ममकण्ठे स्थापिताऽस्ति, तस्याःशीलप्रभावादियं न म्लायति, इत्थं निशम्य नृपतिश्चेतसि भृशमाश्चर्यमवाप। पश्चादजितसेनस्ततः समुत्थाय गतः, तदा तेन निजनर्ममन्त्रिणस्तद्विचारसारः पृष्टः, अजितसेनमन्त्रिणायत्कथितं तत्किमिदानीं सत्यं प्रतीयते ?, तदा कामाङ्कुरोऽवदत्, प्रमदानामेतादृशं शीलं कुतःस्यात् ?, ततो ललिताङ्गेन कथितं–देव ? कामांकुरोयत्कथयति तत्सत्यमस्ति, तदनु रतिकेलिर्जगाद, किमस्मिन् कार्येभवतः सन्देहोऽस्ति ? तदानीमशोकः प्रोवाच, देव ? मां प्रहिणु, येनशीलवत्याःशीलं खण्डयित्वा भवन्तं निःसन्देहं करोमि, ततोनृपतिना प्रभूतं धनं समर्प्याऽशोकमन्त्री तत्रप्रेषितः, नृपतेर्निदेशान्मोदमानोऽशोकोनन्दनपुरे समागतः, शीलवत्याः हर्म्यस्य सन्निधावेकं विशालं गृहं लात्वा तत्रस्थितः, स प्रतिदिनं गवाक्षे चोपविश्य किन्नरवत्पञ्चमोद्गारेणाऽऽलापपूर्वकं गीतमगायत्, विशुद्धवसनः स च सानुरागदृष्ट्याशीलवतीमपश्यत्, तथैव प्रत्यहं दानभोगैर्निजंदक्षस्वभावमदर्शयत्, इत्थं यदा सोऽनेकधा चेष्टाः कर्तुं लग्नस्तदाशील-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वती मनसि व्यचिन्तयत्, अहो ? अयमधमस्तु नूनं मां शीलभ्रष्टां कर्तुं प्रयतते, परन्तु–मणिधरफणारत्नं, वह्निग्रासस्तथा हरेः। केशालिगृहणश्चैतद्दुष्करं परिकीर्त्तितम् ॥ १ ॥ ततोऽपि शीलवत्याः शीलखण्डनमतिदुष्करमस्ति, तदयं मूढोन-जानाति, अस्तु "इदानीं कौतुकं तु विलोकयामि" किं जायते, एवं विचिन्त्य शीलवती तमशोकं व्यलोकयत्, तदा अहो ! मदीयं समीहितमधुना सिद्धमितिमन्यमानोऽशोकोनिजांदूतीं प्राहिणोत्, साऽपि तत्राऽऽगत्यशीलवतीं बोधयन्त्यकथयत्, भद्रे ? कुसुमवद्यौवनं स्वल्पकालमेव मनोहरंभाति, तस्माद् विषयसुखभोगेन तत्सफलं कर्त्तुमु-चितम्' तव भर्ताऽधुना नृपेण साकं विदेशं गतोऽयं सुभगस्त्वां भोगाय प्रार्थयते, एवं शृण्वन्तीशीलवती व्यचिन्तयत्, दीनोऽयं कामेन कर्मणा च निहतोऽस्ति, येनाऽस्मिन् पापकर्मणि प्रवृर्त्ति करोति, ततो दास्या प्रोक्तं कमलाक्षि ! प्रसादं विधाय मन्मथाग्निज्वालाभिः सन्तप्तस्याऽस्य सुभगस्य शरीरं त्वत्समागमजलसिञ्चनेन निर्वापय, शीलवत्या भणितम्, इदं त्वत्कथनं योग्यमस्ति, परन्तु साधूनां द्रव्यसंयोगमिव कुलाङ्गनानां परपुरुषसमागमोऽनुचितोऽस्ति, किञ्च–सोऽपि कथञ्चित्क्रियते यदि मुखमार्गितं धनं मिलति, यतो घृतलोभेन लोका उच्छिष्टमपि भोजनं कुर्वन्ति, दासी बभाषे, भद्रे ? कियद्धनं त्वयाऽपेक्ष्यते ! शीलवती जगाद, लक्षार्धमिदानीं स ददातु, लक्षाऽर्धं च गृहीत्वा स्वयंपञ्चमे दिवसे निशीथिन्यामागच्छेत्, यतस्तं सुभगमपूर्वरतिसुखविलासेन प्रीणयिष्ये, ततः सादासी तद्वृत्तान्तमशोकाऽग्रे न्यवेदयत्, तेनाऽपि लक्षाऽर्धं धनं प्रदत्तम् । अथाऽत्रशीलवत्या स्वगृहस्य गुप्ताऽपवर्के निजाऽऽप्तदूतैरेका पातालगर्त्तोत्खानिता, तदुपरि सुवस्त्रेण समाच्छादितैका खट्वास्थापिता, ततः पञ्चमे वासरे तमस्विन्यामर्धलक्षधनं वितीर्याऽशोकस्तत्राऽऽगतः, खट्वां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च समारुरोह, तावत् स सहसागर्तायांपपात, तथाऽपि शीलवतीदयया तस्मै प्रत्यहं रज्जुप्रयोगेण मृण्मयपात्रे भोजनं ददौ, एवमेकस्मिन् मासे व्यतीतेऽरिमर्द्दनभूपोनर्मसचिवं जगाद, अशोकः कथं नाऽऽगतः ? सप्रोवाच, देव ? किमपिकारणं न ज्ञायते, ततोरतिकेलिना कथितम्, स्वामिन् ! मामादिश । यतोऽहंसत्वरमेतत्कार्यं साधयित्वाऽऽगच्छामि, प्रभूतं धनं प्रदाय राज्ञा सप्रेषितः सोऽपिनन्दनपुरमाययौ, प्रथमसचिववल्लब्धद्रव्यं प्रदाय सोऽपितद्वत्खट्वामारुह्य गर्तायां निपातितः, तथैव ललिताङ्ग-कामाङ्कुरावपि लब्धद्रव्यं प्रदाय गर्तासाद्बभूवतुः, अशोकादयः सर्वे तत्र सशोकास्तस्थुः, इतोऽरिमर्दननृपतिरपि सिंहरथं विजित्यस्वनगरं समाययौ, तदानीं कामाङ्कुरादयः शीलवतीं प्रोचुः, येमूढाः स्वपरशक्तिमज्ञात्वा कार्यं साधयन्तो यत्फलं लभन्ते तत्फलं सुशीले !, अस्माभिर्लब्धम् । अनेन तवशीलमाहात्म्यमस्माभिर्विज्ञातम्, दृष्टं च, अस्माकं शिक्षा च मिलिता, अतः सतीमतल्लिके ! प्रसादं कृत्वा नरकोपमादस्माद् विषमकूपात्सकृदस्मान् बहिर्निष्कासय, शीलवती प्रावोचत्, यदा मदुक्तं यूयं करिष्यथ तदाऽहं युष्मान् नरककूपान्निष्कासयिष्यामि, तैरूचे—यत्कर्तव्यं तत्समादिश, ? साजगाद, यदाऽहं कथयामि, इदं-वस्तु सिद्धं भवतु ! तदा युष्माभिर्वक्तव्यम्, एवं भवतु, तैरप्यदः सर्वमङ्गीकृतम्,। ततः शीलवती स्वभर्तारमवोचत्, भूपतिं भोजनाय निमन्त्रय ? तेन तथैव विहितम्, भोजनावसरे भूपतिंस निजगृहमानिनाय, तं च महतादरेण सत्कार, शीलवती स्वसद्मनि भोजनादिकसकलसामग्रीं गुप्तरीत्या निष्पादयामास, तत्राऽऽगतोनृपतिः स्वमनसिव्यचिन्तयत्, मन्त्रिणाऽहं निमन्त्रितो भोजनस्य समारम्भस्तु कश्चिदपि न दृश्यते, तस्मादिदं किं ज्ञातव्यम् !, तावच्छीलवती कुसुमादिभिर्गर्तां पूजयित्वा बभाषे—यक्षाः ! रसवतीसर्वा निष्पद्यताम्, ते प्रोचुः, भवत्वेवम् । ततः सिद्धं भोजनादिकं तत्रसमागतम् ’ नृपादि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भिश्च भोजनं विहितम्, ततः शीलवत्या कथितं यक्षाः ? ताम्बूलपुष्पादिकं सर्वं सिद्ध्यताम्, एवं भवत्विति यक्षाः प्रोचुः, तदानीं पूर्वप्रसाधितताम्बूलकुसुमविलेपनवसनाऽऽभरणादिचतुर्लक्षद्रव्यादिकसकलसामग्री तत्राऽऽगता, एतत्सर्वमजितसेनेन नृपायोपदीकृतम् । एतत्सर्वं व्यतिकरं साक्षाद् विलोकमानो भूपतिश्चेतसि चिन्तयतिस्म, अहो ! इयंतुकाऽप्यपूर्वासिद्धिर्विद्यते, गर्तोपान्ते स्थितायास्तस्या वचनमात्रेण सद्यः सर्वं सिद्ध्यति, एवं कौतुकितो नृपतिः शीलवतीमपृच्छत्, भद्रे ? इदं किमाश्चर्यं ! सा जगाद, देव ? चत्वारो यक्षा मे सिद्धिदायकाः सन्ति; ते सर्वं संपादयन्ति, ततो राजाऽवदत्, भद्रे ? एतान् यक्षान् मह्यंदेहि, साबभाण–देव ? सुखेन–तान् गृहाण, ? परंतु पश्चात्तानहं प्रेषयिष्यामि, नृपतिः प्रमुदितमानसः स्वाश्रमंजगाम, इतः शीलवती तान् चतुरश्चन्दनेन विलिप्यपुष्पैश्चपूजयित्वा पृथक्पृथक्मञ्जूषागतान्विधाय संध्यासमयेतान् शकटे निःक्षिप्यतूर्यरवैः सह राजभवनं निनाय, प्रभाते जातेऽद्यभोजनादिकं यक्षा दास्यन्तीतिविदित्वा नृपतिना सूदा रसवतीं कर्त्तुं निषिद्धाः, तावद् भोजनसमयो जातः, नृपतिना कुसुमादिभिः पूजयित्वा चतुर्णां यक्षाणां सन्निधौ स्थित्वा कथितं रसवती सिद्ध्यतां, तदातैरुक्तम्, एवं भवतु, इत्युक्तेऽपि किञ्चिदपि न जातम्, ततोविलक्षीभूतो नरेशस्ता मञ्जूषा उद्घाटयामास । तदानीं तासुस्थिताश्चत्वारो मानवा अदृश्यन्त, अतिक्षुधया नष्टरक्तमांसाः, स्पष्टाऽस्थिपञ्जराः, प्रकटितशिराः, दरीवन्निम्नोदराः प्रक्षीणगण्डस्थलाः, म्लानलोचनाः, दुर्गन्धशीतपवनेन निस्तेजःशरीरकाः, मनोविषादेन च हीनप्रतापास्तेऽभूवन्, इदृशावस्थाँस्तान्विलोक्य नृपतिर्जगाद, अहो ! इमे यक्षास्तु न सन्ति, किन्तु राक्षसा विद्यन्ते, तेऽपिराजानमवोचन्, देव ? वयं यक्षा वा राक्षसा नभवामः, किन्तु कामाङ्कुरादयस्तव सुहृदःस्मः, इत्यभिधाय ते नृपतेश्चरणयोः पतिताः, ततो नृपे-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





णाऽपिसम्यक् तानुपलक्ष्य सविस्मयं बभाषे, भद्राः ? इमां दुर्दशां कथं प्राप्ताः, ततस्तैः साद्यन्तं यथास्थितवृत्तान्तं नृपतेरग्रे गदितम्. ततो महीपतिना शीलवतीं समाकार्यतां श्लाघयता कथितम् । अहो ! तवबुद्धिचातुर्यम् !, अहो ! तव शीलरक्षणाय प्रयत्नः, अहो तवोभयलोकभयविलोकने प्रधानत्वम् !, एवं शीलवतीं भृशं प्रशंसन् नृपतिः पुनः स्वापराधं क्षमयन्नवोचत्, तवभर्तुःकण्ठस्थितां पुष्पमालामम्लानां विलोक्य तव शीलस्य प्रकटं महिमानं विलोकयतो मम मनसि श्रद्धा न जाता, अतोमयेमे कामाङ्कुरादयस्त्वत्सन्निधौप्रेषिताः, तस्मात् सति ? त्वया कोपो न विधेयः । एवमभिधाय नृपतिस्तांमुहुः क्षमयामास, ततः शीलवत्यपि धर्मं श्रावयित्वा राजानं बोधयामास, तथैव सा नृपतेः सर्वान् नर्मसचिवान् परस्त्रिगमनात् निवारयामास । ततः शीलवती गृहीतराजसत्कारानिजसौधं जगाम, अन्यदा–गजघटाभिः परिवृतोगन्धहस्तीव मुनिगणराजितश्चतुर्ज्ञानधरो धर्मघोषनामाऽऽचार्यस्तत्र समागतः, शीलवत्या समेतोऽजितसेनमन्त्रीतं वन्दितुंगतः, गुरुं वन्दित्वा सभार्यःस यथोचितस्थाने समुपविष्टः, तदानींसूरीश्वरः शीलवतीमुद्दिश्य बभाषे, भद्रे ! त्वं धन्याऽसि, पूर्वभवाऽभ्यासेनैवाऽधुना शीलव्रतपालने सावधानाऽसि, ततोमन्त्रिणापृष्टम्, भगवन् तत्कथं ज्ञातव्यम्, गुरुर्जगाद, कुसुमपुराभिधे नगरे सुलसनामा श्रेष्ठी सत्क्रियायांदक्षः पापप्रवृत्तौचादक्षो बभूव, सुयशा तस्यभार्याऽसीत्, तद्गृहे च भद्रभावो दुर्गतनामा, कश्चित्किंकरोऽभवत्, तस्य सुदुर्गिलाऽभिधाभार्याऽऽसीत्, एकदा सुयशा श्रेष्ठिन्यासाकं दुर्गिला साध्वीनां वसतिं जगाम, तत्र श्रेष्ठिन्या मनोहरवस्त्रकुसुमादिभिः पुस्तकं सविस्तरं संपूज्य चन्दनाप्रवर्त्तिनीमभिवंद्योपवासस्य प्रत्याख्यानं विहितम्, तदादुर्गिला प्रवर्तिनीमाभिवन्द्य पप्रच्छ–भगवति ! अद्य किमस्ति ! साध्वी जगाद, भद्रे ! अद्य शुक्लपञ्चमी विद्यते, सा



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ज्ञानतिथिरिति जिनसिद्धान्ते कथितम्, अस्यां तिथौ निजशक्त्या ज्ञानपूजनं तपश्च विशेषतो विधेयम्, उक्तं च,

ये भव्या ज्ञानपञ्चम्यां, वस्त्रगन्धसुमादिभिः । नैवेद्यदीपसहितं कुर्वन्ति ज्ञानपूजनम् ॥ १ ॥
तथैव—यथाशक्ति तपश्चैव, कुर्वन्ति विशदं तथा । ते भवान्तरमासाद्य, शुद्धबुद्धिमुपासते ॥ २ ॥
सौभाग्यादिगुणैश्चाऽपि, भूषिताः सुखभागिनः । भव्यात्मानो जिनेन्द्रस्य, प्राप्नुवन्त्यव्ययं पदम् ॥ ३ ॥

एवं प्रवर्तिनीवचनं निशम्य दुर्गिलाजगौ,—इयं ममस्वामिनी सुयशा धन्याऽस्ति, यतो या स्वसामर्थ्यं तपसाव्ययते, धनंच धर्मेनियोजयति, मादृशी भाग्यहीना त्वधन्या तपः कर्तुमशक्ता किं करोति, ततः प्रवर्तिनी बभाषे—सुभगे ! दानं तपश्च शक्तिमन्तरा नैवविधीयते, परं शीलपालनंतु सर्वेषां स्वाधीनमेवाऽस्ति, तस्मात्त्वं परपुरुषनिवृत्तिरूपं शीलव्रतं यावज्जीवं स्वीकुरु ! तत्राऽप्यष्टमीचतुर्दश्योः स्वपतिसंगो न विधातव्यः, भद्रे ! एवं विधानेन त्वमपि कल्याणं प्राप्स्यसि, ततोदुर्गिला शीलव्रतंधारयित्वा, निजात्मानंकृतार्थमन्यमाना निजनिकेतनंसमागत्य तद्वृत्तान्तं निजस्वामिनं कथयामास, तन्निशम्य सन्तुष्टहृदयो दुर्गतोऽपितां बहुमन्यमानोऽवदत्, प्रिये ! अद्यत्वया जीवितव्यस्यफलं लब्धम्, किञ्चा-द्यारभ्याहमपि परदारान् परिहरामि, तथैव तेषु पर्वसु स्वदारसंगमपिन करिष्यामि, एवं नियमं गृहीत्वा ताभ्यामनुक्रमेण सम्यक्त्वमपि स्वीकृतम्, ततोदुर्गिला विशेषतः संजातश्रद्धयास्वयं तपश्चर्यां कुर्वन्ती तस्मिन्पर्वणि ज्ञानपूजनं समाचरत्. प्रान्ते तौ दम्पतीकालंकृत्वा सौधर्मदेवलोके देवोत्तमत्वं प्रापतुः, ततश्श्रुत्वा दुर्गतजीवो हे मन्त्रिन् ! त्वमजितसेनो जातोऽसि। दुर्गिलाजीवश्चेयं तव भार्या शीलवती समुत्पन्नाऽस्ति । सा चेयं ज्ञानाराधनतो विशिष्टमतिभाजनं जाताऽस्ति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





इति स्वकीयप्राग्भववृत्तान्तश्रवणेन जातजातिस्मृती तौ दम्पती प्रोचतुः-भगवन् ! भवता यत्कथितं तत्सत्यमस्ति। गुरुणा पुनः प्रोक्तम्-देशतः शीलव्रतं पालयद्भ्यांयुवाभ्यामीदृग्विधमुत्तमं फलं लब्धं तर्ह्यधुना सर्वतस्तद्व्रतपालने प्रयत्नं कुरुतम्। तच्च सर्वसंगविरतिरूपदीक्षाग्रहणेन सिद्ध्यति। ततस्तौ दम्पती जगदतुः-मुनीन्द्र ! कृपां विधायेदानीमावयोर्दीक्षां देहि। ततः कृपालुर्गुरुस्तौ दम्पती दीक्षयामास। अथाधिकसंवेगरंगरंजितात्मानौ तौ यावज्जीवं सर्वथा निष्कलंकं शीलं प्रपाल्य प्रान्ते समाधिपूर्वकं मरणं प्रसाध्य ब्रह्मदेवलोके देवत्वेन समुत्पन्नौ, तत्र दिव्यसुखमनुभूय क्रमेण ततश्च्युत्वोत्तमं कुलमवाप्य संयमं समाराध्योभौनिर्वाणपदंगमिष्यतः

इति श्रीजगद्विभूषण शासनमहोदधि शीतरश्मि स्वपरसमयपारदर्शि तपागच्छगगनाङ्गणतिग्मरश्मि योगनिष्ठाध्यात्मज्ञानदिवाकर शास्त्रविशारद जैनाचार्य श्रीमद्बुद्धिसागरसूरीश्वरशिष्यरत्न प्रसिद्धवक्ता श्रीमद् अजितसागरसूरिविरचितोऽजितसेन-शीलवतीकथासारः समाप्तः वि. सं. १९८० कार्त्तिकपौर्णमास्यां राजनगरे. ॐ शान्तिः शान्तिः सुशान्तिः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुस्तकप्राप्तिस्थानम्—

अजितसागरसूरिशास्त्रसंग्रह–

कार्यवाहक—

शा. शामलदास तुलजाराम मु० प्रांतिज.

जि. अमदावाद (गुजरात)

भावनगरे आनन्दाख्ये मुद्रणालये

श्रेष्ठिवर्य गुलाबचंद्र लल्लुभाइ इत्यनेन

मुद्रयित्वा प्रकाशितम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीमद्-अजितसागरसूरिवर्यविरचितम्-श्री अजितसेनशीलवती चरितम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# शेठ देवचन्द लालभाई-जैन पुस्तकोद्धार फण्ड.

जव्हेरी बजार-मुंबई. संवत १९७६. ब्रांच गोपीपुरा-सुरत.

१००००-८-२० जैन ए. प्रि. प्रेस-सुरत.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only